प्रवेश सं० १७८९९

विषय: धर्मशास्त्रम्

क्रम सं०

नाम प्रायश्चित्तमयूख भास्कर.

ग्रन्थकार नीलकण्ठभट्ट:

पत्र सं० 1 - 120

श्लोक सं०

अक्षर सं० (पंक्तौ) ४०

पंक्ति सं० (पृष्ठे) १०

आकार: 12·2 × 4·7

लिपि: दे० ना०

आधार: कागज

लि० विवरणम् सं० 1387

सं० 1260

पी० एस० यू० पी०--५५ एस० सी० ई०--१९४१--५०,०००

नं० ३५१५

Indira Gandhi National
Centre for the Arts

२०

प्रायश्चित्तमयूखस्य पुस्तकं नागरपिशुनेरा
व्यासोपाख्यदयानाथस्य

॥श्रीगणेशाय नमः॥ ॥नमामि भास्वत्सदृपं कजंतत श्रीनीलकंठो हमथ प्रकुर्वे॥ स्वतात पदेशानुगुरु शंकरस्य विनिर्णयं पविशुद्धि
प्रा॰ प्र॰ हेतुं॥ १॥ पापविशुद्धिहेतुत्वं प्रायश्चित्तस्याह याज्ञवल्क्यः॥ विहितस्याननुष्ठानान्निंदितस्य च सेवनात् अनिग्रहाच्चेंद्रियाणां नरः
पतनमृच्छति तस्मात्तेनेह कर्त्तव्यं प्रायश्चित्तं विशुद्धय इति॥ अनिग्रहादिति पर्युदासः संग्रहार्थः॥ विहिताननुष्ठाननिषिद्धसेव
१ ननिमित्ते विहितं कर्म प्रायश्चित्तं प्रारब्धपापनाशार्थे तु कर्मणि तत्पदं गौणं॥ माधवविज्ञानेश्वरएवमेव यत्तु शूलपाणीय
टोडरानंदयोः॥ पापनाशनं कर्म प्रायश्चित्तमिति तन्न। तुलापुरुषादावतिव्याप्तेः॥ कल्पतरौ गभेषु प्रायश्चित्तेः आत्तेश्च एवप्रा
यश्चित्तपदस्य रूढत्वे योगमप्याहांगिराः॥ प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते॥ तपो निश्चयसंयुक्तं प्रायश्चित्तमितिस्मृ
तमिति॥ यत्तु पद्धरमिश्रभट्टोपाध्याय टोडरानंदकृतः॥ प्रायः पापं विजानीयाच्चित्तं तस्य निरोधनमिति पेठुः तत्राकर
श्चिंत्यः॥ इदं च प्रायश्चित्तं निमित्ते विधानान्नैमित्तिकं पापनाशकतया काम्यं च॥ अत एव बृहस्पतिः॥ प्रायश्चित्तं यन्नि
प तेतन्नैमित्तिकमुच्यत इति॥ जाबालः॥ अतः काम्यं नैमित्तिकं च प्रायश्चित्तमिति स्थितिरिति॥ एवं च सर्वांगोपसंहारः सा रम॰
मर्थेप्यधिकारो विरुद्धः॥ अत्राधिकारस्त्रैवर्णिकानां ज्ञावद्विद्वत्वादप्रतिबद्धएव॥ शूद्रस्याप्याहतुः शंखलिखितौ॥ कृ १

च्छ्राणि द्विजातीनामेव नावरस्य कामं धर्मेप्सोरप्रतिषिद्धः साधारणो हि धर्मो निपमश्चेति कृच्छ्राणि कामानि॥ धर्मेप्सोः प्रायश्चित्तार्थिनः॥
याज्ञवल्क्योपि। शूद्रोधिकारहीनोपि कालेनानेशुध्यतीति॥ अधिकारहीनो जपहोमाधिकारशून्यः॥ कालः प्रायश्चित्ताधिकरणं॥ तस्य
विशेषमाहांगिराः॥ तस्माच्छूद्रं समासाद्य सदा धर्मपदे स्थितं॥ प्रायश्चित्तं प्रदातव्यं जपहोमविवर्जितमिति। स एव। शूद्रः कालेन शु
ध्येत गोब्राह्मणहिते रतः॥ दानैर्वाप्युपवासैर्वा द्विजशुश्रूषया तथेति। यत्तु मिताक्षरापां स्मृत्यंतरे॥ कृच्छ्राण्येतानि कार्याणि सदा व
र्णत्रयेण तु॥ कृच्छ्रेष्वेतेषु शूद्रस्य नाधिकारो विधीयत इति तत्काम्यकृच्छ्रपरं॥ यत्तु मनुः। न शूद्रे पातकं किंचिन्न च संस्कारमर्हति॥
नास्याधिकारो धर्मेस्ति न धर्मात्प्रतिषेधनमिति॥ तदर्थमाह मेधातिथिः॥ द्विजाधिकारिकं शूद्रस्य प्रकरणाल्लशुनादिभक्षणे पाप
न्नास्ति। विहितविवाहाद्यतिरिक्तसंस्कारं च नार्हति॥ उपवासादिव्रतस्य नित्योधिकारः तदकरणात्र प्रत्यवेति। तस्मादेव धर्माद स्य
प्रतिषेधनमपि नास्ति। करणेभ्युदयोस्त्येवेति वदंति केचिद्विद्वांसः। स्त्रीणां शूद्रसमानेतामितिस्मृतसंहिताद्युक्तेः॥ शूद्राणां तु सध
र्माणः सर्वेपध्वंसजाः स्मृता इति स्मृतेश्च स्त्रीणां व्यभिचारजानां चाधिकारः॥ अत एव प्रायश्चित्तमपि शूद्रवदेव॥ विष्णुः। विप्रे तु
सकलं देयं पादोनं क्षत्रिये स्मृतं॥ वैश्ये र्धं पादशेषं स्याच्छूद्रजातिषु शस्यत इति। यत्तु कश्यपः। विप्रार्धं क्षत्रिपस्योक्तं तदर्धं वै

Indira Gandhi National
Centre for the Arts

प्रा॰म॰
२

वर्णजातिषु। तदूर्ध्वमेव शूद्राणां प्रायश्चित्तं विदुर्बुधा इति तदकामकृतविषयमिति माधवः। यत्त्वंगिराः। पर्षद्या ब्राह्मणानां तु स्यादर्हा द्विगु
णा मता॥ वैश्यानां त्रिगुणा प्रोक्ता पर्षद्वच्च व्रतं स्मृतमिति। भविष्ये॥ चतुर्गुणा तु शूद्राणां पर्षदुक्ता महात्मभिः। पर्षद्वच्च व्रतं प्रोक्तं शु
द्ध्यै पापकर्मणामिति॥ एतच्च॥ प्रतिलोमापवादेषु द्विगुणस्त्रिगुणो दम इति याज्ञवल्क्योक्ते दंडाधिक्यानुमितदोषगौरवात्प्रातिलो
मकृतचतुर्विधब्राह्मणपरं। द्विगुणं त्रिगुणं चैव चतुर्गुणमथापि च॥ क्षत्रविट्शूद्रजातीनां ब्राह्मणस्य वधे व्रतमिति प्रजा
पत्युक्तेर्विप्रवधपरं च॥ आश्रमिणां विशेषमाहांगिराः। गृहस्थोक्तानि पापानि कुर्वन्त्याश्रमिणो यदि॥ शौचवच्छोधनं प्रोक्त
मर्वाक्ब्रह्मनिदर्शनात्। इति शौचवत् द्विगुणादि तथा च मनुः। एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः। त्रिगुणं तु वनस्थानां
यतीनां च चतुर्गुणमिति॥ गृहस्थोक्तिः स्नातकोपलक्षिका। अन्यथा विधुरादेः प्रायश्चित्तमेव न स्यात्। ब्रह्मनिदर्शनं नत्व
ज्ञानं ज्ञानोत्पत्त्यनंतरं तूत्पन्नं पापं ज्ञानेनैव नाश्यते। ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेर्जुनेति भगवद्गीतोक्तेः। ब्रह्म
चारिणो द्वैगुण्योक्तिः। षोडशवर्षोर्ध्वं। षोडशवर्षपर्यंतं त्वाहांगिराः॥ अशीतिर्यस्य वर्षाणि बालो वाप्यूनषोडशः॥ प्रायश्चि एम॰
त्तार्द्धमर्हति स्त्रियो रोगिण एव चेति॥ आदित्यपर्वणि। आचतुर्दशकाद्वर्षान्न भविष्यति पातकं। परतः कुर्वतामेवं दोष एव भ २

विष्यति॥ अंगिराः॥ अर्वाक् तु द्वादशाद्वर्षाद्दशीतेरूर्ध्वमेव वा॥ अर्द्धमेव भवेत्पुंसां तुरीयं तत्र योषितामिति॥ अत्रोच्चावचावधिता
रतम्यं शक्तितो ज्ञेयं॥ शंखः॥ ऊनैकादशवर्षस्य पंचवर्षात्परस्य च॥ प्रायश्चित्तं चरेत्भ्राता पिता वान्यः सुहृज्जनः॥ अतो बालतरस्या
स्य नापराधो न पातकं॥ राजदंडो न तस्यास्ति प्रायश्चित्तं न विद्यते इति॥ कुमारः॥ मद्यमूत्रपुरीषाणां भक्षणे नास्ति कश्चन॥ दोषस्त्वा
पंचमाद्वर्षादूर्ध्वं पित्रोः सुहृद्गुरोरिति। गौतमः। प्रागुपनयनात्कामचारः कामवादः कामभक्ष इति। सुरापाननिषेधस्तु जातमात्रस्य
इति स्थितिरिति कुमारवाक्यादनुपेतस्य यो बालो मद्यं मोहात्पिबेदिति कृच्छ्रत्रयं गुरुः कुर्यान्मेहाता माता तथा पितेति स्मृतेश्चानु
पेतस्य दोषोस्त्येवेति विज्ञानेश्वरः॥ एतद्वचनद्वयस्य पंचमवर्षप्रवृत्त्युत्तरपरतयाप्युपपत्तेस्तत्रानुपेतस्य दोषः॥ वर्षचतुष्टय
पर्यंतं न दोष इति तु युक्तं॥ यत्तु स्मृत्यंतरे। जातमात्रः शिशुस्तावद्यावदष्टौ समा वयः। स हि गर्भसमो ज्ञेयो व्यक्तिमात्रप्रदर्शितः
॥ भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथानृते। तस्मिन्काले न दोषः स्यात् स यावन्नोपजीवत इति तन्मध्येतरपि विषयं॥ इदं चार्ध
पादादिष्टमौलिकद्वादशिकाद्यपेक्ष्य प्रवर्तते न तु कृच्छ्रपादिनिमित्तकद्वैगुण्याद्यपेक्षया ब्रह्मचारित्वादिनिमित्तकं द्वैगुण्या
द्यप्येवं॥ अर्धपादद्वैगुण्यत्रैगुण्यादिविधीनामुपजीव्योपजीवकभावाभावेन परस्परानालोचनया मौलिकविधिमात्रालोच

Indira Gandhi National Centre for the Arts

प्रा॰ प्र॰
३

नैनैव प्रवृत्तेः॥ प्रयोजकादीनां फलमाहापस्तंबः॥ प्रयोजयितानुमंता कर्त्ता चेति स्वर्गनरकफलेषु कर्मसु भागिन इति पैठीनसिः
॥ हंता मंतोपदेष्टा च तथा संप्रतिपादकः। प्रोत्साहकः सहायश्च तथा मार्गनिदेशकः। आश्रयः शस्त्रदाता च भक्तदाता विकर्मि
णां॥ उपेक्षकः शक्तिमांश्च दोषवक्तानुमोदकः॥ अकार्यकारिणस्तेषां प्रायश्चित्तं प्रकल्पयेत्॥ हंता साक्षाद्धंता मंतानुमंता प्र
वृत्तप्रवर्त्तकः॥ उपदेष्टा मर्मोद्घाटनादिकृत् संप्रतिपादकः पलायमानममित्रमुपरुंधन् परेभ्यो हंतारं योऽर्पयति। प्रोत्साहकः स्ता
वकः सहायः सहगंता अनुमोदको हंतुर्हर्षमनुयो हृष्यति॥ भक्तपदमौषधादेरप्युपलक्षणं एते च निषिद्धक्रियोद्देशेन तेन
दोषभाजो नान्यथा तथा च याज्ञवल्क्यः। औषधं स्नेहमाहारं ददद्गोब्राह्मणादिषु॥ दीयमाने विपत्तिः स्यात् न स पापेन लिप्यते॥ त
था। दाहच्छेदशिराभेदप्रयोगैरुपकुर्वतां द्विजानां गोहितार्थं तु प्रायश्चित्तं न विद्यते॥ पराशरः॥ कूपखाते च धर्मार्थं गृहदाहे
च या मृता॥ ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यत इति॥ औषधदाने विशेषमाहांगिराः॥ औषधे तु न दोषोऽस्ति स्वेच्छया तु पि
बेद्यदि॥ अन्यथा दीयमाने तु प्रायश्चित्तं न विद्यत इति उद्देशमरणफलकमनुत्पादने तु विष्णुः। आक्रुष्टस्ताडितो वापि ध ३
नैर्वापि वियोजितः॥ यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकं इति॥ तथा ज्ञातिमित्रकलत्रार्थं सुहृत्क्षेत्रार्थमेव वा॥ उ

त्सार्द्धं तदेव॥ अयं चाक्रोशकादिनिमित्तीत्युच्यत इति निबंधकृतः॥ तेन निमित्तीपादमारभ्यादितिपादप्रायश्चित्तमेव तस्य भवति॥
यातु संबंधेन विनादेव शुल्कवादेन कोपित इति वार्षिकप्रायश्चित्तं प्रक्रमस्य भविष्योक्तिः स्यापरिहारकृता क्रोशपर भविष्ये॥ पुत्रः
शिष्यस्तथा भार्या शासनीयश्च नृपतिः न शास्ता तत्र दोषेण लिप्यते एनसस्तम॥ इदं च पुत्रादीनुपक्रम्य प्राप्तापराधास्ताड्याः स्यु
रज्ज्वा वेणुदलेन वा॥ पृष्ठतस्तु शरीरस्य नोत्तमांगे न वक्षसि। अतोऽन्यथा तु प्रहरन् चौरस्याप्नोति किल्बिषमिति मनूक्तायां शा
स्त्रोक्तरूपं॥ अधिकशासने तु दोष एव॥ निमित्तिदोषमपवदति विष्णुः। उद्दिश्य कुपितो विप्रस्तोषितः श्रावयेत्तु नः॥ तस्मिन्मृते न दोषो
स्ति द्वयोरुच्छ्रावणे कृते॥ तोषितो निमित्तिना॥ द्वयोरुच्छ्रावणे कृते न दोष इति संबंधः। द्वयोरित्यनेकोपलक्षणं॥ मदनरत्नयस्य क
स्यचिदुच्छ्रावणे कृते द्वयोराक्रोशकात्मघातयोर्दोषो नास्तीत्याह विष्णुः। असंबंधे न यः कश्चित् द्विजः प्राणान्समुत्सृजेत्॥ त
स्यैव तद्भवेत्पापं न तु यं परिकीर्तयेत्॥ बृहस्पतिः॥ आक्रुष्टस्तु यदाक्रोशंस्ताडितः प्रतिताडयन्॥ हत्वाततायिनं चैव नूनात ता
पी भवेन्नरः॥ याज्ञवल्क्यः। कृच्छ्रत्रयं गुरुः कुर्यात् म्रियते प्रहितो यदीति। अत्र संप्रतिपादकादीनामनुग्राहकस्य व्यापारबाहु
ल्यात् मौलिकमेव पादोनं आज्ञाप्रार्थनादिना प्रयोजकस्यार्द्धं प्रवृत्तप्रवर्त्तकस्यानुमंतुः स्यार्द्धपादं प्रयोजयितानुमंता कर्त्ता

Indira Gandhi National
Centre for the Arts

प्रा०प्र०
४

चेतिस्वर्गनरकफलेषुकर्मसुभागिनेयोभूयआरभतेतस्मिन्फलविशेषइत्यापस्तंबोक्तेः॥एतेषांप्रायश्चित्तेयत्नायांतुग्रंथका
राएवप्रमाणं॥सुमंतुः।तिरस्कृतोयदाविप्रोहत्वात्मानंमृतोयदि॥निर्गुणःसहसाक्रोधात्गृहक्षेत्रादिकारणात्॥त्रैवर्षिकं
कृतंकुर्यात्प्रततिलोमीसरस्वती॥गच्छेद्वापिविशुद्ध्यर्थंतस्यपापस्येतिनिश्चितं॥बृहस्पतिः॥नाततायिवधेहंताकिल्बिषंप्रा
प्नुयात्क्वचित्।विनाशार्थिनमायांतंघातयन्नापराध्नुयात्॥वसिष्ठः।अग्निदोगरदश्चैवशस्त्रपाणिर्धनापहः।क्षेत्रदारहरश्चैव
षडेतेह्याततायिनः॥अपरार्केव्यासः।उद्यतासिंविषाग्निंचशापोद्यतकरंतथा॥आथर्वणेनहंतारंपिशुनंचैवराजसु॥
भार्यातिक्रमिणंचैवविंद्यात्सप्ताततायिनः॥यशोवित्तहराणन्यानाहुर्धर्मार्थहारकान्॥कात्यायनः।अनाक्षारितपूर्वेपित्वप
राधेप्रवर्तते॥प्राणद्रव्यापराधेचप्रवृत्तस्स्यादाततायिता॥अनाक्षारितेनेपकृतःतेनपूर्वकृतापराधस्मारणाघुघतस्सनात
तायितेतितद्वधेदोषएवआततायिवधेदोषाभावश्चगोविप्राततायिभिन्नविषयइतिमिताक्षरापरार्कौदे॥नाततायिवधे
दोषोन्यत्रगोब्राह्मणादितिसुमंतूक्तेःकल्पतरौतुआततायिन्यदोषोन्यत्रगोब्राह्मणात्यदाहन्यात्प्रायश्चित्तंनस्यादितिपा
ठः।अत्रयुगांतरेयुद्धेविप्रवधेप्रायश्चित्ताभावः।युद्धंविनाहननेतुप्रायश्चित्तं॥कलौतुयुद्धेपिहननेप्रायश्चित्तं।आततायिद्वि ४

जाम्याणांधर्मेयुद्धेनहिंसनमितिकलिनिषिद्धेषुपाठात्॥प्रपंचितंचैतत्अस्मत्चरणैःकलिवर्ज्यनिर्णयेस्माभिश्चव्यवहारम
यूखे॥आततायिवधेप्रायश्चित्तंभविष्ये॥हत्वानुप्रहरंतंवैब्राह्मणंवेदपारगं।कामतश्चेद्वरेद्वीरकृच्छ्रंचांद्रायणमुत्तममिति॥
अथकामाकामकृतपापप्रायश्चित्तव्यवस्था॥बृहस्पतिः।कामाकामकृतंत्वेवंपातकंद्विविधंस्मृतं॥पुरुषापेक्षयाचैवनि
ष्कृतिर्द्विविधास्मृतेति॥यत्तुयाज्ञवल्क्यवाक्ये।प्रायश्चित्तैरपैत्येनोयदज्ञानकृतंभवेत्।कामतोव्यवहार्यस्तुवचनादिहजाय
ते॥इत्यज्ञानपदंतस्यकामपरंअतएवतत्प्रतियोगिरूपंकामतःपदंसंगच्छते॥एवंवाक्यांतरीयाणिबुद्धिज्ञानाभिसं
धिपदानिकामपराणि॥अबुध्यज्ञानानभिसंधिपदानिचाकामपराणि॥तेनबलात्कारितेपाशेपेस्त्यपिज्ञानेनद्विगुणंप्रा
यश्चित्तंतत्प्रयोजकाभावात्अत्राकामकृतपापव्यवहारनिरोधिकानरकजनिकाचेतित्रिशक्तिद्वयमपिनत्रयतिप्रायश्चि
त्तेन॥कामकृतस्यतुव्यवहारनिरोधिकैवनश्यतिनतुनरकानुकूलेतिविज्ञानेश्वराशयोनिबंधकृतःएतच्चयेषांहत्या
व्यवहारेनिषिद्धत्वंतान्निचाहणोतमः॥ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदित
कर्माभ्यासिपतितात्याग्यपतितत्यागिनःपतिताःपातकसंयोजकाश्चेति।एतेष्वेवव्यवहारेनिषिद्धोनान्यत्र॥एनस्थिभिरनि

Indira Gandhi National
Centre for the Arts

प्रा०प्र० ५

र्णिकैर्नार्थं किंचित्समाचरेदिति मानवीयमेनत्त्विपरमपि ब्रह्महादिपरमेव इतरथा येषु तु नरकानुकूलापि नाश्यते॥ सर्वरहस्यपा
पेषु तु ब्रह्महत्यादिप्रकाशेषु मरणांतिकप्रायश्चित्ते चैवं॥ व्यवहारनिरोधनाभावेन तदनुकूलशक्त्यभावात्॥ श्रीशीकराचार्यास्तु
कामतो व्यवहार्यत्वं सकारप्रश्ने वेण दयाज्ञवल्क्यवचो बहिस्तु भयथापि स्मृतेराचाराच्चेति सूत्रे। कृतप्रायश्चित्ते नैष्ठिकब्रह्म
चार्यादिपरं आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते पुनः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महा॥ आरूढपतितं विप्रं
मंडलाच्च विनिःसृतं। उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चांद्रायणं चरेदिति च स्मृतेरिति पेनशुद्धो व्यवहार्यो यो भवेत्तं प्रायश्चि
त्तं न पश्यामीति कृतप्रायश्चित्तमपि आरूढपतितादिकं स्पृष्ट्वा चांद्रायणं कुर्यादिति वाक्यद्वयार्थ इत्याहुः। तत्सूत्रे वाच
स्पतिमिश्रास्तु बालघ्नादिपरमप्याहुः। बालघ्नांश्च कृतघ्नांश्च विशुद्धानपि धर्मतः। शरणागतहंतॄंश्च स्त्रीहंतॄंश्च न
संविशेदिति स्मृतेः न संविशेन्न व्यवहरेत्॥ अत एव याज्ञवल्क्यः॥ शरणागतबालस्त्रीहिंसकान्संविशेन्न तु। चीर्णव्रता
नपि सतः कृतघ्नसहितानिमान्॥ तेनाचार्यमतेऽवकीर्णि नैष्ठिकादिभिर्बालघ्नादिभिश्च कृतप्रायश्चित्तैर्नरका प्र० ५
नुकूलाशक्तिर्नाश्यते॥ व्यवहारनिरोधिका अस्त्येव इतरथा पापेषु कामकृतेष्वपि शक्तिद्वयमपि नाश्यते द्विगुणप्राय

श्चित्तेन॥ तदाहांगिरः॥ विहितं यदकामानां कामात्तु द्विगुणं भवेत्॥ महापापे तु कामकृते मरणमेव। तथा च स एव॥ यः काम
तो महापापं नरः कुर्यात्कथंचन। न तस्य निष्कृतिर्दृष्टा भृग्वग्निपतनादृते। तथा प्राणांतिकं तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः॥
तत्कामकारविषयं विज्ञेयं नात्र संशयः। व्यासः। कामतो ब्राह्मणवधे निष्कृतिर्नास्ति जीविनः। यस्तु सर्वं परित्यज्य यावज्जीवं
चरेद्व्रतं॥ स विशुद्धः शुभान्लोकान् विप्रो गच्छेन्न संशयः॥ ॥अथ तंत्रप्रसंगौ॥ ॥तत्रानेकनिमित्तेषु प्राजापत्यादीनां सजा
तीयानां प्रायश्चित्तानां देशकालकर्त्रैक्ये तंत्रं॥ तंत्रे चैकस्मिन्निमित्ते प्राजापत्यद्वयमेकत्रैकमिति विशेषग्रहणे द्वयमेव
कार्यं॥ तेनैवैकप्राजापत्यकार्यमपि सिध्यतीति प्रसंगसिद्धिः। यथा गौतमः। द्विपरदारे त्रीणि श्रोत्रियस्येति सामान्यतः पर
दारमात्रगमने श्रोत्रियपत्नीगमने च श्रोत्रियपत्नीगमननिमित्तकं त्रैवार्षिकमेव केवलं कार्यं तेनैव द्वैवार्षिकसिद्धिः। शं
खलिखितौ॥ गुप्तायां वैश्यायामवकीर्णः संवत्सरं त्रिषवणमनुतिष्ठेत् क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणीति। अ
त्र तिसृष्वप्यवकिरणेषु ब्राह्मणीनिमित्तकं त्रैवार्षिकमेव कार्यमिति निमित्तानां व्याप्यव्यापकताभावेपि व्याप्यनिमित्तेन व्या
पकनिमित्तस्य प्रसंगतः सिद्धिः। यथा॥ अवगूर्य चरेत्कृच्छ्रं अतिकृच्छ्रं निपातने॥ कृच्छ्रातिकृच्छ्रे स्पृष्टमात्रे कृच्छ्रोऽन्तरशो

Indira Gandhi National
Centre for the Arts

प्रा०प्र० ६ णित इति। अत्रास्थ्यातनेसत्त्वगूरणनिपातनयोर्व्यापिकयोर्न पृथक्त्वनिमित्तप्रायश्चित्तप्रयोजकत्वतेति। ब्रह्महत्याप्रायश्चित्ते तु
तत्प्रकरणे तत्रावापोद्वसेते॥ ॥अथ प्रायश्चित्तातिदेशः॥ ॥स त्रिविधः। तत्र वाचनिकं तावत् माह याज्ञवल्क्यः॥ यागस्थक्षत्रवि
ड्घाती चरेत् ब्रह्महणि व्रतं। तादृप्यातिदेशमप्याह स एव॥ पितुः स्वसारं मातुश्च मातुलानीं स्नुषामपि। मातुः सपत्नीं भगिनीं आ
चार्यतनयां तथा॥ आचार्यपत्नीं स्वसुतां गच्छंस्तु गुरुतल्पगः इति। साम्यातिदेशमप्याह स एव गुरूणामध्यधिक्षेपो वेदनिं
दा सुहृद्वधः। ब्रह्महत्यासमं ज्ञेयमधीतस्य च नाशनमिति। अत्र साम्यातिदेशोऽर्धतादृप्यवाचनिकयोरल्पपादोनं॥ एतत्समो मंत्री
त्यादौ किंचिद्धीन एव सम पद प्रयोगात्॥ महापातकातिदेशविषयाणां च पातकसंज्ञकत्वात्॥ महापातकतुल्यानि पापान्युक्ता
नि यानि तु। तानि पातकसंज्ञानि तन्न्यूनमुपपातकमिति पातकानां महापापान्न्यूनत्वप्रतिपादनाच्चेति विज्ञानेश्वरादयः॥
अत्र केचित्। इषावेकाहे समानमितरच्छ्येनेनेति वाचनिकातिदेशोऽन्यूनत्वाप्रतीतेरिहापि न न्यूनतेति। एतत्समो मंत्रीत्यादौ तु
न्यूनताप्रत्यक्षगम्या। अस्तु वा समशब्देन न्यूनताप्रतीतिकलहः पादोनार्धादीयत्तानुनिष्प्रमाणिकेति अस्मज्ज्येष्ठभ्रातृच गप० ६
रणाः। महापातकतुल्येषु पातकसंज्ञेषु विशेषतः प्रायश्चित्तानुक्तेस्तदाकांक्षायामर्थवादे महापापजन्यनरकाद्यवगतेः प्रा

यश्चित्तेऽप्यर्धता कल्प्यते॥ तमेवार्थवादमाह हारीतः॥ पातके तु सहस्रं स्यात् महत्सु द्विगुणं तथा॥ उपपापे तुरीयं स्यान्नरकं व
र्षसंख्ययेति॥ यत्तु विष्णुः। अतिपातकिनः पर्यायेण पच्यंते कल्पं॥ मन्वंतरं महापातकिनः अनुपातकिनश्चोपपातकिनश्चतुर्युग
मिति तदभ्यासपरं॥ अनुपातकं महापातकतुल्यं पातकसंज्ञं॥ तादृप्यवाचनिकातिदेशोऽनुपादोनमेव॥ ब्राह्मणपुत्रस्य क्षत्रियायां मा
तरि गमने पादहान्याद्वादशवार्षिकमेवमन्यवर्णास्वितिमिताक्षरैकस्यत्यापादोनं द्वादशाब्दमुक्तं तच्च न केवलं हीनवर्णमातृगमन
एव किंतु मातुः सपत्नीमित्याद्युक्तसर्वतादृप्यवाचनिकातिदेशविषयं सर्वेषां समानधर्मत्वात्। यथाहोशना॥ बहूनामेकधर्मा
णामेकस्यापि यदुच्यते। सर्वेषां तद्भवेत्कार्यमेकरूपा हि ते स्मृता इति॥ अत एव मिताक्षरायां रजकादीनां पंचानां गमने चांद्राय
णद्वयं प्रायश्चित्तमापस्तंबोक्तमुक्त्वा रजकश्चर्मकारश्च नटो बुरुड एव च॥ कैवर्तमेदभिल्लाश्च सप्तैते चांत्यजाः स्मृता इति सप्ता
त्यजस्त्रीगमने पितृदेवप्रायश्चित्तमुशनोवाक्यबलादुक्तमिति पुक्कसमुपजप्यंति। एतेनातिदेशे संपूर्णप्रायश्चित्तं वदंतो शूलपा
णिभवदेवावप्यपास्तौ॥ किंच सर्वत्र द्वादशाब्दविधिस्तावत्स्मृतिषु तदुपदेश एव स्यात्। न तु क्वचिदुपदेशः क्वचिदतिदेश इ
ति निष्प्रयोजनं द्वैविध्यं॥ न चात्र न्यूनतातिरिक्तोऽर्थ दृष्टिवदार्शपौर्णमासिकातिदेशस्योहादिप्रयोजनमस्ति। तच्च भवदे

Indira Gandhi National Centre for the Arts

पा॰प्रा॰ ७

वः साम्योक्तिरर्थवादः अन्यथा ब्रह्महत्यासुरापानसमेषु मिथ्योत्कर्षोक्तिवेदनिंदादिष्वपि द्वादशाब्दं स्यात्। क्वचित्तद्विशेषम
नुष्यहरणे मनुनाचांद्रायणादिस्वल्पप्रायश्चित्तं तदाम्नानाच्चेति तदपि न। मिथ्योत्कर्षोक्तिवेदनिंदादिषु द्वादशाब्दाद्यपेक्षया
र्थस्येष्टत्वात्॥ मनूक्तास्वल्पप्रायश्चित्तस्य नीचमनुष्यापहारपरत्वाच्च॥ ॥इत्यतिदेशाः॥ ॥अथ पापिनामनुतापार्थं कर्मविपाक
उच्यते॥ यमः। पतितैः संप्रयुक्तश्च ब्रह्महा गुरुतल्पगः। एते पतंति सर्वेषु नरकेष्वनुपूर्वशः। महापातकसंयुक्ता युगं तिष्ठंत्य
धोमुखाः। रौरवे कूटसाक्षी च यश्च मिथ्याभिशंसकः। कुलग्राहे पक्षवादी स चाप्यत्र पतेन्नरः॥ कुलग्राहे कुलसंदेहे प्यएव॥ न्या
सापहर्त्ता कुमतिर्विषमोपश्च वृत्तिषु॥ तप्तकुंभे स्वसृगामी गोघ्नो राजभटाश्रये॥ राजभटा राजबलेनोपद्रावकाः। महाज्वाले दु
हितरं स्नुषां गत्वा च मातरं॥ अजाविकः शौकरिकस्तेनश्चक्रोधनो नरः। रंगोपजीवी पशुहा शाकुनी पक्षिपोषकः। वांता
श्युक्तो हेमाद्रौ विष्णुना देशांगोत्रकुलं विद्यामन्नार्थं यो निवेदयेत्॥ वैवस्वतेषु धर्मेषु वांताशी स प्रकीर्तितः। सर्वदावय
भिस्येवमभिमानरता नराः वांताशिनः परित्याज्याः श्राद्धदाने च लंपटाः। देहविक्रयिणो ये च केशविक्रयिणस्तथा॥ वेदानां पप॰ ७
दूषका ये च समयानां च दूषकाः॥ दूषका धर्मशास्त्राणां हेतुवादकुतूहलाः। एते विहंगमे घोरे पच्यंते पापकारिणः। सम

यानां दूषकाः संदूषयन्त्यवस्थाः पितार्थअतिक्रमकारिणः। सर्वविक्रयकर्त्तारो मित्राणां भेदकारकाः॥ निर्मर्यादाः क्रोधनाश्च कदर्पैश्वर्य
संयुताः॥ कोटरे विनिपात्यंते बंधुभक्ताश्च वाणिजाः। बंधुभक्ताः बंधुपीडकाः। विमुखे पतिते घोरे मर्यादां यश्च लंघति। शाखामृग
घ्नो गोघ्नश्च क्रिमिभक्ष्यं व्रजंति ते॥ विमुखः युद्धादिषु पराङ्मुखः पतिते युद्ध एवेति शेषः॥ एकाकामिष्टमश्नाति वंचयित्वा सुहृ
त्सुतान्॥ दारान्सत्यतिथींश्चैव तथा हं बंधिवांधवान्। उत्संत्वपि हरेद्वेष्टः पशुघाती च योहृप्या। लालके नरके घोरे दुर्गंधे
पात्यते नरः॥ मानकर्त्ता कुलालश्च स्वर्णकारश्चिकित्सकः॥ पतंति नरके घोरे कूटकर्त्ता विशेषतः॥ देवब्राह्मणविद्वेष्टा गुरूंय
श्चावमन्यते। अवाचाकुशिरः प्रपद्यंते रत्नं दूषयते च यः॥ मीर्समघंसुरालाक्षागंधान्वस्त्रं घृतं पयः॥ विक्रीणाति य एतानि
सतुष्यावहं व्रजेत् अगारदाही च दुष्टः पापकृदेव च॥ पतंति रुधिरे ईतु कृतघ्नाद्यांभिकानराः॥ शूद्रहत्यां तु यः कु
र्यात्तथा यो गुरुदूषकः। सीधुकृन्मधुकृद्दंडीकर्मकारो निराकृतिः॥ दंडी निषिद्धदंडग्राहा॥ कर्मकारः कर्मकाराधिष्ठाता॥
निराकृतिरस्वाध्यायः। अतितीक्ष्णाश्चंडवृत्तिरुपघातशठः॥ श्येनजीवी कालहिकः पुत्रेपाध्याय एव च। द्यूतसंव्यवहारी च
प्राणिहिंसारताश्च ये। वैतरण्यां निपात्यंते ये नरा बंधुघातकाः। अतितीक्ष्णाः अत्युग्राः॥ चंडवृत्तिः वधबंधादिवृत्तिः॥ उ

Indira Gandhi National Centre for the Arts

पघातपरः परोपहतिप्रवणः। शठो मायावी। कालहिकः कलही। पुत्रोपाध्यायः। पुत्र उपाध्यायो यस्य स तथा॥ असत्प्रतिग्र
हीतारस्तथैवायाज्ययाजिनः। नक्षत्रैर्जीवते यश्च सोंधकारं प्रपद्यते। अप्राप्तदमको यश्च ब्राह्मणो वृषलीपतिः॥ गोभ्यो द्रुह
ह्लिदमको मित्रध्रुक् सूचकस्तथा॥ असिपत्रवने घोरे पतंत्यौरभ्रिकानराः। अप्राप्तदमकोऽयोग्यदमक॥ गोभ्यो द्रुहह्लिदमकः
साहृन्निर्यसस्तथोक्तः॥ औरभ्रिका मेषाजाजीविनः। हृत्याप्रव्रजितो यश्च सेतुभेत्ता च सूचकः॥ आश्रमात्पतितो यश्च सो
ग्निज्वालं प्रपद्यते॥ कृत्याकरणनिकृतंते नरा अनृतवादिनः॥ एजा च श्रुतिलोपी च संदंशं नरकं व्रजेत्॥ मृगव्याधस्तमो
षो रंकूरकर्मा च वार्धुषिः। भसंते श्यामशबलैस्तीक्ष्णतुंडैश्च वायसैः॥ ब्रविक्रयिणो ये च ब्रह्म वा क्रियते च यैः। क्रय
विक्रयकर्त्ता च वार्धुषिः सोमविक्रयी॥ गुरूश्च येवमन्यंते वाक्करैस्तर्जयंति च॥ विकर्माणः पापरताः शौचाचारविवर्जि
ताः। अगोप्तारः कुलद्रव्याः परस्वानां च नाशकाः। कन्यानीदूषकाश्चैव समयानां च दूषकाः। क्रोधनाः पापशीलाश्च
लुब्धा ये कृत्यगामिनः। स्कंदंते च दिवास्वप्ने व्रतिनो ब्रह्मचारिणः सर्वे ते नरके घोरे पात्यंते पापकारिणः। अगोप्तारो वंनूप एम॰ ८
रह्मणीपानामिति शेषः। कुलद्रव्याः छलेनार्जितधनाः कृत्यगामिनः। शूद्रा रजात्सेवर्णिकाः। मनुः॥ बहून्वर्षगणान्घो

णान्नरकान्प्राप्य तत्क्षयात्॥ संसारं प्रतिपद्यंते महापातकिनस्त्विह॥ याज्ञवल्क्यः। मृगश्वशूकरोष्ट्राणां ब्रह्महा योनिमृच्छ
ति। खरपुल्कसवेनानां सुरापो नात्र संशयः। पुल्कसवेनौ चंडालविशेषौ। कृमिकीटपतंगत्वं स्वर्णहारी समाप्नुयात्। तृणा
गुल्मतात्वं च क्रमशो गुरुतल्पगः। स एव॥ ब्रह्महा क्षयरोगी स्यात्सुरापः श्यावदंतकः। हेमहारी तु कुनखी दुश्चर्मा गुरुतल्पगः।
यो येन संवसत्येषां स तल्लिंगोभिजायते॥ फलविशेषाग्रंथांतरतोवसेयाः॥ ॥अथ पर्षत्॥ ॥लघुपराशरः चत्वारो वा त्र
यो वापि वेदवंतोग्निहोत्रिणः। ब्राह्मणानां समर्था ये पर्षत्सा हि विधीयते॥ अनाहिताग्नयो ये न्ये वेदवेदांगपारगाः॥ पंच
त्रयो वा धर्मज्ञाः परिषत्सा प्रकीर्तिता॥ वेदव्रतेषु स्नातानामेकोपि परिषत्भवेत्॥ यमः। एको द्वौ वा त्रयो वापि यद्ब्रूयुर्धर्म
पाठकाः॥ स धर्म इति विज्ञेयो नेतरेषां सहस्रशः। मनुः॥ त्रैविद्यो हैतुकस्तर्की नैरुक्तो धर्मपाठकः॥ त्रयश्चाश्रमिणः पूर्वे प
र्षद्देषा दशावरा॥ हैतुको मीमांसकः॥ अंगिराः। एकविंशति संख्यातैर्मीमांसान्यायपारगैः। वेदांगकुशलैरेव पर्षत्त्वं तु
प्रकल्पयेत्॥ धर्मविवृत्तौ॥ पातकेषु शतं पर्षत्सहस्रं महदादिषु॥ उपपापेषु पंचाशत्स्वल्पे स्वल्पा तथा भवेत्॥ प
राशरः॥ अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः॥ प्रायश्चित्ती भवेत्पूतः किल्बिषं पर्षदं व्रजेत्॥ पर्षदुपस्था

Indira Gandhi National Centre for the Arts

प्रा॰प्रा॰ ९ नमाहांगिराः॥ सचैलं वाग्यतः स्नात्वा क्लिन्नवासाः समाहितः। क्षत्रियो वापि वैश्यो वा पर्षदं त्वुपतिष्ठति॥ अधिकारिमात्रोपल
क्षणमिदं। उपस्थाप ततः शीघ्रं भक्तिमान् धरणीं गतः॥ गात्रैश्च शिरसा चैव न च किंचिदुदाहरेत्॥ पराशरः॥ पापं विख्याप
येत्पापी दत्वा धेनुं तथा वृषं॥ इदमुपपातकविषयं महापापादिष्वधिकं कल्प्यमिति मिताक्षरायां॥ अल्पपापेष्वपि तत्रै
व॥ तस्मात् द्विजः प्राप्तपापः सकृत्प्राप्लुत्य वारिणि॥ विख्याप्य पापं वक्तृभ्यः किंचिद्दत्वा व्रतं चरेत्॥ किंचित् दत्वा पापं वि
ख्याप्य व्रतं चरेदित्यन्वयः॥ विष्णुः। पर्षदं व्रते वस्त्रदानं कृच्छ्रार्द्धे तैलकांचनं॥ पादहीने तु गामेकां कृच्छ्रे गोमिथुनं स्मृतं॥
अत्र सर्वे धर्मविवेकार इत्यादि प्रार्थना पर्षत्प्रदक्षिणा च वक्ष्यते पद्धतौ॥ देवलः। पापकृत्त्वकृतं पापं कृत्स्नमाख्याय
संसदि। तत्रस्थानेनयाचेत निष्कृतिं तस्य कर्मणः॥ अंगिराः। कृत्वा पापं न भुंजीत त्रिरात्रमहरेव वा। कुर्याच्च ब्राह्मणशु
श्रूषामा प्रदानात् व्रतस्य तु॥ एतच्च पर्षदुपस्थानं प्रकाशप्रायश्चित्त एव न रहस्ये॥ विख्यातदोषः कुर्वीत पर्षदोनुमतं
व्रतं॥ अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत् इति याज्ञवल्क्योक्तेः। प्रकाशेपि पर्षदसंभवे स्वयमेव कुर्यात्॥ मनुः॥ एम.
मतिपूर्वमनुद्दिश्य प्राणांतिकमिति स्थितिः मतिपूर्वमयं मरणार्थं पृच्छतीति ज्ञात्वा। अंगिराः। ततस्ते प्रणिपातेन ९

दृष्ट्वा तं समुपस्थितं। वृद्धाः पृच्छंति किं कार्यमुपविश्याग्रतः स्थितं॥ किं ते कार्यं वदास्माभिः किं वा मृगयसे द्विज॥ तत्वतो ब्रू
हि तत्सर्वं सत्यं हि गतिरात्मनः। अस्माकं चैव सर्वेषां सत्यमेव परं बलं॥ यदि चेद् दृश्यसे सत्यं नियतं प्राप्स्यते शुभं॥ यथागतो स
त्येन न त्वं शुध्यसि कर्हिचित्॥ एवं तैः समनुज्ञातः सर्वं ब्रूयादशेषतः॥ विश्वामित्रः। जातिशक्तिगुणापेक्षं सकृद्बुद्धिकृतं
तथा॥ अनुबंधादि विज्ञाय प्रायश्चित्तं प्रकल्पयेत्॥ उपदेशश्च पर्षदंतर्गतेन पर्षदनुमत्या केनचित्कर्तव्यः तथा
चांगिराः। आहूय श्रावयेदेकः पर्षदा यो नियोजितः॥ उपदेशश्च त्रिः कार्य इति मदनः॥ पितामहचरणाश्च। स एव। ब्राह्म
णो ब्राह्मणानां तु क्षत्रियाणां पुरोहितः। वैश्यानां याजकश्चैव प्रायश्चित्तं समादिशेत्। अगुरुः क्षत्रियाणां यो वैश्यानां चा
प्ययाजकः। प्रायश्चित्तं समादिश्य तत्र कृच्छ्रं व्रतं चरेत्॥ स एव। तथा भूद्दं समासाद्य सदा धर्मपुरःसरं॥ प्रायश्चित्तं
प्रदातव्यं जपहोमविवर्जितं। जपहोमौ चांगप्रधानरूपाविशेषात् पर्षदंतर्गतस्योपदेशकस्य प्रायश्चित्तमाह हा
रीतः॥ प्रायश्चित्तं तु निर्दिश्य कथं पापात्प्रमुच्यते॥ पवित्रं विजानीयाज्जपेद्वा वेदमातरं॥ अंगिराः। वचः पूर्वमुदा
हार्यं यथोक्तं धर्मकर्तृभिः। पश्चात्कार्यानुसारेण ज्ञात्वा कुर्युरनुग्रहं॥ वचः प्रायश्चित्तविधायकं॥ अनुग्रहः प्रा

Indira Gandhi National
Centre for the Arts

प्रा०मा० पश्चित्तन्यूनता। पराशरः। दुर्बले नुग्रहः कार्यः तथैव शिशुवृद्धयोः॥ अतोन्यथा भवेद्दोषस्तस्मान्नानुग्रहो भवेत्। देवलः। प्रायश्चि
१० त्तं यथोद्दिष्टं अशक्त्यात द्वशात्पुनः। इष्यते नुग्रहश्चापि पूज्यानुग्रहकारणात्॥ एको नार्हति तत्कर्तुं मनूचानोप्यनुग्रहं॥ धर्म
ज्ञा बहवो विप्राः कर्तुमर्हंत्यनुग्रहं॥ स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोपि वा। कुर्वंत्यनुग्रहं ये तु तत्पापं तेषु गच्छति। पूज्या
ग्रहस्य फलं। अनुग्रहो दया। अनुग्रहरूपन्यूनता॥ अनुग्रहरूपन्यूनतावधिमाह हारीतः। तस्मात्कृच्छ्रमथाप्य
र्धं पादं वापि विधानतः॥ ज्ञात्वा बलाबलं कार्यं प्रायश्चित्तं प्रकल्पयेत्। किंचिद्दशक्तौ कृच्छ्रं प्राजापत्यं। अधिकार्या पादं।
अधिकतरपापे अर्धमनुग्रहं कृत्वा प्रकल्पयेदित्यनुग्रहं कृत्वा इत्यध्याहारेण योज्यं॥ ॥अथेतिकर्तव्यता॥ विष्णुः। स
र्वपापेषु सर्वेषां व्रतानां विधिपूर्वकं॥ ग्रहणं संप्रवक्ष्यामि प्रायश्चित्ते चिकीर्षिते॥ दिनांते नखरोमादीन्प्रवाप्य स्ना
नमाचरेत् भस्मगोमयमृद्वारिपंचगव्यादिकल्पितैः॥ मलापकर्षणं कार्यं बाह्यशौचविशुद्धये॥ दंतधावनपूर्वेण
पंचगव्येन संयुतं॥ व्रतं निशामुखे ग्राह्यं बहिस्तारकदर्शने। आचम्यातः परं मौनी ध्यायन्दुष्कृतमात्मनः। मनः एम०
संतापनं तीव्रमुद्वहेच्छोकमंततः इति॥ ऐमश्मश्रु। आदिना केशग्रहणं॥ ब्रह्मशौचं पापनिर्बर्हणं॥ पंचगव्येनेति १०

भस्मादिसमस्तस्यैव पंचगव्यादेरनुवादात् भस्मादिस्नानापेक्षयापि दंतधावनस्य पूर्वत्वसिद्धिः। आचारोप्येवं॥ पितामह
हचरणाश्च। व्रतं होमावशिष्टपंचगव्यप्राशनमिति। महार्णवादौ। प्रायश्चित्तसंकल्प इति माधवशूलपाणी॥ घृतप्रा
शनमिति कल्पतरुः॥ न्युप्यकेशनखान्पूर्वं घृतं प्राश्य विशुध्यतीति शंखलिखितोक्तेः। पूर्वमित्यस्याग्रे न घ्रात्वा स्नात्वा वि
शुध्यतीति वा पाठः। तदा न घृतप्राशनं॥ बहिश्चेत्मात्। जाबालिः। आरंभे सर्वकृच्छ्राणां समाप्तौ च विशेषतः। आज्येनै
व हि शालाग्नौ जुहुयात् व्याहृतीः पृथक्। श्राद्धं कुर्याद्व्रतांते च गोहिरण्यादिदक्षिणा॥ स्त्रीणां होमो न दातव्यः पंच
गव्यं तथैव च॥ श्राद्धं वैष्णवं। विधाय वैष्णवं श्राद्धं साकल्यं निजकाम्यया धेनुं दद्यात् द्विजेभ्यो यद्दक्षिणां च स्वशक्ति
त इति। शातातपोक्तेः। व्रतांते प्रायश्चित्तांते गोहिरण्यादिदक्षिणा देयेति संबंधः। तत्र विष्णुदेवतया पित्रादिदेवताबाधः। सां
कल्पत्वाच्चार्घ्यावाहनाग्नौकरणावनेजनपिंडस्वधावाचनानां बाधः इत्युक्तमस्मत्कृते श्राद्धमयूखे॥ समाप्तौ चेति। श्राद्धक
र्मादि स्यत्राप्यन्वेति। शूलपाणिस्तु गोहिरण्यादिदक्षिणामिति पपाठ॥ तदा प्रायश्चित्तांत एव गोहिरण्यादिदक्षिणा कार्या ना
दावित्यर्थः। स्त्रीणां शालाग्निहोम एव न भवति तस्यैव प्रकृतत्वात्॥ लौकिकेग्नौ तु भवत्येव। स च विप्रद्वारेति केचित्। उ

Indira Gandhi National Centre for the Arts

पवासो व्रतं होमतीर्थस्नानजपादिकं॥ विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलमिति पराशरोक्तेः। तत्र। अस्याते षु जपहोमा
११ दिषु अशक्तौ विप्ररूपप्रतिनिधिनियममात्रार्थत्वात्॥ प्रायश्चित्तांगजपहोमयोः स्त्रीनिषेधाद्देवायाम्नेलत्र तस्या प्रवृत्तिः। पद्
पिवाएहे। अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्यत इति तस्यापि परिभाषाले पिप्रान्नयोरेव जपहोमयोः प्रवृत्तिः। एतेन यन्म
दनरत्नमहार्णवयोः स्त्रीविप्रादेर्विप्रद्वारा समंत्रकौ जपहोमौ भवत इति तत्परास्तं। पराशरः। स्त्रीशूद्रस्य तु शुध्यर्थं प्राजाप
त्यं समाचरेत्॥ पंचगव्यं च कुर्वीत स्नात्वा पीत्वा शुचिर्भवेत्॥ स्त्रीणां पंचगव्यस्य विहितप्रतिषिद्धत्वाद्विकल्पः। शूद्राणां तु नि
त्यं भवत्येव। शूद्रस्यापि विकल्प इति महार्णवे॥ तन्न॥ तस्य स्त्रीपदगर्भनिषेधाप्रवृत्तेः। यत्तु स्त्रीशूद्रास्तु सधर्माण इति तद्विरो
धाभावे स्त्रीशूद्रयोः समानधर्मत्वप्रतिपादनार्थं। अस्ति चात्र शूद्रे पंचगव्यस्य विशेषविधिः यत्तु पंचगव्यं पिबेत् शूद्रो ब्रा
ह्मणस्तु सुरां पिबेत्। उभौ तौ तुल्यकर्माणौ भूयात्ते नरके वसेत्। इति अत्रिवचनस्य गवापश्यात्रेन निषेधपरं। वपने वि एम०
शेषमाह। वसिष्ठः। कृच्छ्राणां व्रतरूपाणां श्मश्रुकेशादि वापयेत्॥ अद्विरोमशिखावर्जमिति॥ कामकृतशौपवनं ने ११
तिमदनपारिजाते॥ गोवधे तु पराशरः प्राजापत्यं चरेत् कृच्छ्रं गोघाती व्रतमुत्तमं॥ सशिखं वपनं कार्यं त्रिसंध्यमवगाहन

मिति॥ विशेषमाह संवर्तः। पादेंगरोमवपनं द्विपादे श्मश्रुणोपि च। त्रिपादे तु शिखावर्जं सशिखं तु निपातन इति। सधवानां
विशेषमाह॥ वसिष्ठः। केशानां नास्ति नारीणां वपनं व्रतयज्ञयोः। गोवधादिषु सर्वेषु छेदयेद्व्यंगुलद्वयं। सधवानां तु नारीणा
मलंकारणय सर्वदा। केशसंधारणं प्रोक्तं प्रायश्चित्ते द्विजोत्तमैरिति। अंगुलत्रयमिति क्वचित्पाठः। अत्र सधवापदाद्विध
वानां सर्ववपनं। अत्र विशेषमाह पराशरः। वपनं नैव नारीणां नानुव्रज्या जपादिकं॥ न गोष्ठे शयनं तासां न वसीरन् गवा
जिनं॥ सर्वान् केशान् समुध्धृत्य छेदयेदंगुलद्वयं॥ सर्वत्रैव हि नारीणां शिरसो मुंडनं स्मृतं॥ वासिष्ठे आदिपदं प्रायश्चि
त्तांतरपरं। तेन प्रयागादौ मुंडनं वोपवासश्च सर्वतीर्थेष्वयं विधिरिति देवलाद्युक्तेः॥ सर्वमुंडनमेव वेण्यां वेणीप्रदानेनेति
लिंगाद्याचाराच्च। तीर्थांतरेन भवतीत्यपरे तत्॥ अपरार्के उद्धृतुः प्राजापत्ये वा वपनं कारयेत्सुधीः। केशश्मश्रुलोमनखा
नुद्धृत्य संस्थानि वापयेत्। दक्षिणकर्णमारभ्य कर्मार्थं पापसंचये। शिखाघं नवतं स्कारे शिखाघं तं शिरो वपेत्॥ पापसं
चयेतन्निमित्ते प्रायश्चित्ते। तैत्तिरीयके॥ आसुरं वपनं निदिलादेर्वेक्रमंडकः। देवा अक्रमतउपपक्षावग्रे वपंत। अ
थ श्मश्रूण्यथ केशानिति॥ मानुषेपि तत्रैव। मनुं प्रक्रमं श्मश्रूण्यग्रे वपंत अथोपउपपक्षावथ केशानिति। अत्राधा

Indira Gandhi National
Centre for the Arts

नेष्टिसोमेषु दैवं। तत्र तत्सविधानात्। प्रायश्चित्ते तु दैवमानुषे विकल्पेन। तत्राप्युदकस्य तायेदक्षिणश्मश्रूपपक्षो
१२ वक्षावाप्यावितिः इदं च वपनं निषिद्धकालेपि कार्यं। क्षौरनिमित्तिककार्ये निषेधस्तत्पि ध्रुवं॥ पित्रादिमृतियात्रासु प्रा
यश्चित्ते च तीर्थके इति स्मृतेः॥ निषेधाश्च॥ वृद्धगार्ग्यः॥ रव्यारसौरिवारेषु रात्रौ पाते व्रते हनि। श्राद्धाहप्रतिपद्रिक्ता
भद्राः क्षौरेषु वर्जयेत्॥ भद्राः द्वितीयाद्याः। नक्षत्राणां तिथिसाहचर्यात्। व्यासः। नक्षत्रे तु न कुर्वीत यस्मिन्जातो भवेन्नरः।
न प्रोष्ठपदयोः कार्यं नैवाग्नेये तु भारत॥ दक्षिणेषु तु सर्वेषु विक्षताणं तु वर्जयेत्॥ बादरायणः। सिंहे धनुषि मीने च स्थि
ते सन्नतुरंगमे॥ यात्रोद्वाहस्त्रहारंभ क्षौरकार्याणि वर्जयेत्॥ व्यासः। विवाहमौंजीचूडासु वर्षमर्द्धं तदर्द्धकं॥ अंतर्वत्न्यां
च जायायां नेष्यते केशवापनमित्याद्यनेकनिषेधाः समयमयूखे उक्ताः॥ तथा जीवत्पितृकेणापि कार्यं। मुंडनं पिंड
दानं च प्रेतकर्म च सर्वशः॥ न जीवत्पितृकः कुर्याद्गुर्विणीपतिरेव चेति दत्तीयनिषेधस्य रागप्राप्तविषयत्वाद्विधि
स्पृष्टेन वकाशात्॥ वस्तुतस्त्विदं दद्रुस्मृतौ निबंधेष्वानुपलंभान्निर्मूलं श्रीदः। राज्ञा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रु स्म.
तः। केशानां वपनं कृत्वा प्रायश्चित्तं समाचरेत्॥ केशानां रक्षणार्थं तु द्विगुणं व्रतमाचरेत्॥ द्विगुणे व्रत आचीर्णे दक्षि १२

णा द्विगुणा भवेत्। यत्तु। विद्वद्विप्रनृपस्त्रीणां नेष्यते केशवापनं॥ ऋते महापातकिनो गोहंतुश्चावकीर्णिन इति। तत्र वि
ज्ञानेश्वरः। महापातकादिव्यतिरिक्तेपराधे नां वपनं नास्त्येव॥ महापातकादौ तु तेषां वपनानिच्छायां द्विगुणं दक्षिणास
हितं व्रतं द्वैगुण्यमिति। अन्ये तु महापातकादौ नित्यं राजादेरपि वपनमेवान्यत्र तु वपनानिच्छायां व्रतद्वैगुण्यविधिरित्या
हुः। इदं च वपनाद्येतिकर्तव्यता प्राजापत्यप्रभृतिष्वेव भवति न तत्तोल्पेषु॥ तथा च पैठीनसिः। द्वादशाहे संस्पृष्टे विपन
मिति॥ वपनग्रहणं चेतिकर्तव्यतांतरस्याप्युपलक्षणं॥ तथा च याज्ञवल्क्यः। कुर्यात्त्रिषवणस्नायी कृच्छ्रं चांद्रायणं तथा॥
पवित्राणि जपेत्पिंडान् गायत्र्या चाभिमंत्रयेदिति। निवर्तमानवपनसाहचर्यात्पंचगव्यादेरपि निवृत्तिः॥ अतएव न्यूने पादव्र
ते वस्त्रमिति विद्वेष्णवे वस्त्रादिमात्रदानोक्तेरपीदमवगम्यते॥ ॥अथ पूर्वोक्तभस्मादिस्नानप्रयोगः॥ ॥लैंगे॥ ईशानेन
शिरो देशं मुखं तत्पुरुषेण तु॥ हृद्देशमघोरेण गुह्यं वामेन सुव्रत॥ सद्येन पादौ सर्वांगं प्रणवेन तु शोधयेत्॥ अत्रे
शानादिपदेनेशानः सर्वविद्यानामित्यादयो मंत्रा उच्यंते। चतुर्थ्यंतानि नमोंतानीशानादिपदान्येव मंत्रा इत्यन्ये॥ अ
ग्निरितिभस्म। जलमितिभस्म। स्थलमितिभस्म व्योमेतिभस्म सर्वं ह वा इदं भस्मेतिपंचमंत्रा ईशानादिमंत्रवन्मंत्रा इ

Indira Gandhi National
Centre for the Arts

त्यन्ये॥ अग्निरितिभस्म। जलमितिभस्म। स्थलमितिभस्म व्योमेतिभस्म सर्वं ह वा इदं भस्मेति यं च मंत्रा ईशानादिमंत्रस्था
१२ न इत्यपरे॥ विष्णुः। अग्रमग्रमितिस्नात्वा मानस्तोके नवा पुनः। गोमयैर्लेपयेत्प्राज्ञः शोदकैर्मानुदर्शितैः। योगी त्रिधा
कृत्वा मर्दंतां तु गोमयं च विशेषतः। अधमोत्तममध्यानां अंगानां क्षालनं च तैः। कौर्मे॥ गोमयस्य प्रमाणं तु येनांगं लेप
येन्न तइति॥ ॥ अथ मृत्तिकास्नानं। जमदग्निः॥ अश्वक्रांते इति वै शुद्धां मृत्तिकामाहरेच्छुचिः॥ नमो मित्रस्येत्यादित्या
य दर्शयेत्सदौकरौ। गंधद्वारामिति जप्त्वा स्वामंगान्यनुलेपयेत्॥ शिवपुराणे अश्वक्रांत इतिस्नात्वा मंत्रेण मंत्र
मृत्तिकां॥ उद्धरेदुद्धृतासीति मंत्रेण सुसमाहितः। नमो मित्रस्येति ऋचा दर्शयित्वा च भानवे। आहत्येति व गात्राणि
समालभ्य द्विराचमेत्। अनुलेपने मंत्रांतरमाह योगी॥ आलभेत मृदांगानि इदं विष्णुरिति स्मृचा। मृत्परिमाणं
कौर्मे। मृत्तिका च समुद्दिष्टा त्वार्द्रामलकमात्रिकेति॥ क्रम उक्तो नारदेन॥ आयुष्कामः शिरोलेपं मृदा कुर्यात्
द्विजः पुरा॥ श्रीकामः पादयोः शौचं मृदा पूर्वं समाचरेत्। पारस्करः। एकपात्तु शिरः स्नात्वा द्वाभ्यां नाभेस्तथोपरि मृ एम.
द्भिस्तिसृभिः कार्यं षड्भिः पापुनपैवच॥ कटिवत्सूरुजंघाश्च पादौ च तिसृभिस्ततः। तथा हस्तौ परिस्नात्वा द्विराचामे १२

त्समाहितः। योगी। मृद्भिरद्भिः अंगानि क्रमशस्त्ववने जपेत्। शीर्षाद्यानाभि सर्वाणि स्मरन्विष्णुमनामयं। क
टिवत्सूरुजंघे च चरणौ चात्र ...भिः। तथैव हस्तावाचम्य नमस्कृत्य जलं ततः। यत्किंचेदमिति मंत्रेण नमस्ये
त्प्रयतांजलिः। अत्र विहस्तानां मृत्संख्यादीनां व्यवस्था शाखाव्यवस्थेति हेमाद्रि॥ ॥ इति मृत्स्नानविधिः॥ ॥ अनंतरं चतुर्थं
वारिस्नानमुक्तं॥ तत्र मंत्रो ब्रह्मांडपुराणे॥ आपो अस्मानिति स्पृष्ट्वा भास्कराभिमुखः स्थितः। इदं विष्णुर्जपित्वा व प्रतिस्रो
तो मज्जति महार्णवे तु वैकल्पिकौ द्वौ मंत्रावुक्तौ इउदमंत्रामात्स्ये॥ सावित्र्यार मापः प्रवहते निस्सकृ। आपो हिष्ठेति त
चोवेति तत्र मूलं मृग्यं। अनंतरं पंचगव्यस्नानान्युक्तानि। तत्र तद्ग्रहणाय गोमूत्रं गंधद्वारेति वै शकृत्। आप्यायस्वेति च क्षीरं
दधिक्राव्णेति वै दधि। तेजोसीति घृतं तद्वद्देवस्य त्वेति चोदकं कुशमिश्रं जपेद्विद्वान्पंचगव्यं भवेन्न तदिति। पाराशर्ये तु
तेजोसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकं॥ पंचगव्यमृचा पूतं स्थापयेदग्निसंनिधाविति द्वितीयः श्लोक उक्तः। देवस्य
त्वेत्यनंतरमभिषिंचामीति वाक्यशेषपूरणीय इति निबंधकृतः॥ यद्यपि मात्स्ये देवप्रतिष्ठायां देवस्नानार्थं पंचगव्यग्र
हणे एते मंत्रा उक्ताः। पराशरेण च ब्रह्मकूर्चप्रकरणे तथाप्युभयत्रापि कुशोदकसहितानां पक्ष्मां गोमूत्रादीनां पंचगव्यं

Indira Gandhi National
Centre for the Arts

नवेन्नत इति। पंचगव्यमचाहृतमिति च पंचगव्यमिति परिभाषेति गम्यते॥ तस्याश्च प्रकरणेन नियमाभावाद्यत्र पंचगव्यविनि
१४ नियोगस्तत्रैतदेव मंत्राद्यवगंतव्यं॥ अन्यथा गव्यमिति तद्धितस्य गव्यशृंगतक्रादिसाधारण्येन तेन। पिस्नानं नस्यात्। केचि
त्तुमलापकर्षणं कार्यं बाह्यशौचोपसिद्ध्य इति बाह्यशारीरमलशोधनमात्रार्थत्वादमंत्रकाण्येव तानीत्याहुः। जमद
ग्निः॥ हिरण्यशृंगं वरुणमित्यापोभिप्रपद्यते। सुमित्रा इत्यपः स्पृष्ट्वा दुर्मित्रास्तु बहिः क्षिपेत्। पदं पाकूरमित्यप क्षि
पणो अनुपाणिना॥ प्रायश्चित्ताचरणपर्यंतं धर्मानाह शंखः। प्रायश्चित्तमुपासीनो वाग्यतस्त्रिरुपस्पृशेत्तु एकवासार्द्रवा
सा वा लघ्वाशी स्थंडिलेशयः॥ स्थानवीरासनी मौनी मौंजी दंडकमंडलुः॥ भैक्षचर्याग्निकार्यं च कूष्मांडैर्जुहुयाद्धृतं॥
उपस्पर्शस्नानमित्यपरार्के॥ दिवा स्थितो रात्रौ चोपवेशनं वीरासनमिति विज्ञानेश्वरः। कुशाद्यनाश्रयेणाहोरात्र
मुपवेशनमेवेति शूलपाणिः। कूष्मांडैर्यद्देवा देवहेडनमित्याद्यैः। मनुः। स्थानासनाभ्यां विहरेदशक्तोधः शयी
त वा॥ वसिष्ठः। महाव्याहृतिभिर्होमैः सावित्र्या वा चहं स्वयं॥ कर्तव्यः पावनः सम्यक्सर्पिषा च तिलैस्तथा॥ इष्या एम०
णं व्याहृतिगायत्र्योश्च विकल्प इत्यपरार्के। तत्रैव पुराणे। आपो हि ष्ठेति सूक्तं तु शुद्धवत्योघमर्षणं॥ शांवत्यः स्वस्ति १४

मत्यश्च पावमान्योघमर्षणं॥ सर्वत्रैव प्रयुंजीत कृच्छ्रादिव्रतमाचरन्॥ वैशंपायनः॥ ऋषभं विरजं चैव शुद्धवत्योघमर्ष
णं॥ गायत्रीं वा जपेद्देवीं पवित्रां वेदमातरं॥ शतमष्टशतं वापि सहस्रमथवापरं॥ स एव। स्नातोपतिष्ठेदादित्यं सौरीभिः
कृतांजलिः॥ गौतमः। रौरवयौधाजपेन नित्यं प्रयुंजीत रौरवयौधाजपे सामनी॥ षड्विंशन्मते॥ जपहोमादि यत्किंचित्कृ
च्छ्रोक्तं संभवेन्न चेत्॥ सर्वं व्याहृतिभिः कुर्यात् गायत्र्या प्रणवेन वा॥ हारीतः। सूर्याय देवताभ्यो वै निवेद्य व्रतमाचरेत्। इति।
निवेदनमग्ने व्रतपते व्रतमित्यादिमंत्रेणेत्यपरार्के॥ पराशरः। प्रायश्चित्तेषु सर्वेषु कुर्याद्ब्राह्मणभोजनं॥ शक्त्या वि
त्तानुसारेण प्रायश्चित्तानुरूपतः॥ आसहस्राद्दशशताद्वा दशांतमथवा जपेत्॥ ओंकाराद्यं तथान्यद्वा गायत्रीमथवा
पुतं। अशक्तौ प्रायश्चित्तमन्यद्वारापि कार्यमिति प्रायश्चित्तविवेके ब्राह्मे। रोगी वृद्धस्तु पौगंडः कुर्यादन्यैर्व्रतं सदेति कु
र्यात्कारयेत्॥ पराशरः। आधिव्यसनिनि श्रांते दुर्भिक्षे डामरे तथा॥ उपवासो व्रतं होमो द्विजसंपादिता नि वै॥ शुद्धि
करणीति शेषः। डामरं परचक्रादि। व्रतांते कर्तव्यतामाह॥ पराशरः। पंचगव्यं पिबेत्शूद्रो ब्रह्मकूर्चं पिबेत् द्विजः
॥ एकद्वित्रिचतुर्गा वा दद्याद्विप्राद्यनुक्रमात्। ब्रह्मकूर्चप्रकारो वक्ष्यते॥ शिष्टास्तु सर्वमेव ब्रह्मकूर्चं कुर्वंति। यः

Indira Gandhi National
Centre for the Arts

मः॥ प्रायश्चित्ते व्यवसिते कर्त्ता पदि विपद्यते। शुद्धस्तदहरेवासाविहलोके परत्र चेति॥ अंगिरा अपि॥ यो यदर्थं चरेद्धर्मम
१५ प्राप्य म्रियते व्रतं॥ स तत्पुण्यफलं प्रेत्य प्राप्नुयादित्यनुरब्रवीत्॥ छागलेयः॥ पूर्वं व्रतं गृहीत्वा तु नाचरेत्काममोहितः। जी
वन्भवति चांडालो मृतः श्वा चाभिजायते॥ वायवीये॥ लोभान्मोहात्प्रमादाद्वा व्रतभंगो भवेद्यदि॥ उपवासत्रयं कुर्यात्कु
र्याद्वा केशमुंडनं॥ प्रायश्चित्तमिदं कृत्वा पुनरेव व्रती भवेत्॥ वाशिष्ठः समुच्चये॥ अथ साधारणप्रयोगः॥ तत्र प्रायश्चि
त्तं तावत्स्त्रीरोगिवृद्धबालादिष्वर्द्धं। पंचवर्षात्पूर्वं बालः। षोडशवर्षाधिकब्रह्मचारिणि द्विगुणं यतौ च चतुर्गुणं। क्षत्र वि
ट्शूद्राणां पादपादहानिः। ब्रह्मवधे तु चतुर्विधसाहसे च तेषां द्वित्रिचतुर्गुणं॥ सर्वपापेष्वनुग्राहप्रयोजकानुमंत्रि
णां पादपादहानिः॥ निमित्तिनः पादः। अनुलोमानां मातृतुल्यं प्रतिलोमानां शूद्रतुल्यं॥ स्त्रीशूद्रयोरंगप्रधानजप
होममंत्ररहितं प्रत्याम्नायाश्च। प्राजापत्ये धेनुरेका देया तन्मूल्यं वा तच्चत्वारिं॰ शन्माषा स्वर्द्धं तदर्धं वा हेमरूप्यं
वैतावत्॥ पंचपुराणं त्रिपुराणं वा रूप्यं द्वात्रिंशद्गुंजः पुराणः। द्वादशविप्रभोजनं॥ अयुतगायत्रीजपः॥ गायत्र्या प्रा.
सहस्रतिलाहुतयः। संहितापारायणं। षडंगतीर्थसंबंधियोजनगमनं॥ मुख्यकेशसद्वादशस्नानानि॥ प्राणाया १५

मशतद्वयं पावकेष्टिः। पावमानी चेति॥ एकस्मिंश्चांद्रायणे प्राजापत्यप्रत्याम्नायास्त्रिगुणाः॥ अतिकृच्छ्रे द्विगुणाः॥ त्रिं
शत्प्राजापत्यसमष्टमित्यादि। प्रायश्चित्ती सदाचारहीनकायां तिथौ दिनांते परह्णेपि वा दोषेश्चतुरः पंच सप्त दश वा
विप्रान्नाहिताग्नीन्स्नाना एकमेव वाध्यात्मविदं पर्षत्वेनोपवेश्य तेभ्यो गोवृषौ तन्निष्क्रयं वा दत्वा साष्टांगं भूमौ प्रणिप
त्य प्रदक्षिणीकृत्य सर्वधर्मविवेक्तारो गोप्तारः सकला द्विजाः। मम देहस्य संशुद्धिं कुर्वंतु द्विजसत्तमाः। मया कृतं म
हाघोरं ज्ञातमज्ञातकिल्बिषं॥ प्रसादः क्रियतां मह्यं शुभानुज्ञां प्रयच्छथ॥ पूज्यैः कृतः पवित्रोहं भवेयं द्विजसत्तमैरि
ति। मंत्राभ्यां प्रार्थयेत्तानाचारत्॥ ततः सभ्या लघु शक्तिं विचार्य संमत्या ततत्प्रायश्चित्तविधिवाक्यमुक्त्वा॥ शक्तः स्त्रीवालवृ
द्धरोग्यादिष्वनुग्रहं कृत्वा सभ्यान्सानुवादकविप्रद्वारा अमुककर्मजन्यपापनाशार्थमिदं प्रायश्चित्तमशक्तो मुकप्रत्याम्ना
येन त्वया कार्यं तेन कमानसिकसांसर्गिकउपपातककृतिपातकस्य स्पृष्टास्पृष्टभुक्ताभुक्तपीतापीतसंवूलपातकाल
घुपातकसंकरीकरणमलिनीकरणापात्रीकरणजातिभ्रंशकरप्रकीर्णकपापानां मध्ये संभावितानां नाशार्थं
षडष्टमशक्तो त्र्यष्टं साधार्द्धं वा प्रायश्चित्तं त्वं कुर्विति अयं चोपदेशो व्रतकर्त्रा पुस्तकदर्शने सभ्ये सदुदेशेनगो

Indira Gandhi National
Centre for the Arts

दानेचकृतेवारत्रयंकार्यइतिसंप्रदायः।ततःकर्त्तामासपक्षादिस्मृत्वाममजन्मप्रभृत्यद्ययावदित्यादिप्रायश्चित्त
१६ मित्यंतंपूर्वोक्तमुक्त्वाअहंकरिष्यइतिसंकल्प्ययानिकानिचपापानिब्रह्महत्यासमानिच॥केशानाश्रित्यति
ष्ठंतितस्मात्केशान्वपाम्यहमितिमंत्रमुक्त्वाकक्षोपस्थशिखावर्ज्जंक्रमेणश्मश्रूपपक्ष्मकेशानुदक्संस्थान्वापये
त्॥पतिविधवादीनांसशिखंवपनंब्रह्महत्यादिष्वपिसशिखंसर्वांगलोम्नांच॥सधवानांद्व्यंगुलंकेशाग्रछेदनं॥
एजतस्पुत्रबहुश्रुतविप्राणामिछयावपनाभावः।तदाचद्विगुणव्रतं।दक्षिणाचद्विगुणा।इत्थंवापयित्वायुर्बल
मित्यादिनाचदंतधावनंकृत्वादशस्नानानिकुर्यात्।तत्रभस्मनास्नानं॥ईशानःसर्वविद्यानामितिशिरसि॥तत्पुरु
षायेतिमुखे।अघोरेभ्योथघोरेभ्यइतिहृदि।वामदेवायेतिगुह्ये॥सद्योजातीयनमः पादयोः।प्रणवेनसर्वांगे।अ
तमितिपादयोः।प्रणवेनसर्वांगेयद्वाॐईशानायनमःशिरसि।तत्पुरुषायनमोमुखे।अघोरायनमोहृदि।वाम
देवायनमोगुह्ये।सद्योजातायनमःपादयोः।प्रणवेनसर्वांगे।अग्निरितिभस्म।जलमितिभस्म।स्थलमितिभस्मव्यो म
मेतिभस्मसर्वंहवाइदंभस्मेतिमंत्रैःक्रमाच्छिरआदिषु॥ततोगोमयमादायत्रिधाकृत्वासूर्यायप्रदर्श्यअग्रमग्रं १६

चरंतीनामोषधीनांवनेवने॥तासामृषभपत्नीनांपवित्रंकायशोधनं।तन्मेरोगांश्चशोकांश्चनुदगोमयसर्वदेतिमंत्रेणैके
नभागेननाभेरधःपरेणनाभेरूर्ध्वमाकंठमन्येनचशिरःस्वालपेत्।मानस्तोकेतिवामंत्रः।ततोश्वक्रांतेरथक्रांतेविष्णु
क्रांतेवसुंधरे॥मृत्तिकेहरमेपापंयन्मयादुष्कृतंकृतमितिमृत्तिकामभिमंत्र्य॥उद्धृतासिवराहेणकृष्णेनशतबाहुना॥
मृत्तिकेब्रह्मदत्तासिकाश्यपेनाभिमंत्रिता॥मृत्तिकेहरतत्सर्वंयन्मयादुष्कृतंकृतं॥मृत्तिकेदेहिमेपुष्टिंत्वयिसर्वंप्रतिष्ठितं
त्वयाहतेनपापेनजीवामिशरदःशतमिति।ब्रह्मांडीयमंत्रेणखनित्वानमोमित्रस्येतिसूर्यंप्रदर्श्यत्रिधाकृत्वैकस्माद्भागा
त्षट्चतस्रोवामदःपादयोःजंघोरुकटिबस्तिषुप्रत्येकंचतस्रःगुह्येषट्।उदरकुक्षिपृष्ठवक्षोहस्तकंठेषुद्वेद्वे॥शिरस्ये
का।मृत्परिमाणमामलकमात्रं।ततआपोअस्मान्मातरःइदंविष्णुरित्येताभ्यांदेवस्यत्वेत्यनेनवास्नात्वागायत्र्यागोमू
त्रेणगंधद्वारेतिगोमयेनआप्यायस्वेतिदुग्धेनदधिक्राव्णइतिदध्नातेजोसिशुक्रमस्यमृतमसिधामनामासिप्रियंदेवाना
मनाधृष्टंदेवयजनमित्याज्येन॥देवस्यत्वेतिचकुशोदकेनस्नायात् यद्देवानिदशापिस्नानान्यमंत्रकाण्येवकार्या
णि।ततोहिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचितः।यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः।यन्मयामनसा

Indira Gandhi National Centre for the Arts

वाचाकर्मणावादुष्कृतंकृतं तत्रइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनरित्येताभ्यांतीर्थंप्रार्थ्यॐनमोनाराय
१७ णायेत्यष्टाक्षरेणतीर्थंप्रकल्प्यॐभूर्भुवःस्वरितित्रिरंचम्पसकृन्निमज्ज्ययाःप्रवतइत्येतयाव्याहृतिभिर्गायत्र्याजल
मभिमंत्र्यापामार्गदूर्वाकुशैःकांडात्कांडादितिद्वाभ्यांपातेशतेनचेतिद्वाभ्यांप्रणवव्याहृतिगायत्र्यापोहिष्ठाभिर्मा
र्जयित्वांतर्जलेकृतंचेतितृचंजपित्वात्रिर्निमज्ज्यदेवर्षिपितृन्संतर्प्यशुष्कंवासोधृत्वाअधिकेर्द्विप्रैरेवाहृत्याग्नौक
रणस्वधावाचनरहितंपार्वणविधिनाश्राद्धंकुर्यात्।तत्रसर्वेष्वपिविप्रेषुविष्णोरेवाहूजा॥ततएकांगांहिरण्यंचद
त्वाव्याहृतिभिः।शालाग्नौअष्टाविंशत्यादिसंख्ययाज्यंक्रमादग्निवायुसूर्यप्रजापतिदेवत्यंकृत्वाब्रह्मकूर्चहोम
मपिकुर्याद्द्वाचारणत्॥तत्रताम्रेपालाशेपात्रेवापात्रेरक्तायाःकृष्णायावागोमूत्रंपलमितमष्टमाषमितंवागायत्र्या
दापश्वेतायाःगुष्ठार्द्धमितंषोडशमाषमितंवागोमयंगंधद्वारामितितासाया हेमवर्णायावापयःसप्तपलंद्वादशमा
षमितंतगोमयादष्टगुणंगोमूत्रत्रिगुणंवाप्यायस्वेतिरक्तायाःकृष्णायाःवादधित्रिपलंदशमाषमितंगोमयात्यंचगु एम.
णमष्टगुणंगोमूत्रात्द्विगुणंवादधिक्राव्णाइतिकपिलायानीलायावाघृतमेकपलमष्टमाषमितंगोमयाच्चतु १७

र्गुणंवातेजोसिशुक्रमितिकुशोदकंचपलमितंचतुर्माषमितंवादेवस्यत्वेतिगृह्णीयात्।गोमूत्रादिकापिलंवाशास्त्यं॥
अलाभेगव्यमात्रं॥एतन्मंत्रांतेगृह्णामीतिवाक्यशेषः।ततआपोहिष्ठेतिहस्तेनालोड्यमानस्तोकइतियज्ञियकाष्ठेननि
र्मथ्यसप्तावरैःकुशैस्त्रिभिःपलाशपत्रैर्वाजुहुयात्।मंत्रास्तु॥ॐइरावतीधेनुमतीहिभूतंपृथिव्याइदंनममेतित्या
गः।इदंविष्णुः।विष्णवइदं।मानस्तोकेरुद्राय॥शंनोदेवीअद्भ्यः अग्नयेस्वाहासोमायस्वाहा।इंद्रवतेस्वाहा।गायत्र्या
सवित्रे।प्रजापतेनत्वदेतान्यन्योप्रजापतयइदं।ॐस्वाहाप्रजापतयइदं अपंचब्रह्मकूर्चहोमांतेप्रणवानूततःस्विष्ट
कृदादिहोमशेषंसमाप्यतारकोदयेहोमावशिष्टंपंचगव्यंप्रणवेनालोड्यप्रणवेननिर्मथ्यप्रणवेनपीत्वासम्यीपरिष्टं
संकल्पितंप्रायश्चित्तंसाक्षाद्यथासंभवप्रत्याम्नायेनवाकृत्वापूर्ववद्व्याहृतिभिराज्यहोमंब्रह्मकूर्चहोमंविष्णुश्रा
द्धंचकृत्वागोहिरण्यादिदक्षिणांचदत्वाशिरस्नात्वाणाभारमानीयगोभ्योदत्वानाभिर्भक्षितेशुध्येत्॥ ॥इतिश्रीमी
मांसकशंकरभट्टात्मजभट्टनीलकंठकृतेभास्करेप्रायश्चित्तमयूखेसाधारणःप्रायश्चित्तप्रयोगः॥ ॥अथकृ
च्छ्रादिस्वरूपं।याज्ञवल्क्यः।एकभक्तेननक्तेनतथैवायाचितेनच॥उपवासेनचैकेनलघुकृच्छ्रउदाहृतः।यथा

Indira Gandhi National
Centre for the Arts

कथंचित्त्रिगुणः प्राजापत्यः स उच्यते॥ एष एवातिकृच्छ्रः स्यात्पाणिपूरान्नभोजन इति। लघुकृच्छ्रस्यैव शिशुकृच्छ्र इति नामां
१८ तरं॥ यथा कथंचित्। अनुलोमः प्रतिलोमो दंडकलितवदाहतः स्वस्थानविहितो वा॥ एतांश्चतुरोपि पद्यान्सन्यंतर
सिद्धान्यथा कथंचित्पदेनैव संजग्राह योगी। ग्राससंख्यामाहापस्तंबः॥ सायं द्वाविंशतिर्ग्रासाः प्रातः षड्विंशतिः स्मृताः।
चतुर्विंशतिरयाच्याः परं निरशनं स्मृतं॥ कुक्कुटांडप्रमाणाः स्युर्यथा वास्यं विशेत्सुखं॥ पाराशर्ये तु। सायं तु द्वादश
ग्रासाः प्रातः पंचदश स्मृता इति पूर्वार्धं चतुर्विंशतिमते तु॥ प्रातस्तु द्वादशग्रासाः सायं पंचदशैव तु॥ अयाचिते तु
द्वादशैव परं वै स्यादनशनं इति। ग्रासानां च संख्यानां शक्त्या विकल्पः। अतिकृच्छ्रे उपवासभिन्ननवदिनभोजने पु
णिपूरान्नविधिः। पाणिपूरमेकग्रासमितं॥ एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत्॥ त्र्यहं चोपवसेदंत्य
मतिकृच्छ्रं चरन्द्विज इति मनूक्तेः। सांगं प्राजापत्यमाह गौतमः। हविष्यान्प्रातराशान्भुक्त्वा तिस्रो रात्रीर्ना
श्नीयात्। अथापरं त्र्यहं नक्तं भुंजीत। अथापरं त्र्यहं न कंचन याचेत। अथापरं त्र्यहमुपवसेत्तिष्ठेदहनि रात्रावासीत एम.
क्षिप्रकामः। सत्यं वदेदनार्यैर्न संभाषेत रौरवयौधाजये नित्यं प्रयुंजीतानुसवनमुदकोपस्पर्शनमापो हि ष्ठेति १८

तिसृभिः। पवित्रवतीभिर्मार्जयीत हिरण्यवर्णाः शुचयः पावका इत्यष्टाभिरथोदकतर्पणं नमो हमाय नमो हमाय मंह
माय धुन्वते तापसाय पुनर्वसवे नमो मौंजायौर्म्याय वसुविंदाय वसुविदे सर्वविदाय नमः परावसुविदे सर्वविदाय नमः।
परायसुपराय पारदाय पारयिष्णवे नमो रुद्राय पशुपतये महते देवाय त्र्यंबकायैकचरायाधिपतये हरये शर्वाये
शानायोग्राय वज्रिणे घृणिने कपर्दिने नमः। सूर्यायादित्याय नमो नीलग्रीवाय शितिकंठाय नमः कृष्णाय पि
गलाय नमो ज्येष्ठाय श्रेष्ठाय वृद्धायेंद्राय हरिकेशायोर्ध्वरेतसे नमः। सत्याय पावकाय पावकवर्णाय कामाय काम
रूपिणे नमो दीप्ताय दीप्तरूपिणे नमः। सौम्याय पुरुषाय महापुरुषाय मध्यमपुरुषाय ब्रह्मचारिणे नमश्चंद्रलला
टाय कृत्तिवाससे नम इति। एतदेवादित्योपस्थानम्। एता एवाज्याहुतयो द्वादशरात्रस्यांते चरुं श्रपयित्वैताभ्यो जुहु
यादग्नये स्वाहा सोमाय स्वाहाग्नीषोमाभ्यामिंद्राग्निभ्यामिंद्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे प्रजापतयेग्नये स्विष्टकृत इत्यंते ब्राह्मण
भोजनमेतेनातिकृच्छ्रो व्याख्यात इति॥ नमो हमायेत्यादयस्त्रयोदश मंत्रा नमः शर्वा नमोंताश्चेति हरदत्तः। कौथुमब्राह्मणे
तु तथैव पाठः॥ ॥अथ कृच्छ्रातिकृच्छ्रः। याज्ञवल्क्यः। कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिमिति। पयो जलं॥ चरेत्कृ

Indira Gandhi National
Centre for the Arts

च्छ्राति कृच्छ्रं तु पिबेत्तोयं तु शीतलमिति ब्रह्मांडपुराणात्। अथ पराकः। स एव। द्वादशाहोपवासे तु पराकः परिकीर्त्तित इति। मा
१९ सोपवासकृच्छ्रमाह जाबालः॥ अनश्नन्मासमेकं तु महापातकनाशनमिति॥ पावककृच्छ्रमाह शंखः। गोपुरीषात्तयवान
श्नन्मासमेकं समाहितः। व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये॥ तप्तकृच्छ्रमाह मनुः। तप्तकृच्छ्रं चरन्विप्रो जलक्षीरघृतानि
लान्। प्रतित्र्यहं पिबेदुष्णान्सकृत्स्नायी समाहितः। पराशरः। षट्पलं तु पिबेदंभस्त्रिपलं तु पयः पिबेत्। पलमेकं पिबेत्सर्पि
स्त प्तकृच्छ्रो विधीयते। तप्तकृच्छ्रमुक्त्वा शंखलिखितौ। एष एव शीतैः शीतकृच्छ्र इति। ब्रह्मकूर्चमाह जाबालः। अहोरात्रो
षि [illegible] पो [illegible] मास्यं विशेषतः॥ पंचगव्यं पिबेत्प्रातर्ब्रह्मकूर्चविधिः स्मृतः। प्रजापतिः। पालाशं पद्मपत्रं वा ताम्रं वा
य [illegible] तोयं॥ गृहीत्वा स्नात्वा पीत्वा च तथा कर्म समाचरेत्॥ पराशरः। गोमूत्रं कृष्णवर्णायाः श्वेतायाश्चैव गोमयं॥ पयश्च
ताम्रवर्णाया रक्ताया गृह्यते दधि॥ कपिलाया घृतं ग्राह्यं सर्वं कापिलमेव वेति स एवा मूत्रमेकपलं दद्यादंगुष्ठार्धं तु गोम
यं॥ क्षीरं सप्तपलं दद्याद्दधि त्रिपलमुच्यते घृतमेकपलं दद्यात्पलमेकं कुशोदकं॥ गवां वर्णान्तरस्य पंचगव्यपरिमाण एम०
स्य च बोधकवाक्यानि ग्रंथांतरे द्रष्टव्यानि। तदर्थस्तु प्रयोगे ऽस्माभिः संगृहीतः। पराशरः। आपो हि ष्ठेति चालोड्य मान १९

स्तोके ति मंत्रयेत्। स एव। सप्तावरास्तु ये दर्भा अच्छिन्नाग्राः शुकत्विषः। तैरुद्धृत्य च होतव्यं पंचगव्यं तथाविधीति। प्रजापतिस्तु स्था
पयित्वाथ दर्भेषु पालाशैः पत्रकैरथ॥ तस्मादुद्धृत्य होतव्यं देवताभ्यो यथाक्रमं॥ पराशरः॥ इरावती इदं विष्णुर्मानस्तोके च
शंवती। एताभिश्चैव होतव्यं हुतशेषं पिबेत् द्विजः। प्रजापतिः। अग्नये चैव सोमाय सावित्र्या च तथैव च॥ प्रणवेन तथा हु
त्वा स्विष्टकृच्च तथैव च॥ मरीचिः। अग्नये स्वाहा। सोमाय स्वाहा। इरावती इदं विष्णुः। मानस्तोके। गायत्र्या॥ प्रजापते न त्वदेता
नीत्याज्याहुतीरग्नौ जुहुयात्। पराशरः। आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु॥ मरीचिः। पालाशेन च पत्रेण बिल्वपत्रेण
वा पिबेत्। तृतीयं ताम्रपात्रं वा ब्रह्मपात्राणि तानि वै॥ वृद्धपराशरः। यत्त्वस्थिगतं पापं देहे तिष्ठति मानवे॥ ब्रह्मकूर्चो द
हेत्सर्वं शुष्कमग्निरिवेंधनमिति॥ पानदिने चोपवासः। ब्रह्मकूर्चोपवासस्तु दहत्यग्निरिवेंधनमिति पराशरोक्तेः। अथ
सांतपनं॥ शंखः। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतं॥ एतदेव त्र्यहाभ्यस्तं प
ति सांतपनं स्मृतं॥ महासांतपनमाह याज्ञवल्क्यः॥ पृथक्सांतपनद्रव्यैः षडहः सोपवासकः कृच्छ्रं सांतपनं स्मृतं॥ एत
देव त्र्यहाभ्यस्तं यति सांतपनं स्मृतं॥ महासांतपनमाह याज्ञवल्क्यः॥ पृथक्सांतपनद्रव्यैः कः। सप्ताहेन तु कृच्छ्रोयं महा

Indira Gandhi National Centre for the Arts

सांतपनःस्मृतः।यमःएतान्येवचपेयानिएकैकंचद्व्यहंद्व्यहं॥अतिसांतपनंनामश्वपाकमपिशोधयेत्।द्वादशाहोयं॥अहं
२० पिबेत्तुगोमूत्रंअहंवैगोमयंपिबेत्।अहंदधिअहंक्षीरंअहंसर्पिस्ततःशुचिः।पंचदशाहोयं॥जाबालः॥एकैकमेतदेवंहि
त्रिरात्रमुपयोजयेत्।अहंचोपवसेदंत्यंमहासांतपनंविदुरिति।एकविंशतिरात्रोयं।वज्रकृच्छ्रमहांगिराः।गोमूत्रेणस
मायुक्तंयावकंचोपयोजयेत्।एकाहेनतुकृच्छ्रोयमुक्तस्त्वंगिरसास्वयं।सर्वपापहरोदिव्योनाम्नावज्रइतिस्मृतइति॥
सर्वप्रक्रांतपयोदधितक्रापेक्षयावाशोक्तोविकल्पः॥॥अथतुलापुरुषकृच्छ्रः।शंखः।पिण्याकाचामतक्रांबु
सक्तूनांप्रतिवासरं।उपवासांतराभ्यासात्तुलापुरुषउच्यते।आचामआदननिस्रावोमंडइतियावत्॥अथचांद्रायणं
॥यमः।वर्धयेत्पिंडमेकैकंशुक्लेकृष्णेचह्रासयेत्॥एतच्चांद्रायणंनामयवमध्यंप्रकीर्तितं।एकैकंह्रासयेत्पिंडंकृष्णे
शुक्लेचवर्द्धयेत्।एतत्पिपीलिकामध्यंचांद्रायणमुदाहृतं॥त्रींस्त्रीन्पिंडान्समश्नीयात्त्रिपक्षान्यावदृढव्रतः।हविष्यान्न
स्यवैमासमृषिचांद्रायणंस्मृतं।चतुरःप्रातरश्नीयाच्चतुरःसायमेवच॥पिंडानेनद्विबालानांशिशुचांद्रायणंस्मृतं॥ स्म०
पिंडानष्टौसमश्नीयान्मासंमध्यंदिनेरवौ॥यतिचांद्रायणंह्येतत्सर्वकल्मषनाशनं॥यतिचांद्रायणमितिसंज्ञामात्रं २०

तेननयतिमात्रस्यैवाधिकारः।किंतुसर्वेषां।एवंशिशुचांद्रायणेपि॥यवपिपीलिकामध्ययोस्तिथिवृद्धौह्रासेवाग्रासानामपिह्रा
सवृद्धी॥तथाचविष्णुः।ग्रासानास्याविकारेणआपान्नीयंइकलाभिवृद्धौक्रमेणवर्द्धयेद्धानौचह्रासयेदमावास्यायांचनाश्नी
यादितिएतेनपक्षकल्पतरुकृच्छ्रशूलपाणीआहतुःकृष्णप्रतिपदिपंचदशग्रासाः।ततएकैकहानावमावास्यायामेकोग्रासः।शु
क्लप्रतिपदादिषुद्व्यादिवृद्धिरिति।तदपास्तं।अमावास्यांनभुंजीतएषचांद्रायणेविधिरितिपराशरोक्तेश्च॥सामान्यचां
यणमाहसएव॥यथाकथंचित्पिंडानांतिस्रोशीतीरश्नीयात्सामान्यचांद्रायणइति॥प्रतिदिनंसंख्यानियमानादरे
णमासेनचत्वारिंशदुत्तरंशतद्वयंग्रासानश्नीयादित्यर्थः।पिपीलिकायवमध्यभिन्नचांद्रायणेषुदिनांतरेप्रारंभो
नप्रतिपद्येव।ग्रासपरिमाणमाहयाज्ञवल्क्यः।तिथिवृद्ध्याचरेत्पिंडान्भुंजेशिखंडसंमितान्॥शिखीमयूरः।चांद्रा
यणप्रकरणेपराशरस्तु॥कुक्कुटांडप्रमाणंतुग्रासंवैपरिकल्पयेत्।शंखस्तु॥आर्द्रामलकमात्रास्तुग्रासाइंदुव्रतेस्मृ
ताइतिएतेषांचपरिमाणानांविकल्पः।एकाह्नपादोनिस्यमाप्नउपवासस्तावच्चांद्रायणविधिनाबाध्यते।एतत्सध
र्मार्थंचचरेदेतच्चंद्रस्यैतिसलोकतामितिकाम्यत्वात्पुनर्भर्त्रसादिनिमित्तेविहितत्वेननैमित्तिकत्वाच्च।काम्य

Indira Gandhi National
Centre for the Arts

त्विकादृच्छ्याद्युपवासोन्यद्वाराकारणीयः॥प्रतिनिधिनाकृतेपिफलप्राप्तेः।कात्यायनादिभिरुक्तत्वात् वचनानित्वस्मत्कृते
समयमयूखेद्रष्टव्यानि॥अयंचैकादश्याद्युपवासवाधःसामान्यचांद्रायणभिन्नेष्वेव॥तत्रप्रतिदिनंग्रासग्रहणनिय
२१ माभावात्।गौतमः।अथातश्चांद्रायणंतस्योक्तोविधिःकृच्छ्रेवपनव्रतंचरेच्छ्वोभूतांपौर्णमासीमुपवसेदाप्यायस्वसंतेपयां
सिनवोनवइतिचैताभिस्तर्पणमाज्यहोमोहविषश्चानुमंत्रणमुपस्थानं॥चंद्रमसोयद्देवादेवहेडनमितिचतसृभिराज्यं
जुहुयाद्देवकृतस्येतिचांतेसमिद्भिः॥ॐभूःभुवःस्वःतपःसत्यं।यशः।श्रीः।ऊर्क्।इट्।ओजः।तेजः।पुरुषः।धर्मः।शिवः
।इत्येतैर्ग्रासानुमंत्रणं।मनसानमःस्वाहेतिवासर्वान्ग्राससप्रमाणमास्याविकारेण।चरुभैक्ष्यसक्तुकणयावकशाकपयो
दधिघृतमूलफलोदकानुत्तरोत्तरंप्रशस्तानिपौर्णमास्यांपंचदशग्रासान्भुक्त्वाएकैकापचयेनापरपक्षमश्नीयात्।अ
मावास्यायामुपोष्यैकैकोपचयेनपूर्वपक्षमितिबौधायनः॥अथातश्चांद्रायणकल्पंव्याख्यास्यामः शुक्लचतुर्दशीमुप
वसेत्कृष्णचतुर्दशींवाकेशश्मश्रुलोमनखानिवापयित्वाश्मश्रूण्येववेत्यादियमः।आयसंतैजसंपात्रंचक्रोत्पन्नं एम०
विवर्जयेत्।अत्रग्रासैरेवप्राणाग्निहोत्रमाहबौधायनः।अग्नीयात्प्राणायेतिप्रथमं॥अपानायेतिद्वितीयं॥व्याना २१

येतितृतीयं।उदानायेतिचतुर्थं॥समानायेतिपंचमं॥यदाचत्वारस्तदाद्वाभ्यांपूर्वं॥यदात्रयस्तदाद्वाभ्यांद्वाभ्यांपूर्वौ।यदाद्वौत
दाद्वाभ्यामेवोत्तरमेकसर्वैरिति॥ग्रासद्वयपक्षेप्रथममाद्यैस्त्रिभिरंत्यद्वाभ्यामेकपक्षेसर्वैरेकमित्यर्थः॥ ॥अथप्रयोगः॥ ॥च
तुर्दश्यांकृतनित्यक्रियपूर्वाह्णेप्राणानायम्यमासपक्षाद्युल्लिख्यअमुकपापक्षयकामःश्रीकामोदेवताप्रीतिकामोरसाय
नादिसिद्धिकामोवामुकचांद्रायणंकरिष्यइतिसंकल्प्यअग्नेव्रतपतेव्रतंचरिष्यामीत्यादिमंत्रैर्व्रतमादित्यायनिवेद्यके
शश्मश्रुलोमनखानिश्मश्रूण्येववावापयित्वातद्दिनउपोष्यपरदिनेमाचेत्तत्राप्युपोष्यपौर्णिमाचेत्पंचदशग्रासान्
भुंजीत।ततश्चोत्तरपक्षेऽपचयःपौर्णिमोत्तरपक्षेचयोग्रासानां॥प्रतिदिनमुदितेचंद्रेआप्यायस्वसोमंतर्प्ययामि
नवोनवोचंद्रमसंतर्प्ययामिइतितर्पयित्वाज्येनैतैरेवमंत्रैर्लौकिकेग्नौहुत्वैतैरेवपात्रस्थंहविरनुमंत्र्यैतैरेवचंद्रमु
पस्थाययद्देवादेवहेडनमितिचतसृभिश्चप्रत्यृचमाज्यंजुहुयात्॥सर्वत्राग्नयेनममेतित्यागः॥ततोदेवकृतस्येतित्रि
भिःसमिद्भिर्यंहुत्वा॥ॐभूर्भुवःस्वःतपःसत्यंयशःश्रीः।ऊर्क्।इट्।ओजःतेजःपुरुषः।धर्मःशिवः।इत्येतैःपंचदश
भिरेकैकंक्रमेणपात्रस्थंग्रासमनुमंत्र्यमनसानमःस्वाहेत्युक्त्वासर्वाननुमंत्र्यैकैकमगुल्यग्रैर्गृहीत्वासावित्र्यानुमंत्र्यभ

Indira Gandhi National
Centre for the Arts

दयेत्। तत्र प्रथमदिने एकग्रासभक्षणे प्राणाय स्वाहा इत्यादयः पंचापि मंत्राः॥ द्वयोर्ग्रासयोर्ग्रहे त्रिभिर्मंत्रैरेकं द्वाभ्यां मंत्राभ्या
२२ मपरं॥ त्रिषु ग्रासेषु द्वाभ्यां द्वाभ्यां द्वौ एकेनैकः। चतुर्षु द्वाभ्यां पूर्ववदेकैकेनान्यान्। पंचमोधिकाग्रासास्तूष्णीमेव भक्षणी
याः समाप्तौ त्र्यवरान् विप्रान् भोजयित्वा गां दक्षिणां दद्यात्॥ आ समाप्ति प्रत्यहं त्रिषवणं स्नानं सौरमंत्रैः कृतांजले
रादित्योपस्थानं गायत्र्या आहुतिभिः कूष्मांडैर्वाज्यहोमः॥ दिवास्थितिः रात्रावुपवेशनं। अशक्तौ शयनं यथाशक्ति
॥ आपो हि ष्ठेति सूक्तं। एतोन्विंद्रं॥ ऋचं वचेति तृचं॥ शन्न इंद्राग्नी। स्वस्तिने। मिमीतां। पुनंतु मां देवजनाः ऋषभं। वि
रजं। रौरवयौधाजये सामनी च पठेत्। एतेषामसंभवे गायत्रीमाहुतीः प्रणवं वा जपेत्॥ एतच्च विप्रभोजनदक्षिणा
दानादिजपांतं सर्वेष्वपि प्राजापत्यादिव्रतेषु तुल्यं॥ ॥इति चांद्रायणव्रतप्रयोगः॥ ॥अथ सोमायनं॥ ॥मार्कंडेयः॥
गोक्षीरं सप्तरात्रं तु पिबेत्स्तनचतुष्टयात्॥ स्तनत्रयात्सप्तरात्रं सप्तरात्रं स्तनद्वयात्॥ स्तनेन त्रिरात्रं द्विस्तनेन त्रिरात्रं एक
स्तनेन त्रिरात्रं॥ एकस्तनप्रभृति पुनश्चतुःस्तनांतं॥ याज्ञे सोमचतुर्थीतनूरसि स्वाहा॥ एवं पंचमीषष्ठ्यादेवं॥ यथा · स्म·
र्चालिखिहोमाः। एकमासाद्वा एनोभ्यः पूतश्चंद्रमसः समानतां सामान्यतां समानलोकतां सायुज्यं गच्छति॥ समाप्ते ब्राह्म २२

णतर्पणं दक्षिणादानं च॥ चतुर्थी कृत्स्ना॥ समानतां तुल्यत्वं॥ सामान्यतां परचंद्रत्वं। सायुज्यं चंद्राभेदः॥ सर्वेषां कृच्छ्राणां फलार्थत्व
माह व्यासः॥ श्रीकामः पुष्टिकामश्च स्वर्गकामस्तथैव च॥ देवताराधनपरस्तथा कृच्छ्रं समाचरेत्। रसायनानि मंत्राश्च तथा चै
वौषधानि च। तस्य सर्वाणि सिध्यंति यो नरः कृच्छ्रकृद्भवेत्। वैदिकानि च सर्वाणि यानि काम्यानि कानिचित्। सिध्यंति सर्वदाना
नि कृच्छ्रकर्तुर्न संशय इति॥ ॥अथ प्राजापत्यादिप्रत्याम्नायाः॥ तत्र तावच्चांद्रायणद्वादशाब्दादिव्रतविषयेष्वपि पापेषु
प्राजापत्यकल्पनामाह तुर्यमोशनसे॥ यत्रोक्तं यत्र वा नोक्तमिह पातकनाशनं। प्राजापत्येन कृच्छ्रेण शोधयेन्नात्र संश
यः। प्राजापत्यश्च व्रतानां तरणानुरोधेनाहृत्तो नाहृत्तो वा। प्राजापत्यप्रत्याम्नायाश्चतुर्विंशतिमते॥ कृच्छ्रो देव्ययुतं चैवं प्राणा
यामशतद्वयं॥ तिलहोमसहस्रं तु वेदपारायणं तथा॥ विप्रा द्वादश वा भोज्या पावकेष्टिस्तथैव च॥ अन्या वा पावमानेष्टिः
समाः स्यात्कुर्यवीषिणः॥ अपरार्के॥ समिद्धुतहविर्धाम्यं तिलाज्याभ्यां हुताशनः॥ कृत्वा द्वादशसाहस्रं गायत्र्या कृच्छ्रमा
प्नुयात् इति द्वादशभिरधिकं सहस्रं द्वादशसाहस्रं॥ याज्ञवल्क्योपि। यत्र यत्र च संकीर्णमात्मानं मन्यते जनः। तत्र त
त्र तिलैर्होमो गायत्र्या वाचनं तथा॥ संकीर्णं पापयुक्तं॥ वाचनं दानं तिलैरित्यत्रापि संबध्यते॥ तिलदानमित्यर्थः॥ वे

Indira Gandhi National Centre for the Arts

२३ द्पारायणं संहितापारायणं। अपुनर्गायत्रीभिर्लक्षांतरितत्वात्। संहिताध्ययनं यावत्तत्कालं सावित्रीं जपेदिति अपरार्के प्रचे
तःस्मृतेश्च परशरः॥ कृच्छ्रोयुतं तु गायत्र्या उदवासस्तथैव च॥ धेनुप्रदानं विप्राय सममेतच्चतुष्टयमिति॥ उदवासो ऽहोरा
त्रमिति महार्णवे॥ मार्कंडेयः॥ प्राजापत्यक्रियाशक्तो धेनुं दद्यात्पयस्विनीं॥ धेनोरभावे दातव्यं मूल्यं तुल्यं न संशय इति।
संवर्तः। गवामभावे दातव्यं मूल्यं तुल्यं न संशय इति मूल्यमुक्तं माधवीये॥ ब्रह्मपुराणे॥ गवामभावे निष्कं स्यात्तदर्धं पादमेव
वा॥ रूप्यपरिमाणेन निष्कपरिभाषामाह याज्ञवल्क्यः॥ निष्कं सुवर्णाश्चत्वार इति सुवर्णचतुष्टयसमतोलितरूप्यं निष्कमि
त्यर्थः। लीलावत्यां वराटकानां दशकद्वयं यत्सा काकिनी ताश्च पणश्चतस्रः॥ ते षोडश द्रम्म इहावगम्यो द्रम्मैः तथा षोड
शभिश्च निष्क इति॥ मूल्यांतरमपि प्रायश्चित्तविवेके षट्त्रिंशन्मते॥ धेनुः पंचभिराढ्यानां मध्यानां त्रिपुराणिका
॥ कार्षापणैकमूल्या हि पवित्राणां प्रकीर्तिता॥ द्वित्राणामिति क्वचित्पाठः॥ पुराणः द्वात्रिंशत्कृष्णलमितं रजतं॥
द्वे कृष्णले समधृते विज्ञेयो रूप्यमाषकः॥ ते षोडश स्याद्धरणं पुराणश्चैव राजतमिति मिताक्षरायां स्मृतेः। कार्षापण रुम.
स्तु कर्षापणः स विज्ञेयः कार्षिकस्ताम्रिकः पण इति मनूक्तेः॥ मूल्याध्याये। कात्यायनः॥ द्वात्रिंशत्पणिका गाव च तुष्का २३

र्षापणो वरः॥ वृषे षट्कार्षापणाका अष्टावनडुहि स्मृताः॥ दश कार्षापणा धेनोरश्वे पंचदश त्विति॥ एतेषां च गोमूल्य
पक्षाणां शक्ताशक्तभेदेन व्यवस्था॥ यत्तु अपरार्के॥ द्वादशैव सहस्राणि जपेद्देवीमुपोषितः॥ जलांते विधिवन्मौनी प्राजा
पत्योयमुच्यत इति॥ जलांते जलसमीपे॥ तथा तत्रैव चतुर्विंशतिमतमुक्तं॥ अतिकृच्छ्रे पराके च प्राजापत्यत्रयं कुर्यात्॥
कृच्छ्रे गोमिथुनमिति। अत्र द्वादशसहस्रगायत्रीजपो गोमिथुनं च गोतमाद्युक्तप्राजापत्यविषयं शक्तविषयं वा। तत्रै
व। अन्नदानहिरण्येन द्वादशब्राह्मणान् भुचीन्॥ तर्पयेन्माहतां श्री च श्रोत्रियान् कृच्छ्र उच्यते॥ उपोष्य च द्रुपापुक्त
णिलपात्राणि धर्मतः॥ द्वादश ब्रह्मवादिभ्यः प्राजापत्येन तत्समं॥ स्वपमाह त्स्य यो मूर्द्धान्त्यणभारानुपोषितः। दृघा
द्रोमंडले कृच्छे द्वादशैव न संशयः॥ प्राणायामशतं कृत्वा द्वात्रिंशोत्तरमार्त्रिषु॥ अहोरात्रोषितस्तिष्ठेत् प्राङ्मुखः कृ
छ्र उच्यते॥ नमस्कारसहस्राणि द्वादशैव दृढव्रतः॥ गोविप्रपितृदेवेषु कुर्यात्कृच्छ्रत्रयं भवेत्॥ तिलपात्राण्युक्तानि
कौर्मे॥ तिलपात्रं त्रिधा प्रोक्तं कनिष्ठोत्तरमध्यमं॥ ताम्रं दश पलं चैव जघन्यं परिकीर्तितं॥ द्विगुणं मध्यमं प्रोक्तं त्रि
गुणं चोत्तरं स्मृतं॥ वसिष्ठः॥ अपि चो चरते कर्तुर्दिवसं मारुताशनः॥ एत्रौ स्थित्वा जले विष्टः प्राजापत्येन तत्समं॥

Indira Gandhi National
Centre for the Arts

गोमूत्रेणसमायुक्तंयावकंचोपयोजयेत्।कृच्छ्रमेकाहिकंप्रोक्तंदृष्टमंगिरसास्वयं॥वस्त्रपासीनोदिवातिष्ठेत्त्रिरात्रंप्रा
२४ कृताशनः।प्राजापत्यंविजानीयात्कूष्मांडैर्जुहुयाद्घृतमिति॥पराशरः॥कृच्छ्रोद्व्ययुतंचैवप्राणायामशतद्वयं॥पु
ण्यतीर्थेनार्द्रशिरःस्नानंद्वादशसंख्यया।माधवीयेत्त्वंतरे॥प्राजापत्यंचरन्विप्रोयद्यशक्तःकथंचन॥अहाप्ति
पंचविप्रांस्तान्भोजयेत्सम्यगीप्सितान्॥अत्रकपिंजलाधिकरणन्यायेनपंचत्वप्रहस्तुत्रयस्त्रयोविप्राः।कएवः।
एकमध्ययनंकुर्यात्प्राजापत्यमथापिवा।दद्याद्वादशसाहस्रंगवांमुष्टिविचक्षणः।एकमध्ययनंसकृत्संहिता
ध्ययनं।तथाषडुपवासैरपिप्राजापत्यसिद्धिरितिनिबंधकृत्॥चतुर्विंशतिमते॥प्राजापत्येतुगामेकांदद्या
त्सांतपनेद्वयं॥पराकृतपातिकृच्छ्रेतिस्रस्तिस्रस्त्वगाल्लयेति॥सांतपनमत्रमहत्॥तदत्रसार्द्धप्राजापत्योक्तः॥त
थाचषट्त्रिंशन्मते।पराकतप्तातिकृच्छ्रस्थानेकृच्छ्रत्रयंचरेत्॥सांतपनस्यचाध्यर्द्धमशक्तौव्रतमाचरेदिति।स्व
त्यर्थसारेतु।पराकेपंच।तप्तकृच्छ्रेषडिति।अपरार्के मार्कंडेयः।प्राजापत्यसमाधेनुस्तद्द्वयंतप्तकृच्छ्रके।प एम.
राकेतुसुवर्णस्याद्धेमशृंगीतथैवचेति।पराकेतुस्कवर्णधेनुद्वयमूल्यसमंहेमशृंगीग्रहणेनसकलकांस्यदोहाद्यु २४

पस्कारवतींधेनुंलक्षयति॥कर्मविपाकसारेगोरनुष्टतौ॥एकांकृच्छ्रेतिकृच्छ्रेद्वेतिस्रश्चांद्रायणेस्मृताइति॥मदनरत्नेस्मृ
तौ॥प्राजापत्येतुगामेकामतिकृच्छ्रेद्वयंस्मृतं।चांद्रायणेपराकेचतिस्रोगावःहिरण्यत्वथेति।हरहविस्तुः।चांद्रायणमकुर्वा
णाःकुर्युःकृच्छ्रचतुष्टयं।एतद्यतिचांद्रायणविषयं॥स्मृत्यर्व॥चांद्रायणपराकाभ्यांनिष्कृतिंयोनशक्नुयात्।सकरोत्या
त्मशुध्यर्थंप्राजापत्यस्यपंचकमिति।इदमृषिचांद्रायणपरं॥पिपीलिकायवमध्ययोरष्टधेनूक्तेः।शिशुचांचांद्रायण
दोचधेनुत्रयोक्तेः।यत्तुचतुर्विंशन्मते॥अष्टौचांद्रायणेदेयाःप्रत्याम्नायविधौसदेतितत्पिपीलिकायवमध्यविषय
मतिधनिनः॥धर्मविहतौ॥चतुर्विंशतिमतेच॥चांद्रायणंमृगारेष्टिःपवित्रेष्टिस्तथैवच।मित्रविंदापशुश्चैवकृच्छ्रत्रयम
थापिवा॥तिलहोमायुतंचैवपराकद्वयमेवच॥गायत्र्यालक्षमेकंतुसमान्याहुर्मनीषिणः॥नित्यनैमित्तिकानांचकाम्या
नांचैवकर्मणां॥इष्टीनांपशुबंधानामभावेचरवःस्मृताइति।कृच्छ्रातिकृच्छ्रेतुधेनुत्रयं॥अत्रविमर्शोयमेकृच्छ्रस्त्व
तिकृच्छ्रोनिपातने।कृच्छ्रातिकृच्छ्रोस्क्यातेकृच्छ्रोभंतरशोणितेइत्यतिकृच्छ्रेधेनुद्वयोक्तेस्तद्विषयनिपातनाद्धि
केस्क्यातेविहितस्यकृच्छ्रातिकृच्छ्रस्यातिकृच्छ्राद्धिकावगमाधेनुत्रयंप्रत्याम्नायोवगम्यते।यदात्वतिकृच्छ्रेति

Indira Gandhi National
Centre for the Arts

शस्तशतानुकृच्छ्रातिकृच्छ्रेततोधिकेचतस्रः।तथाचोत्तरेणत्रणाधिक्येनाहहारीतः।अनाश्रमीसंवत्सरंप्राजापत्यंचरित्वाश्रमम
२५ मुपेयात्।द्वितीयेतिकृच्छ्रंतृतीयेकृच्छ्रातिकृच्छ्रमतऊर्ध्वंचांद्रायणमिति॥चतुर्विंशतिमते॥कृच्छ्रेपंचातिकृच्छ्रेत्रिगुणमहरह
स्त्रिंशदेवंतृतीयेचत्वारिंशच्चतुर्थेत्रिगुणगुणिताविंशतिःस्यात्पराके॥कृच्छ्रेसांतपनाख्येभवतिषडधिकाविंशतिःसैवही
नाद्वाभ्यांचांद्रायणेस्यात्तपसिकृशतनुर्भोजयेद्विप्रमुख्यान्।अत्रसंख्यान्वितमहरहःपदंभोजनान्वयि।तेनकृच्छ्रेप्रत्यहं
पंचातिकृच्छ्रेप्रत्यहंपंचदश॥एवमुत्तरत्रेतिकेचित्।युक्तंतु॥संख्यावीप्सयोःपरस्परानन्वितयोरेकक्रियान्वयः।तेनकृ
च्छ्रेपंचसुदिनेष्वेकैकोभोज्यः॥अतिकृच्छ्रेनवस्वेकैकस्त्रिषुद्वौद्वावितिपंचदशैव।तृतीयेकृच्छ्रातिकृच्छ्रेत्रिंशत्।द्वादश
दिनेविभज्यभोज्याः।सांतपनेचांद्रायणेचविंशतौत्रैगुण्यमन्वेति।सौम्यकृच्छ्रेएकाधेनुः।ब्रह्मकूर्चेर्धा॥पराकेतिस्रः।
मासोपवासेसार्धसप्तेतिनिबंधकृतः।शूलपाणिस्तु।पराकेपंचचांद्रायणेसार्धसप्त।शिशुचांद्रायणेतप्तकृच्छ्रेचपादो
नचतुष्टयं॥कृच्छ्रातिकृच्छ्रेमहासांतपनेचषट्।मासोपवासेपंचदशेत्यूचे॥॥अथतीर्थप्रत्याम्नायाः।ब्रह्महत्याव्रत एम॰
मुपक्रम्यभविष्यत्पुराणे॥विंध्यादुत्तरतोयस्यनिवासःपरिकीर्तितः॥पराशरमतंतस्यसेतुबंधस्यदर्शनं॥विंध्योत्तर २५

वर्त्तिनमुक्त्वातत्रैव॥चातुर्विद्योपपन्नस्यविधिवद्ब्रह्मघातके॥समुद्रसेतुगमनंप्रायश्चित्तंविनिर्दिशेत्।स्मृतिसंग्रहेस्मृ
त्यर्थसारेच॥भागीरथ्यांस्नानंषष्टियोजनागतस्यषडब्दसमं॥अत्रयात्रायोजनवृद्ध्यावर्द्धकृच्छ्रवृद्धिः।एकयोजनागत
स्यमध्येपर्वतादिभिर्व्यवधानेकृच्छ्रत्रयं।तृतीयांशाधिकक्रोशागतस्यभागीरथ्यांविधियुक्तःस्नानमेकःकृच्छ्रः।अशक्तस्य
त्वर्धयोजनागतस्य।शक्तस्यापिमार्गस्यदुर्गमत्वेभागीरथीस्नानमर्धयोजनागतस्यैकःकृच्छ्रइत्यादिकल्पयंति।प्रयागस्ना
नंषष्टियोजनागतस्यद्वादशाब्दसमं॥गंगाद्वारेगंगासागरसंगमेचैवं॥यमुनास्नानंविंशतियोजनागतस्याब्दसमं॥मथु
रायांद्विगुणं।सरस्वत्यांचतुरब्दकृच्छ्रसमंचत्वारिंशद्योजनागतस्य॥प्रभासेद्वारवत्यांचद्विगुणं॥अनयोर्नद्योर्योजनवृ
द्ध्यापादकृच्छ्रवृद्धिः॥दृषद्वतीशुतुद्रीविपाशावितस्ताशरावतीमहद्धादिषुस्नानंत्रिंशत्कृच्छ्रसमंपंचदशयोजनाग
तस्य॥चंद्रभागावेत्रवतीसरयूगोमतीदेविकाकौशिकीगंडक्यादिदेवनदीषुस्नानंषोडशकृच्छ्रसमंद्वादशयोजनागत
स्य॥एतासुमहानदीषुपरस्परसंगमेत्रिनदीफलं॥अन्यासुमहानदीषुषट्कृच्छ्रसमं॥महानदेषुमहानद्यर्धं॥शोण
महानदेगंगार्धफलं॥नदेषुनद्यर्धं॥वैरोचननदेमहानद्यर्धं॥नर्मदायांचतुर्विंशतियोजनागतस्यचतुर्विंशतिकृ

Indira Gandhi National
Centre for the Arts

२६ छ्रसमं॥कुब्जिकासंगमे द्विगुणं॥मुक्तातीर्थे चतुर्गुणं॥ताप्यां दशकृच्छ्रसमं दशयोजनागतस्य॥पयोष्ण्यां अष्टयोजना
गतस्याष्टकृच्छ्रसमं॥तत्र तत्र संगमे द्विगुणं॥गोदावर्यां षष्टियोजनागतस्य अष्टसमं॥त्रिंशद्योजनागतस्यैकाष्टं मुनी
र्थेषु प्रतिलोमनुलोमस्नानं षष्टिकृच्छ्रसमं॥वंजरासंगमे प्रयागे तद्द्विगुणं।सप्तगोदावरी भीमेश्वरे त्रिगुणं॥कु
शातर्प्पणे वंजरायां द्वादशयोजनागतस्य द्वादशकृच्छ्रसमं॥गोदावर्यां विश्लेषे समुद्रांते षड्गुणं प्रणीतायां चतुःकृ
छ्रसमं॥ चतुर्योजने॥पूर्णायां तद्दर्द्धयोजने॥कृष्णवेण्यां पंचदशयोजने पंचदशकृच्छ्रसमं।तुंगभद्रायां विंशति
योजनगतस्य विंशतिकृच्छ्रसमं॥मलापहारिण्यामष्टकृच्छ्रसममष्टयोजनगतस्य॥निवृत्त्यां षट्कृच्छ्रसमं षड्योज
नागतस्य॥गोदावर्यां पात्रायोजनद्वयोजने पादकृच्छ्रः॥सिंहस्थे गुरौ सर्वत्र जाह्नवीसमं॥कन्यास्थे गुरौ कृष्णवे
ण्यायां सर्वत्र जाह्नव्यर्द्धं॥तुंगभद्रायां तुलास्थे गुरौ जाह्नव्यर्द्धत्र्यंशं॥तुंगभद्रायां तुलास्थे रवौ जाह्नव्यर्द्धं॥कर्कटे रवौ
च॥कृष्णवेण्यां मलापहारिणीसंगमे प्रयागे त्रिंशद्योजनगतस्य त्रिंशत्कृच्छ्रसमं॥भीमरथ्याः संगमे प्रयागे द्वि एव.
गुणं तुंगभद्रासंगमे त्रिगुणं।निवृत्तिसंगमे चतुर्गुणं।ब्रह्मेश्वरे पंचगुणं॥पातालगंगायां मल्लिकार्जुने षड्गुणं॥ततः २६

द्वर्वे षष्टिकृच्छ्रसमं॥लिंगालये द्विगुणं॥समुद्रसंगमे चैवं॥कावेर्यां महानद्यां पंचदशकृच्छ्रसमं दशयोजनागतस्य॥ताम्रपर्णीकृ
तमालापयस्विनीषु द्वादशयोजने द्वादशकृच्छ्रसमं॥सह्यपादोद्भूता वेदाद्रिपादे।द्भूताश्च नद्यः स्वदेशानुसारेण एकद्वित्रिकृच्छ्र
फलप्रदाः विंध्यशैलोद्भवाः द्विगुणाः॥हिमोद्भूतास्त्रिगुणाः।स्मृतौ पुराणे च यथा कथंचिदनुक्तौ कुल्याः त्रिरात्रफलदाः अल्प
नद्यः कृच्छ्रदाः॥महानद्यस्त्रिकृच्छ्रदाः॥सर्वत्र यात्रानुक्तौ कृच्छ्रसंख्या योजनसंख्यया स्यात्॥एकयोजनगा दिषड्योजनगानाः
स्रवंत्यः कुल्याः।ततो द्वादशयोजनगाः ऽल्पनद्यः॥चतुर्विंशतियोजनगा नानद्यः॥चतुर्विंशतियोजनाधिकगा महानद्यः
।समुद्रगाश्च महानद्यः।यत्र महानदी समाख्याति ताश्च महानद्यः।उपवाससहितं नदीस्नानं कृच्छ्रसमं॥योजनादर्वागपि।भु
नीगदृभीचांडालीशूद्रीकष्टगादि नद्यः पापनश्च वर्ज्याः।सर्वत्र समुद्रस्नानं दर्शे कार्यं॥देवतासमीपे सरः सरित्नदीसंगमेषु स
र्वदा कार्यं समुद्रस्नानं पंचदशयोजनागतस्य यस्मात् देवतासमीपे द्विगुणं।तत्र स्नात्वा तद्देवतादर्शने त्रिगुणं॥सेतोर्गम
नं त्रिंशत्कृच्छ्रसमं त्रिंशद्योजनागतस्य॥स्नात्वा रामेश्वरदर्शनं षष्टिकृच्छ्रसमं॥विंध्यदेशीयानां सेतुरामेश्वरे जाह्नव्यां
च त्रिगुणफलं॥जाह्नवाकेदारयोश्च तथैव॥दक्षिणदेशायानां जाह्नव्यां षड्गुणं।गंगादेशीयानां सेतुरामेश्वरे षड्गुणं॥

Indira Gandhi National
Centre for the Arts

स्कंदद्दर्शनेत्रिंशत्कृछ्रसमंत्रिंशद्योजनागतस्य॥यत्रगंगासंङ्गालितत्रैवं॥श्रीरंगपद्मनाभपुरुषोत्तमचक्रकोटमहात्म्र
२७ द्मीदर्शनेलोणारस्यातेत्रिंशद्योजनागतस्यत्रिंशत्कृछ्रसमंकेदारेत्रिगुणं॥सर्वत्रैवमाहेश्वरसौरशाक्तादिपीठद
र्शनेपंचदशकृछ्रसमं॥प्रत्योतेद्विगुणं॥अहोबलेपितथा॥श्रीशैलप्रदक्षिणंषष्टिकृछ्रसमं।श्रीशैलेएकैकशृंगद
र्शनंद्वादशकृछ्रसमं॥अन्येषुप्रत्यानतीर्थदेवदर्शनेषट्कृछ्रफलंसिद्धक्षेत्रेमक्षेत्रेचस्वयंभुदर्शनंत्रिंशत्कृछ्रस
मं॥त्रिंशद्योजनागतस्य॥सर्वत्रकृछ्रसंख्यायोजनसंख्यायाज्ञेया॥ ॥इतितीर्थप्रत्याम्नायाः॥ ॥अथपातित्यहेतवः।
गौतमः।ब्रह्महसुरापगुरुतल्पगमातृपितृयोनिसंबंधागस्तेननास्तिकनिंदितकर्माभ्यासिपतितात्यागपतितत्यागिनः
पतिताःपातकसंयोजकाश्च॥मातापितृयोनिसंबंधागोमातृष्वसृपितृष्वसात्मभगिनीगामी॥स्तेनःसुवर्णातत्समयोः
॥नास्तिकोवेदाप्रामाण्यवादी॥अपतितत्यागीगुरुमभिशाप्यतत्यक्ता।पातकसंयोजकाःस्वसंसर्गेणदोषहेतव
इतिमांचः।अपरार्केतुपातकसंयोजकाःप्रयोजकादयस्तेपिपतिताइति॥एवंकल्पतरएवपि॥यमः।मातृष्व त्म.
स्रामातृसखीदुहिताचपितृष्वसा॥मातुलानीस्वसाप्यक्ताःप्रयोजकादयस्तेपिपतिताइति॥एवंकल्पतरएवपि॥ २७

प्रमः।मातृष्वसामातृसखीदुश्रूर्गत्वासद्यःपतेन्नरइति॥मनुः।सद्यःपततिमांसेनलाक्षपालवणेनच॥सएवः छत्राकंवि
ड्वराहंचलशुनंग्रामकुक्कुटं॥पलांडुंगृंजनंचैवमत्याजग्ध्वापतेन्नरः॥यमः।जलाग्न्युद्बंधनभ्रष्टाःप्रव्रज्यानाशकच्युताः॥
विषप्रपतनप्रापशस्त्रघातहताश्चये॥नवैतेप्रत्यवसिताःसर्वलोकबहिष्कृताइति।उपनयनमुख्यगौणकालातिक्रमेव्रा
त्यानांपातित्यमाहयाज्ञवल्क्यः।अतऊर्ध्वपतंत्येतेसर्वधर्मबहिष्कृताः॥सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोः।आश्व
लायनोपि।अतऊर्ध्वपतितसावित्रीकाभवंतिनैतानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरिति॥अत्रिः।आरूढंप
तितंविप्रंमंडलाद्वविनिःसृतं।उद्बद्धंकृमिदष्टंचस्पृष्ट्वाचांद्रायणंचरेत्॥आरूढोगृहस्थ्यपतिरिक्तआश्रमीब्रह्मचर्य
स्खलनात्॥द्विजातिकर्मानधिकारी।मंडलात्स्वसजातीयेभ्योविनिःसृतोबहिर्भूतः।उद्बद्धउद्बंधनात्च्युतआत्महंता॥कृ
मिदष्टःश्वादिदंशाकृतेउत्पन्नकृमिः॥मनुः॥चांडालांत्यस्त्रियोगत्वाभुक्त्वाचप्रतिगृह्यच॥पतत्यज्ञानतोविप्रोज्ञाना
त्साम्यंतुगच्छति॥गौतमः।नस्त्रीषुगुरुतल्पंपततीत्यके॥भ्रूणहननेहीनवर्णसेवायांस्त्रीपततीति।मातृपितृयोनि
संबंधागःपततीत्यस्यापवादः॥तासुगुर्वंगनायतिरिक्तासुगच्छन्नपिनपततीत्येकेमन्यंते॥किंतुप्रायश्चित्तीयते॥

गौतमस्त्र्यपततीतिमन्यते॥ लोपं बुध्यबुध्यापेक्षोऽप्याज्ञानप्याज्ञापेक्षो चाम्नवस्थितो विकल्प इति भर्तृयत्नः। भ्रूणहनने गर्भ
२८ वधे हीनसेवायां चापेक्षया हीनवर्णपुरुषगमने प्रतिलोमगमने च॥ याज्ञवल्क्यः॥ नीचाभिगमनं गर्भपातनं भर्तृहिंसनं॥
।विशेषपतनीयानि स्त्रीणामेतान्यपि ध्रुवं॥ अपि शब्दाद्ब्रह्महत्यादीनि उपपातकान्यप्यभ्यस्तानि॥ नीचो हीनवर्णः॥ तद्गम
नं च गर्भोत्पत्त्यंतं॥ अत एव व्यभिचारे दृष्टौ शुद्धिर्गर्भस्यागो विधीयते॥ गर्भभर्तृवधादौ च तथा महति पातक इति याज्ञव
ल्क्यवाक्ये॥ स्त्रूद्रकृते गर्भ इति प्राचां व्याख्यानं॥ ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण संगताः। अप्रजाता विशुध्यंति प्राय
श्चित्तेन नेतरे इति वासिष्ठात्॥ यत्तु शौनकः। पुरुषस्य पातित्यनिमित्तानि स्त्रीणामपि तान्येव ब्राह्मणी हीनवर्णसे
वायामधिकं पततीति। तत्र हीनवर्णसेवा। गर्भांतं शूद्रगमनं प्रतिलोमगमनमात्रं च। वसिष्ठः। त्रीणि स्त्रियाः पातकानि
लोके धर्मविदो विदुः। भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भस्य पातनं॥ भ्रूणहत्योक्तिर्दृष्टांतार्था। स एव॥ चतस्रस्त्वपरि
त्याज्याः शिष्यगा गुरुगा च या। पतिघ्नी च विशेषेण जुंगितोपगता च या। जुंगितः प्रतिलोमजः शिष्यगमनादीनामपि स्म.
पातित्यहेतुपतिवधसाहचर्यात्॥ पातित्यहेतुत्वं त्यागश्च वस्त्रान्नगृहवासादिजीवनहेतुविच्छेदेन॥ नीचाभिगमना २८

दावपीदृशो वत्यागः। प्रायश्चित्तं चिकीर्षंतीनां न त्यागमाह॥ याज्ञवल्क्यः। पतितानामेष एव विधिः स्त्रीणां प्रकीर्तितः। वासो गृहां
तिके देयमन्नं वासः सरक्षणं॥ मनुः। पतत्यर्द्धं शरीरस्य यस्य भार्या सुरां पिबेत्॥ पतितार्द्धशरीरस्य निष्कृतिर्न विधीयत इति। द्विजा
तिभार्यायाः शूद्रायाः सुरापाननिषेधार्थमिदमिति विज्ञानेश्वरः। माधवस्तु। ब्राह्मण्यादीनामप्ययं निषेधः॥ स्त्रिया भर्तुरसं
सर्गेपि दोषार्थमुत्तरार्धं॥ स ह्यधिकारे तु। स्त्रिया अर्द्धशरीरत्वं पतितमर्धं शरीरं यस्येति बहुव्रीहिरिति चेत्। तत्र ब्राह्मण्या
दीन् प्रतिषेधे वचोवैयर्थ्यापत्तेः। बहुव्रीहेर्लक्षणापत्तेश्च॥ अतो विज्ञानेश्वर एव सम्यगूचे॥ अथ साधारणप्रायश्चित्ता
नि॥ संवर्त्तः। हिरण्यदानं गोदानं भूमिदानं तथैव च। नाशयंत्याशु पापानि महापातकजान्यपि॥ गौतमः॥ संवत्सरः ष
ण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहत्र्यहोहोरात्र इति कालाः एतान्यनादेशे विकल्पेन क्रियेरन्
एनस्सु गुरुषु गुरूणि लघुषु लघूनि कृच्छ्रातिकृच्छ्रौ चांद्रायणमिति प्रायश्चित्तमिति। विष्णुधर्मोत्तरे सायंप्रातस्तथा
ह्न्यां वासुदेवस्य कीर्तनं। सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते। प्रभासखंडे श्रीभगवद्वाक्यं नाम्नां मुख्यतरं नाम कृ
ष्णाख्यं मे परंतप॥ प्रायश्चित्तमशेषाणां पापानां मोचकं परं॥ वराहे। वासुदेवस्य संकीर्त्य सुरापो व्याधितोपि वा॥

Indira Gandhi National
Centre for the Arts

मुक्तो जायेत नियतं महाविष्णुः प्रसीदति गोविंदेति तथा प्रोक्तं भक्त्या वा भक्तिवर्जितैः दहते सर्वपापानि युगांतेग्निरिवोत्थितः॥
विश्वामित्रः॥ कृच्छ्रचांद्रायणादीनि शुध्यर्थमुदयकारणं प्रकाशे चरहस्ये च अनुक्ते संशये स्फुटे॥ प्राजापत्यः सांतपनः शिशु
कृच्छ्रः पराककः॥ अतिकृच्छ्रः पर्णकृच्छ्रः सौम्यकृच्छ्रोतिकृच्छ्रकः महासांतपनः सिध्येत तप्तकृच्छ्रस्तु पावनः जपोपवासकृच्छ्र
स्तु ब्रह्मकूर्चस्तु शोधकः॥ एते व्यस्ताः समस्ता वा प्रत्येकं ह्येकशोपि वा॥ पातकादिषु सर्वेषु उपवासेषु पत्नतः॥ कार्पास्ये
द्रापणैर्युक्ताः केवला वापि शुद्धये॥ शिशुचांद्रायणं प्रोक्तं यतिचांद्रायणं तथा यवमध्यं तथा प्रोक्तं तथा पिपीलिकाकृति॥
उपवासस्त्रिरात्रं वा मासाः पक्षस्तदर्धकं॥ षडहो द्वादशाहादिकार्यं शुद्धिफलार्थिना॥ उपपातकयुक्तानामनादिष्टेषु चैव हि॥
प्रकाशे वा प्रकाशे वा अभिसंवाद्य पेत्तया जातिशक्तिगुणान् दृष्ट्वा सकृत् बुद्धिकृतं तथा॥ अनुबंधादिकं दृष्ट्वा सर्वकार्यं
यथाक्रमं॥ प्रकाशाउक्तं प्रत्किंचिद्विंशाद्भागो रहस्यके॥ त्रिंशत्भागः षष्ठिभागः कल्पो ज्ञात्वा घपेत्तया याज्ञवल्क्यः अ
नादिष्टेषु पापेषु शुद्धिश्चांद्रायणेन च॥ धर्मार्थं चचरेदेतच्चंद्रस्येति सलोकतां॥ षड्विंशन्मते त्रयाणां समुच्चयः प्रतिपा
दितः॥ यानि कानि च पापानि गुरोर्गुरुतराणि च॥ कृच्छ्रातिकृच्छ्रचांद्रैस्तु शोध्यंते मनुरब्रवीत्॥ निरपेक्षोपि प्राजापत्यः च 

तुर्विंशतिमते॥ लघुदोषेत्वनादिष्टे प्राजापत्यं समाचरेदिति॥ द्वयोः समुच्चयमाहोशना॥ दुरितानां दुरिष्टानां पापानां महतामपि
पि कृच्छ्रचांद्रायणं चैव सर्वपापप्रणाशनमिति॥ दुरितमुपपातकं दुरिष्टं पातकं॥ निरपेक्षं पराकमाह मनुः पराको नाम कृच्छ्रो
यं सर्वपापप्रणोदन इति॥ गौतमोपि॥ प्रथमं चरित्वा शुचिः कर्मण्यः पूतो भवति द्वितीयं चरित्वा यदन्यन्महापातकेभ्यः पा
पं कुरुते तस्मात्प्रमुच्यते॥ तृतीयं चरित्वा सर्वस्मादेनसो मुच्यत इति प्रथमादिपदैः कृच्छ्रोतिकृच्छ्रः कृच्छ्रातिकृच्छ्रश्चोच्यते
हमीतः॥ चांद्रायणं पराकं च तुलापुरुष एव च॥ गवां चैवानुगमनं सर्वपापप्रणाशनमिति तथा॥ गोमूत्रं गोमयं क्षीरं दधि
सर्पिः कुशोदकं एकरात्रोपवासश्च श्वपाकमपि शोधयेत्॥ एतेषां सर्वेषां व्यवस्थोक्ता विष्णुपुराणे पापे गुरूणि गुरूणि स्व
ल्पानि स्वल्पे च तद्विदः॥ प्रायश्चित्तानि मैत्रेय जगुः स्वायंभुवादयः॥ भविष्ये॥ एवं विषयभेदेन व्यवस्थाप्यानि पुत्रक॥ प्रायश्चित्तानि सर्वा
णि गुरूणि च लघूनि च॥ अन्यथा हि महाबाहो लघूनामुपदेशनः॥ गुरूणामुपदेशो हि निष्प्रयोजनतां व्रजेत्॥ गौतमः॥ एनसि गु
रूणि गुरूणि लघूनि लघूनि वनिसाधारणप्रायश्चित्तानि॥ ॥अथ पापभेदाः॥ ॥विष्णुः॥ अतिपातकमहापातकानुपातको
पपातकेषु प्रवर्त्तते जातिभ्रंशकरेषु संकरीकरणेष्वपात्रीकरणेषु मलावहेषु प्रकीर्णकेषु च॥ तत्र महापापान्याह॥ ॥मनुः॥

Indira Gandhi National
Centre for the Arts

ब्रह्महत्यासुरापानंस्तेयंगुर्वंगनागमः।महांतिपातकान्याहुःसंप्रयोगंचतैःसह॥ब्रह्महत्यासाक्षात्ब्राह्मणमारणं।अकामकृ
३० तेतस्मिन्प्रायश्चित्तमाहयाज्ञवल्क्यः॥शिरःकपालीध्वजवान्भिक्षाशीकर्मवेदयन्॥ब्रह्महाद्वादशाब्दानिमितभुक्शुद्धि
माप्नुयात्॥शिरःकपालीस्वहतविप्रशिरोस्थिधृक्ध्वजःआरोपितशवशिरदंडःयत्तुमध्यमांगिरसः॥गवांसहस्रंवि
धिवत्पात्रेभ्यःप्रतिपादयेत्॥ब्रह्महाविप्रमुच्येतसर्वपापेभ्यएवचेति।तद्द्विगुणंसवनस्थेतुब्राह्मणेव्रतमादिशेदित्ये
तद्वाक्यविहितद्विगुणव्रतचरणंशक्तस्यविषयं।यच्चशंखः।प्रमाप्यद्वादशसंवत्सरान्षट्त्रीन्सार्द्धसंवत्सरंव्रतान्यादि
शेन्नेषामंतेगोसहस्रंतत्सार्द्धमर्द्धंचदद्यात्सर्वेषांवर्णानांआनुपूर्व्येणेतितन्मातापितृभ्रातृगुर्वादिविषयं।आनुपूर्व्येणे
तितुद्वादशाब्दषडब्दत्र्यब्दसार्धाब्दानांगोसहस्रतदर्धतदर्धतदर्धानांसर्वेषांवर्णानांशक्तशक्तंबोधयतिनतुद्वादशा
ब्दादिव्रतचतुष्टयंगोसहस्रचतुष्टयसहितंब्राह्मणादिवर्णचतुष्टयस्यतथाचपर्षद्याब्राह्मणानांतुसाराज्ञांद्विगुणाम
ता॥वैश्यानांत्रिगुणाप्रोक्तापर्षद्वच्चव्रतंस्मृतमित्यंगिरसाशूद्रोवाब्राह्मणंहत्वाप्रायश्चित्तचतुष्टयमितिभविष्यव एम.
चनेनचब्राह्मणापेक्षयेतरवर्णानामधिकप्रायश्चित्तविधानात्इदंचव्रतंचरणाशक्तस्यशक्तस्यतुभविष्यत्पुराणं ३०

मातरंपितरंहत्वाभ्रातरंसोदरंतथागुरुंहत्वाश्रोत्रियंचआहिताग्निमथापिवा॥यावज्जीवंव्रतंचीर्त्वाप्रतिहंताविशुध्यतीतिए
वंचयदापस्तंबेनचोक्तं॥विप्रहारणेकुटींकृत्वावाग्यतःशवशिरोध्वजःशाणीयतआमशमनुपरिज्ञान्वाष्ठाधदयेदिन्तुपक्क
म्पतद्व्रतमोज्ञात्तमादुच्छ्वासाच्चरेत्॥नास्मिन्लोकेप्रत्यापत्तिर्विद्यतइतितन्मातापितृगुर्वादिविषयं।मनुःयजेतवाश्वमेधेन
स्वर्जितागोसवेनवा॥अभिजिद्विश्वजिद्भ्यांवात्रिवृताग्निष्टुतापिवा॥जपन्वान्यतमंवेदंयोजनानांशतंव्रजेत्ब्रह्महत्यापनो
दायमितभुक्नियतेंद्रियः॥सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत्।धनंवाजीवनायालंगृहंवासपरिच्छदं॥हविर्भुग्वानु
सरेत्प्रतिस्रोतःसरस्वतीं॥जपेद्वानियताहारस्त्रिःकृत्वावेदसंहितामिति॥सर्वस्वंवाधनंवागृहंवेतिप्रायश्चित्तत्रयमितिवि
ज्ञानेश्वरः।उत्तरार्द्धंपूर्वार्द्धस्यैवशेषः।नस्वतंत्रप्रायश्चित्तद्वयविधानार्थमितिमेधातिथिःयुक्तंचैतत्॥किमतःसर्वस्वमि
त्याकांक्षापूरणात्अन्यथापणादिसर्वस्वदानेपिशुद्धिःस्यात्।कात्यायनः।आत्मतुल्यंसुवर्णंवादद्याद्वाविप्रतुष्टिकृत्॥इति।
एतेषांचप्रायश्चित्तानांव्यवस्थोक्ताभविष्ये।जातिमात्रंयदाविप्रंहन्यादमतिपूर्वकं।वेदविद्याग्निहोत्रीचतदातस्यभवेदिदं।
जपन्वान्यतमंवेदंयोजनानांशतंव्रजेत्इति॥तत्रैव।जातिमात्रंमदाहन्याद्ब्राह्मणंब्राह्मणोगुहवेदाभ्यासविहीनोवेध

Indira Gandhi National
Centre for the Arts

नवानग्निवर्जितः।प्रायश्चित्तं तदा कुर्यादिति पापविशुद्धये॥ धनं वा जीवनायालं गृहं वा सपरिच्छदमिति। एतस्मिन्नेव विष
३१ ये पराशरस्त्वाह॥ चातुर्विद्योपपन्नस्तु विधिवद्ब्रह्मघातके। समुद्रसेतुगमनं प्रायश्चित्तं विनिर्दिशेत्। सेतुबंधपथे भिक्षां
चातुर्वर्ण्यात्समाहरेत्॥ वर्जयित्वा विकर्मस्थान् छत्रोपानद्विवर्जितः। अहं दुष्कृतकर्मा वै महापातककारकः। गोकुलेषु
च गोष्ठेषु ग्रामेषु नगरेषु च तपोवनेषु तीर्थेषु तीर्थेषु नदीप्रस्रवणेषु च। एतेषु ख्यापयेदेनः पुण्यं गत्वा च सागरं॥ ब्रह्म
हा विप्रमुच्येत स्नात्वा तस्मिन्महोदधौ॥ ततः पूतो गृहं प्राप्य कृत्वा ब्राह्मणभोजनं दत्वा वस्त्रं पवित्राणि पूतात्मा प्रविशेद्गृहं॥
गवां वापि शतं दत्वा चतुर्विधाय दक्षिणां॥ एवं शुद्धिमवाप्नोति चातुर्विद्यानुमोदित इति। अत्र विशेष उक्तो भविष्ये॥ विंध्यादुत्त
रतो यस्य निवासः परिकीर्तितः। पराशरमतं तस्य सेतुबंधनदर्शनमिति। तत्रैव तिरस्कृतो यदा विप्रो क्षिप्यमाणो मृतो यदि॥ नि
र्गुणः सहसा क्रोधात् गृहक्षेत्रादिकारणात्। त्रैवार्षिकं व्रतं कुर्यात्प्रतिलोमां सरस्वतीं गच्छेद्वापि विशुध्यर्थं तत्पापस्येति नि
श्चितं। तत्रैव॥ अत्यर्थं निर्गुणो विप्रो ह्यत्यर्थं निर्गुणोपरि॥ क्रोधाद्धै म्रियते यस्तु निर्निमित्तं तु भर्त्सितः। वत्सरत्रित एम०
यं कुर्यान्नरः कृच्छ्रं विशुद्धये इति। एतस्मिन्नेव विषये निमित्तिनो गुणवत्वे मृतस्य च निर्गुणत्वे तत्रैव। केशश्मश्रु ३१

नखादीनां कृत्वा तु पवनं वने॥ ब्रह्मचर्यं चरन्विप्रो वर्षेणैकेन शुध्यतीति। षड्विंशन्मते षंढं वा ब्राह्मणं हत्वा शूद्रहत्या
व्रतं चरेत्। चांद्रायणं वा कुर्वीत पराकद्वयमेव वेति पतितविप्रवधे व्यासः। ब्रह्महा द्वत्रपं विप्रगायत्रीमभ्यसेत्सदा॥ प्राण
यामशतं कुर्यात्प्रत्यहं नियतः शुचिः। भिक्षाशी निवसेन्नित्यमरण्ये संयतेंद्रियः॥ षोडश ब्राह्मणान्विप्रो भोजयित्वा
समाहितः॥ प्रपद्येद्वस्त्रयुग्मानि हिरण्यं चापि शक्तित इति॥ एतानि च प्रायश्चित्तान्यनुपेतब्राह्मणवधेपि ज्ञेयानि॥
ब्राह्मण्याविशेषात् तत्तु षडब्दं निर्गुणविप्रवधे षडब्दस्य द्वसमाणत्वात्। एतस्याप्युपनयनाभावेन निर्गुणत्वात्। अकामतो
विप्रवधे तु मनुः। प्राणांतिकं तु यत्प्रोक्तं प्रायश्चित्तं मनीषिभिः। तच्च कामकृतं प्राप्य विज्ञेयं नात्र संशयः। कालिकापुराणे॥
इयं विशुद्धिरुदिता प्रमाप्याकामतो द्विजं। कामतो ब्राह्मणवधे जीवतो नास्ति निष्कृतिः॥ कामानुवृत्तावंगिरसः। शरीरं नद
हेद्यावद्ब्रह्महा पापकृत्तमः। तावत्तस्य न शुद्धिः स्यात् भगवान्मनुरब्रवीत्। मरणेऽशक्तस्यापवादरूपस्तत्रैव। स्यात्त्व
कामकृते यत्तु तद्द्विगुणं बुद्धिपूर्वक इति॥ मध्यमांगिरसः। विहितं यदकामानां गिवान्मनुरब्रवीत्कामात्तु द्विगुणं भवेत्
इति। क्वचिन्नदपवादो भविष्ये॥ ब्राह्मणं जातिमात्रं तु कामतो विनिपात्य वै। चरेद्वादशवर्षाणि गुणी निर्गुणमेव हीति त

Indira Gandhi National
Centre for the Arts

त्रैवहत्वानुप्रहरं तं वै ब्राह्मणं वेदपारगं॥ कामतोपि चरेद्धीरः ब्रह्महत्याव्रतमुत्तमं। अकामतस्त्वर्धं॥ क्षत्रियादीनां विशे
३२ षो भविष्यो॥ हत्वा तु क्षत्रियो विप्रं गुणाढ्यमिह कामतः। प्रायश्चित्तं चरेद्धीरो विधिवत्कायशुद्धये। लक्ष्यः शस्त्रभृतां वा
स्याद्विदुषामिच्छयात्मनः॥ प्रास्येदात्मानमग्नौ वा समिद्धे त्रिरवाक्शिरा इति॥ पतिताग्निषु विशेषमाह॥ कात्यायनः। म
६४ हापातकसंयुक्तो दैवात्स्यादग्निमान्यदि। पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयात्॥ प्रायश्चित्तं न कुर्याद्यः कुर्वन्वा
म्रियते यदि। गृह्यं निर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदमिति। पालनविधानात्॥ अग्निहोत्रहोममपि कुर्यात्॥ उशना॥
आहिताग्निस्तु यो विप्रो महापातकवान्भवेत्॥ प्रायश्चित्तैर्न शुध्येत तदग्नीनां तु का गतिः वैतानं प्रक्षिपेत्तोये शालाग्निं
शमयेद्बुधः॥ पतितेनापि प्रायश्चित्तां गतेन संध्यावंदनं कीर्यं॥ संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ यत्किंचि
त्कुरुते कर्म न तस्य फलभाग्भवेदिति दक्षोक्तेः॥ आरब्धप्रायश्चित्तमहापातकिनमुपक्रम्य सम्यक् संध्यामुपासीत
त्रिकालं स्नानमाचरेत्॥ इति स्मृतेश्च॥ ब्रह्मवधव्रतमन्यत्राप्यतिदिशति याज्ञवल्क्यः। यागस्थक्षत्रविट्घाती च एम०
रेद्ब्रह्महणि व्रतं॥ गर्भहा च यथावर्णं तथात्रेयीनिषूदक इति॥ व्रतपदात्तदेवातिदिश्यते न मरणं॥ गर्भश्च वि ३२

ज्ञायां संभूतः॥ जारजे तु ब्राह्मण्या भावात्तद्वधे शूद्रप्रायश्चित्तं॥ किंतु कुंडगोलकादिवधनिमित्तमिति निर्बंधकृतः। यद्य
प्याचार्यमते कुंडगोलकादिषु ब्राह्मण्यमस्त्येव। तथापि कुंडगोलकादिवधप्रायश्चित्तमेव॥ अन्यथा तद्विधिर्व्यर्थः स्यात्। स्त्री
पुंनपुंसकविशेषत्वेनाज्ञातश्चेत्। स्त्रीत्वेन ज्ञाते उपपातकत्वमिति विज्ञानेश्वरादयः॥ नपुंसकत्वेन ज्ञाते षंढवधप्राय
श्चित्तं पूर्वमुक्तं॥ आत्रेयीमाह वसिष्ठः। रजस्वलामृतुस्नातामात्रेयीमाहुः त्रयोदशाहिनानि अत्र ह्येष्यदपत्यं भवतीति
रजस्वलात्रिदिनं तदूर्ध्वं त्रयोदशोतिषोडश॥ अत्र ह्येष्यदिति हेतुना वंध्यामुदासः। यमस्तु। जन्मप्रभृति संस्कारैः सं
स्कृता मंत्रवत्तु या। गर्भिणी त्वथवा या स्यात्तामात्रेयीं विदुर्बुधा इति। विष्णुः। एतन्महाव्रतं ब्राह्मणं हत्वा द्वादशाब्दं कु
र्यात्। यागस्थं क्षत्रियं वैश्यं गर्भिणीं रजस्वलां चात्रिगोत्रां वेतियत्वंगिराः। आहिताग्नेर्द्विजातेस्तु हत्वा पत्नीमनिंदि
तां॥ ब्रह्महत्याव्रतं कुर्यादात्रेयीघ्नस्तथैव चेति। तथा गस्थपत्नीपरं॥ सवनस्थां स्त्रियं हत्वा चरेद्ब्रह्महणि व्रतमिति परा
शरोक्तेः। ब्रह्मवधव्रतं प्रक्रम्य॥ मनुः। उक्त्वा चैवानृतं साक्ष्ये प्रतिरुध्य गुरुं तथा। अपहृत्य च निक्षेपं कृत्वा च स्त्रीसु
हृद्वधमिति। विप्रवधफलिके कस्माच्चनृतोक्तिः। स्त्री सवनस्था पथावर्णमित्यनुवृत्तौ याज्ञवल्क्यः। चरेद्व्रतमहत्वापि

Indira Gandhi National
Centre for the Arts

द्यातार्थं चेत्समाहितः। अत्रातिदेशिकत्वात्पादोनमितिमदनादयः। अथ सवनस्थक्षत्रियादिवधे॥ मनुः। अकामतस्तु राजन्यं वि
३३ निपात्य द्विजोत्तमः ऋषभैकसहस्रा गा दद्यात्सुधर्थमात्मनः। त्र्यब्दं चरेद्वा नियतो जटी ब्रह्महणो व्रतं॥ गोहत्वं सवनस्थवधे
तिधनाढ्यस्य। तपस्वरा कृत्स्नेति मेधातिथिः। वैश्यहाष्टं चरेदेतद्दद्याद्वैकशतं गवां॥ षण्मासान् शूद्रहाप्येतद्धेनूर्दद्याद्दशा
थ वेति। कामतस्तु हारीतः। ब्राह्मणः क्षत्रियं हत्वा षड्वर्षाणि व्रतं चरेत्। वैश्यं हत्वा चरेदेवं व्रतं त्रैवार्षिकं द्विजः। शूद्रं हत्वा च
रेद्वर्षं ऋषभैकादशाश्च गा इति। श्रोत्रियवधे तु स एव॥ तुरीयो नंक्षत्रियस्य वधे ब्रह्महणि व्रतं। अर्द्धं वैश्यवधे कुर्यात्तुरीयं
वृषलस्य तु यमः। कृच्छ्रातिकृच्छ्रं कुर्वीत चान्द्रायणमथापि वा चरेत्। दशसंख्याश्च गा दद्याद्दंगच्छेदी यदा भवेत्। अंगच्छेदस्तेषां
समुच्चय इति शूलपाणिः। योगीश्वरः। विप्रदण्डोद्यमे कृच्छ्रस्त्वतिकृच्छ्रो निपातने। कृच्छ्रातिकृच्छ्रो सृक्पाते कृच्छ्रोऽभ्यन्तरशोणि
ते दण्डः शास्त्रस्याप्युपलक्षकः। बृहस्पतिः। काष्ठादिना ताडयित्वा त्वग्भेदे कृच्छ्रमाचरेत्। अस्थिभेदे तु कृच्छ्रं तु पराकं चांग
कर्त्तने। याज्ञवल्क्यः। गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः। बध्वा च वाससा क्षिप्रं प्रसाद्योपवसेद्दिनं। सुमन्तुः। देवर्षि स्म.
गोब्राह्मणाचार्यमातापितृनरेन्द्राणां प्रतिविनदनेन आक्रोशने जिह्वां दहेद्धिरण्यं दद्यादिति। एतदभ्यासविषयं॥ यमः। ३३

आबध्य ब्राह्मणं कण्ठे प्रायश्चित्तं विधीयते। त्रिरात्रोपोषितः स्नात्वा प्रणिपत्य प्रसादयेत्॥ मिथ्याभिशंसने याज्ञवल्क्यः। मिथ्या
भिशंसने दोषो द्विः समो भूतवादिनः॥ मिथ्याभिद्विस्तदोषं च समादत्ते मृषा वदन्। प्रायश्चित्तमाह। वसिष्ठः। ब्राह्मणमनृतेना
भिशस्य पतनीयेनापतनीयेन वा मासमब्भक्षः शुद्धवतीरावर्त्तयेत्। शुद्धवतीरेतो न्विन्द्रमित्याद्याः। याज्ञवल्क्यः। महापा
पोपपापाभ्यां योभिशंसेन्मृषापरं। अब्भक्षो मासमासीत स जापी नियतेन्द्रियः। उपपापाभिशापे आहतुः इदं सकृच्छ्रम
हापापाभिशंसने। गुरुविषये कामतस्तदाः हतौ तु शंखलिखितौ। नास्तिकः कृतघ्नः। कूटव्यवहारी ब्राह्मणवृत्तिघ्नो मिथ्या
शंसी चेत्येते षड्वर्षाणि ब्राह्मणगृहेषु भैक्षं चरेयुः संवत्सरं धौतभैक्षमश्नीयुः षण्मासान्वा अनुगच्छेयुरिति। एतत्सजा
तीयेन सजातीयेभिशस्ते सति विजातीये तु प्रतिलोमापवादे द्विगुणस्त्रिगुणो दमः। वर्णानामानुलोम्ये तु तस्मादर्धार्धहानितः
इति याज्ञवल्क्योक्तदण्डानुरूपं बोध्यं॥ ॥ अथ प्रसंगान्मिथ्याभिशस्तस्य। याज्ञवल्क्यः। अभिशस्तो मृषा कृच्छ्रं चरेदाग्नेय
मेव वा॥ निर्वपेत्तु पुरोडाशं वायव्यं पशुमेव वा। एतदुपपातकपरं अतिपातके तु एतेनाभिशस्तो व्याख्यात इति वासिष्ठो मासमब्भ
क्षणं। अतिपापे महापापे च पैठीनसिः। अनृतेनाभिशस्यमानः कृच्छ्रं मासं चरेत्। पातकेषु। महापातकेषु द्विमासं कृच्छ्रमिति॥

Indira Gandhi National Centre for the Arts

जातिमात्रक्षत्रियादिवधे तु मनुः। तुरीयो ब्रह्महत्यायाः क्षत्रियस्य वधे स्मृतः। वैश्येऽष्टमांशो वृत्तस्थे शूद्रे ज्ञेयस्तु षोडश इति।
३४ क्षत्रियस्य वधं कृत्वा चरेच्चांद्रायणत्रयं। वैश्यस्य तु द्वयं कुर्याच्छूद्रस्यैकं तथैव तु। अस्मिन्नेव विषये मनूक्तानि त्रैमासिकद्वै
मासिकमासिकान्युपपातकसामान्यप्रायश्चित्तानि ज्ञेयानि। अकामतस्तु याज्ञवल्कीयं त्रिरात्रोपवाससहितमृषभैका
दशगोदानं॥ मासं पंचगव्याशनं॥ कृच्छ्रातिकृच्छ्रौ चेति क्रमात् ज्ञेयं न चैषां सामान्यविहितत्वाद्विशेषविहितैः प्रायश्चि
त्तैर्बाधः। स्त्रीशूद्रक्षत्रविट्शूद्रवध इति क्षत्रियादिवधस्योपपातकत्वोक्तेरानर्थक्यापातात्॥ एवं सर्वेष्वप्युपपातके
षु सामान्यविशेषविहितानामवस्था ज्ञेया। पराशरः। वैश्यं शूद्रं क्रियायुक्तं विकर्मस्थं द्विजोत्तमं। हत्वा चांद्रायणं त
स्य त्रिंशद्गाश्चैव दक्षिणा इति द्विजोत्तमः पतितो विप्रः क्षत्रियश्चेति माधवः। अप्यधनहर्तुः प्रेतक्रियाया अकरणे॥
शंखः। प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः। वर्णानां यद्वधे प्रोक्तं तद्व्रतं प्रयतश्चरेत्॥ अज्ञानात्तु दुष्टेतक्षत्रियादि
वधे तु संवर्त्तः। निहत्य क्षत्रियं मोहात्त्रिभिः कृच्छ्रैर्विशुध्यति। तथा। कृच्छ्रातिकृच्छ्रौ कुर्वीत सन्नरो वैश्यघातकः। कुर्या एम०
च्छूद्रवधे विप्रः कृच्छ्रं सांतपनं तथेति। पराशरः॥ शिल्पिनं कारुकं शूद्रं स्त्रियं वा यस्तु घातयेत्। प्राजापत्यद्वयं कृत्वा वृषै ३४

कादशदक्षिणेति। एतानि तु प्रायश्चित्तानि क्षत्रियादिहंतुर्विप्रस्यैव क्षत्रियादेः सजातीयवधे तु पादपादन्यूनं॥ वैश्यस्य क्षत्रियव
धे द्विगुणं॥ शूद्रस्य विट्क्षत्रिययोर्वधे द्विगुणं त्रिगुणं चेत्युक्तं प्राक्। व्यभिचारिणस्तु वधे तु याज्ञवल्क्यः॥ चांद्रायणं चरेत्स
र्वानवकृष्टान्निहत्य तु॥ अवकृष्टा व्यभिचारजाः। हारीतः॥ चंडालवधसंप्राप्तिर्ब्राह्मणस्य भवेद्यदि। कारयेत् द्वादशं कृ
च्छ्रं तप्तकृच्छ्रं ततो भवेदिति॥ अंगिराः॥ सर्वान्त्यजानां गमने भोजने च प्रमापणे। पराकेण विशुद्धिः स्यादित्यांगिरसभाषितमि
ति। एतद् ज्ञानतो वधे ज्ञानतस्तु चांद्रायणमिति॥ विज्ञानेश्वरः। विपरीतमिति तु माधवः। तदाह लौगाक्षिः। हनने प्रतिलो
मानां शूद्रजानां कथं भवेत्। ज्ञानपूर्वे पराकस्यादज्ञानादैंदवं तथेति चांद्रायणं द्विविधमष्टधेनुकं त्रिधेनुकं च। पराको
पि पंचधेनुकस्त्रिधेनुकश्चेति द्विविधः। तत्र ज्ञाने महतोश्चांद्रायणपराकयोर्निवेशः॥ अज्ञानतस्तु अल्पयोरिति यं
थयोर्विरोधः। यत्तु मासा इत्यनुवृत्तौ ब्रह्मगर्भः। अंतरप्रभवाणां तु सूतादीनां चतुर्द्विषडिति तत्कामतोभ्यासविषयं त
त्र सूतस्य वधाभ्यासे षण्मासाः। वैदेहकस्य चत्वारः। चंडालस्य द्वौ मागधस्य चत्वारः। क्षत्तुरायोगवस्य च द्वाविति श्वपा
कचंडालयोश्चौरयोर्वधे तु देवलः। चौरः श्वपाकचंडालौ विप्रेणाभिहतौ यदि। अहोरात्रोषितो भूत्वा घृतं प्राश्य विशुध्य

Indira Gandhi National
Centre for the Arts

तीति॥ ॥अथस्त्रीवधे॥ ॥हारीतः। षड्वर्षाणि राजन्ये त्रीणि वैश्ये अर्धमर्द्धं शूद्रे क्षत्रियवत्। ब्राह्मणीषु वैश्यवत् क्षत्रियासु
३५ शूद्रवत्॥ वैश्यासु शूद्रार्धमितरासु। शूद्रार्धं नवमासिकं। इतरासु शूद्रासु। एतच्च श्रोत्रियपत्न्याः गुणवत्याः कामतो वध
विषयं॥ सपत्नमातृभगिनीपितृष्वसृमातृष्वसृमातुलानीपितृव्यपत्नीभ्रातृभार्याश्वश्रूणां वधेप्येतास्वेव पादोनानि स
पिंडासगोत्राणां वधेर्धानि। आसामेव श्रोत्रियपत्नीत्वादिगुणविशेषे तत्तत्प्रायश्चित्तं द्विगुणं कल्प्यमिति निबंधकृतः। आसा
मेवाकामतो वधे तदेवार्द्धकल्प्यं। यत्तु गौतमः शूद्रे संवत्सरं वृषभैकादशाश्च गा दद्यादनात्रेय्यां चैवमिति तद्गुणविप्रमात्र
पत्नीवधविषयं॥ यत्तु शातातपः। स्त्रीघाती कृच्छ्रं षण्मासमिति तदत्रैवाकामतो द्रष्टव्यं। प्रतिलोमात्प्रसूतानां ब्राह्मण्यादी
नां अकामतो वधे योगीश्वरः। दुष्टं तत्र ब्रह्मविट्क्षत्रशूद्रयोषाः प्रमाप्य तु। दृतिं धनुर्बस्तमविं क्रमाद्दद्याद्विशुद्धये॥ दृतिः कौ
शः। बस्तः छागः अविर्मेषः। अप्रदुष्टचतुर्णामपि वर्णानां नारीं हत्वानवस्थिताः शंखमुक्ताजमेषांश्च क्रमाद्दद्याद्विशु
द्धये। अत्र शंखमुक्तौ अजापेक्षयाधिकमूल्ये ज्ञेये। इत्यादिदाने यथाशक्ति सुवर्णमपि दरिद्राणां देयेत्यपरार्के॥ कामतस्त्वा एम.
हत्ब्रह्मगर्भः॥ प्रतिलोमप्रसूतानां स्त्रीणां मासावधिस्मृताः। अंतरप्रभवाणां च शूद्राणां च चतुर्द्विषट्॥ ब्राह्मणी क्षत्रि ३५

या वैश्यानां वधे क्रमेण षट्चतुर्द्विसंख्या मासा इत्यर्थः। शूद्रायां त्वेकः। अंतरप्रभवाणामिति व्याख्यातं वैश्यावधे किंचिद्देयं॥
वैशिके नाकिंचिदिति गौतमोक्तेः॥ किंचित् जलं। शूद्रायामविकं। वैश्यां हत्वा दद्याज्जलं। न रहस्यां गिरसोक्तेः अपरार्के तु गौ
तमीये। वैश्ये किंचिन्न देयमित्यर्थं कृत्वा आंगिरसे वैश्यां हत्वा जलं स्रवेदिति पठितं॥ सकृदभिचरित विप्रादिवधे प्रचेताः।
अनृतुमतीं ब्राह्मणीं हत्वा कृच्छ्राब्दं षण्मासांश्चेति क्षत्रियां हत्वा षण्मासान् मासत्रयं चेति वैश्यां हत्वा मासत्रयं सार्द्धमा
सं वेति शूद्रां हत्वा सार्द्धमासं विंशत्यहानि वेति॥ योगीश्वरोपि। अप्रदुष्टां स्त्रियं हत्वा शूद्रहत्याव्रतं चरेत्। शूद्रहत्याव्र
तं योगीश्वरोक्तं षाण्मासिकं दशधेनुदानं वा॥ अत्र षाण्मासिकमज्ञानात्। ब्राह्मणीवधे ज्ञानात्। क्षत्रियावधे चाज्ञानाद्वै
श्यावधे दशधेनुदानमिति विज्ञानेश्वरः। क्वचित्तु स्त्रीवधे प्रयोजकस्य प्रायश्चित्ताभावं अभ्युदयं चाह॥ अपरार्के व्यासः॥
अकामतः स्त्रियं हत्वा ब्राह्मणीं वैश्यवच्चरेत्। कामतो द्विगुणं प्रोक्तं प्रदुष्टायां न किंचन॥ पुण्यान् लोकानवाप्नोति शू
द्रां यस्त्यानयेत्॥ पतिघ्नीमथ भर्तृघ्नीं सा हि संकरकारिणी॥ ॥अथ गोवधे॥ ॥मनुः॥ उपपातकसंयुक्तो गोघ्नो मासं
यवान् पिबेत्। कृतवापो वसेद्गोष्ठे चर्मणा तेन संवृतः। चतुर्थकालमश्नीयादक्षारलवणं मितं॥ गोमूत्रेणाचरेत्स्नानं

Indira Gandhi National
Centre for the Arts

३६ द्वौ मासौ नियतेंद्रियः॥ दिवानुगच्छेत्ता गास्तु तिष्ठन्नूर्ध्वं रजः पिबेत्। शुश्रूषित्वा नमस्कृत्वा रात्रौ वीरासनं वसेत्॥ ति
ष्ठतीष्वनुतिष्ठेत्तु व्रजंतीष्वनुचव्रजेत् आसीनासु तथासीनो नियतो वीतमत्सरः॥ आतुरामभिशस्तां वा चोरव्याघ्रादि
भिर्भयैः। पतितां पंकलग्नां वा सर्वप्राणैर्विमोचयेत्॥ उष्णे वर्षति शीते वा मारुते वाति वा भृशं। न कुर्वीतात्मनस्त्रा
णं गोरकृत्वा तु शक्तितः॥ आत्मनो यदि वान्येषां गृहे क्षेत्रेऽथवा खले। भक्षयंतीं न कथयेत्पिबंतं चैव वत्सकं॥ अनेन
विधिना यस्तु गोघ्नो गा अनुगच्छति। स गोहत्याकृतं पापं त्रिभिर्मासैर्व्यपोहति। वृषभैकादशा गास्तु दद्यात्सुचरितव्र
तः। अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति। यवान् गोमूत्रपक्वान्। गोमूत्रेण यवागूं कृतामिति माधवोक्तेः। कृतवापः स
शिखं कृतवपनः॥ सशिखं वपनं कृत्वेति पराशरोक्तेः॥ अत्राद्येन श्लोकेन एकं व्रतमुक्तं॥ द्वितीयेनापरं॥ अवशिष्टश्लो
केस्तु तृतीयमिति॥ व्रतत्रयं क्रमात् शूद्रक्षत्रियविप्रस्वामिकगोवधेषु अवसेयं॥ विप्रस्वामिकगोवध एवानुमंत्रनु
ग्राहकसाक्षात्कर्तृषु वेति विज्ञानेश्वराहृदयः। उक्तान्वयव्रतत्रयमेकमेव षाण्मासिकं व्रतमिति केचित्। युक्तं चेदं। एतदे एम
वव्रतं कुर्युरुपपातकिनो द्विजा इति मनुनैकत्वेन परामर्शात्। तच्च कामतो गुरुवद्विप्रस्वामिकगोवधविषयं॥ याज्ञव ३६

ल्क्यः॥ पंचगव्यं पिबन् गोघ्नो मासमासीत संयतः। गोष्ठेशयो गोनुगामी गोप्रदानेन शुध्यति। कृच्छ्रं चैवातिकृच्छ्रं च चरेद्वापि समा
हितः॥ दद्यात्त्रिरात्रं वोपोष्य वृषभैकादशास्तु गा इति॥ एतच्च मनूक्तविषय एवाकामतो ज्ञेयं॥ माधवः। गां चेद्धन्यान्नरः
कामात्सगणः सप्तरात्रं तथाश्रोत्रियाय दरिद्राय दद्याच्छुध्यर्थमात्मन इति। शंखः। पादं तु शूद्रहत्यायामुदक्यागम
ने तथा॥ गोवधे च तथा कुर्यात्परस्त्रीगमने तथेति॥ तच्छ्रोत्रियकुटुंबिविप्रस्वामिककपिलकर्मांगभूतगोवधपरं॥ अत एव
बृहस्पतिः। गर्भिणीं कपिलां दोग्ध्रीं होमधेनुं च सुव्रतां॥ खड्गादिना घातयित्वा द्विगुणं व्रतमाचरेदिति॥ विशिष्टायां गवि वि
शेषप्रायश्चित्तमाह॥ अत एव स्त्रीगर्भिणीगोगर्भिणीबालवृद्धवधेषु न्यूनाहीनयतीति ब्रह्महत्याव्रतमतिदिष्टं॥ अस्मि
न्नेव विषये यमः। गोसहस्रं शतं वापि दद्यात्सुचरितव्रतः॥ अविद्यमाने सर्वस्वं वेदविद्भ्यो निवेदयेदिति॥ गोगर्भवधे तु वृ
द्धशातातपे विशेष उक्तः। पादमुत्पन्नमात्रे तु द्वौ पादौ दृढतां गते॥ पादोनं व्रतमुद्दिष्टं हत्वा गर्भमचेतनं॥ अंगप्रत्यंगसंपूर्णे
गर्भे चेतःसमन्विते। द्विगुणं गोव्रतं कुर्यादेषा गोघ्नस्य निष्कृतिरिति॥ बृहत्प्रचेताः॥ एकवर्षे हते वत्से कृच्छ्रपादो विधी
यते॥ अबुद्धिपूर्वं वत्सः स्यात् द्विपादं स्याद्द्विहायने॥ त्रिहायने त्रिपादः स्यात्प्राजापत्यमतः परमिति। एतच्च प्रायश्चित्तम

Indira Gandhi National
Centre for the Arts

त्वाद्बुद्धिपूर्वकाधमसंबंधिगोवधविषयं॥ यमः। काष्ठलोष्ठादिभिर्गावः शस्त्रैर्वा निहता यदि॥ प्रायश्चित्तं कथं तत्र
३७ शस्त्रे शस्त्रे विधीयते॥ काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्ठके॥ तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकं॥ प्रायश्चि
त्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं॥ त्रिंशदाढकपर्णं चैकं दद्यात्तेभ्यश्च दक्षिणामिति॥ संवर्त्तः॥ एका चेद्बहुभिः काचिद्दै
वाद्व्यापादिता यदि॥ पादं पादं तु हत्यायाश्चरेयुस्ते पृथक् पृथगिति। यादृग्विधगोहत्यायां यद्व्रतमुपदिष्टं तस्य पादं द
त्यर्थः॥ आपस्तंबः। पाषाणैर्लगुडैर्वापि शस्त्रेणान्येन वा बलात्। निपातयंति ये गास्तु कृत्स्नं कुर्युर्व्रतं हि ते॥ तथैव बा
हुजंघोरुपार्श्वग्रीवादिमोचनैरिति। लगुडं दंडः॥ स चांगुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणतः। आर्द्रस्तु सपला
शश्च दंड इत्यभिधीयत इति पराशरोक्ताधिकप्रमाणस्यापि स्थूलविशेषे दोषहेतुत्वमस्त्येव॥ पराशरः॥ दंडादूर्ध्वं
यदन्येन प्रहरेद्यदि घातयेत्। प्रायश्चित्तं तदा प्रोक्तं द्विगुणं गोवधे चरेदिति। स एव। मूर्छितः पतितो वापि दंडेनाभि
हतः स तु। उत्थितस्तु यदा गच्छेत्पंच सप्त दशैव वा। ग्रासं वा यदि गृह्णीयात्तोयं वापि पिबेद्यदि। पूर्वव्याध्युपसृ एम.
ष्टश्चेत्प्रायश्चित्तं न विद्यत इति॥ पराशरः॥ रोधबंधनयोक्त्राणि घातश्चेति चतुर्विध इति। स एव॥ गोवाटे वा ३७

गृहे वापि दुर्गेष्वप्यसमस्थले॥ नदीष्वथ समुद्रेषु अन्येषु च नदीमुखे॥ दग्धदेशे मृता गावः स्तंभनाद्रोध उच्यते। योक्त्रदामक
डोरैश्च कंठाभरणभूषणैः॥ गृहे वापि वने वापि बद्धा स्याद्गौर्मृता यदि। तदेव बंधनं विद्यात्कामाकामकृतं च यत्। हले वा
शकटे पंक्तौ पृष्ठे वा पीडितो नरैः। गोपतिर्मृत्युमाप्नोति योक्त्रो भवति तद्वधः। मत्तः प्रमत्त उन्मत्तः चेतनो वाप्यचेतनः। का
मकामकृतक्रोधो दंडैर्हन्याद्दृषोपलैः। प्रहता वा मृता वापि तद्धि हेतुर्निपातन इति। आपस्तंबः। दमने दामने चैव
रोधे संघातयोजने। न स्तंभः सकलपात्तैर्वा मृते पादोनमाचरेत्॥ दामनं नेमेद्धिबंधनं। संवर्त्तः। आपन्नानां बहूनां तु रो
धने बंधनेपि वा॥ भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेदिति॥ व्यासः। औषधं लवणं चैव पुण्यार्थमपि भोजनं॥
अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत्। अतिरिक्ते विपत्तिश्चेत् कृच्छ्रपादो विधीयत इति अपवादमाह। स एव। औ
षधे तु न दोषोस्ति स्वेच्छया पिबतो यदि। अन्यथा दीयमाने तु प्रायश्चित्तं न संशय इति। एतत्तु न भिन्नस्य। अभिन्नस्य तु
न दोषो यथाह संवर्त्तः। यंत्रणे गोचिकित्सार्थे मूढगर्भविमोचने। यत्ने कृते विपत्तिः स्यात्स पापेन न लिप्यते॥ यंत्रणं
व्याध्यादिनिर्यातनार्थं संदंशनादिप्रवेशनेन यावदहच्छेदशिराभेदप्रयोगेरुपकुर्वतां। द्विजानां गोहितार्थं तु प्रायश्चि

Indira Gandhi National
Centre for the Arts

तन्न विद्यत इति॥ पराशरोपि। ग्रामघाते शरौघेण वेश्मभंगनिपातने॥ अतिवृष्टिहतानां च प्रायश्चित्तं न विद्यत इति॥ तथा
३८ कूपखाते च धर्मार्थे गृहदाहे च या मृता॥ ग्रामदाहे तथा घोरे प्रायश्चित्तं न विद्यत इति। एतच्च बंधनादिरहितस्यैव क
थंचिद्दहनादिविषयं इतरत्र त्वापस्तंबः। कांतारेषु च दुर्गेषु गृहदाहे खलेषु च यदि तत्र विपत्तिः स्यात्पादएको वि
धीयइति। पराशरः॥ दहनात्तु विपद्येत अनड्वान्योक्त्रयंत्रितः। उक्तं पराशरेणैव। एकपादं यथाविधीति॥ बलछ
लादिना येन कारितेऽधारौ त्वापस्तंबः। पादमेकं चरेद्रोधे द्वौ पादौ बंधने चरेत्॥ योजने पादहीनं स्याच्चरेत्सर्वं निपातने इ
ति। पराशरः। गवां बंधनयोक्त्रे तु भवेन्मृत्युरकामतः। अकामकृतपापस्य प्राजापत्यं विनिर्दिशेत्॥ प्रायश्चित्ते ततश्चीर्णे
कुर्याद्ब्राह्मणभोजनं। अनडुत्सहितां गां च दद्याद्विप्राय दक्षिणामिति॥ व्यासः। कंठाभरणदोषेण विपत्तिर्यत्र गोर्भवेत्।
गोघ्नार्धं तु चरेत्तत्र भूषणार्थं हि तत्स्मृतमिति। आपस्तंबे नाग्निदाहादौ विशेष उक्तः॥ अतिदाहातिवाहाभ्यां नासि
काछेदने तथा॥ नदीपर्वतसंरोधे मृते पादोनमाचरेत्॥ अपवादमाह पराशरः। अयंत्रांकनलद्रुमाभ्यां वाहने मोचने एम॰
तथा॥ स्नायं संगोपनार्थं च न दुष्येद्रोधबंधन इति॥ पराशरः॥ अतिदाहे चरेत्पादं द्वौ पादौ वाहने चरेत्॥ नासिकापा ३८

दहीनं तु चरेत्सर्वं निपातन इति॥ नासाभेदनदाहेषु कर्णछेदनबंधने॥ अतिदोहातिवाहाभ्यां कृच्छ्रं चांद्रायणं चरेदिति। त
त्कपिलत्वादनेकगुणदक्षिणमिति॥ स्वामिनो गोहस्ते दृष्टे प्रायश्चित्तमाह व्यासः। जलौघपल्वले मग्ना मेघविद्युद्धतापि वा॥
श्वभ्रे वा पतिता कस्मात् श्वापदेनापि भक्षिता। प्राजापत्यं चरेत्कृच्छ्रं गोस्वामी व्रतमुत्तमं॥ शीतवातहता वा स्यादुद्बंधनमृ
ता पि वा॥ शून्यागारउपेक्षायां प्राजापत्यं विनिर्दिशेदिति स्वामीतिपालकस्याप्युपलक्षणं। तत्कार्यांतरवैयग्र्यादुपेक्षायां
त्वर्द्धं॥ अत एव विष्णुः। पल्वलौघमग्नाभ्रश्वापदादिनिपातने। श्वभ्रप्रपातसर्पाद्यैर्मृते कृच्छ्रार्द्धमाचरेदिति॥ अत ए
व आपालनात्तु कृच्छ्रः स्याच्छून्यागारउपल्लव इत्यनेन तेनैवोपेक्षायां प्राजापत्य उक्तः। आपस्तंबः। अस्थिभंगं गवां कृत्वा
लांगूलछेदनं तथा॥ पातने दंतशृंगाणां मासार्द्धं तु यवान्पिबेत्। इति। एतत्कामतः। अकामतस्तु। अंगिराः। शृंगभं
गेस्थिभंगे वा चर्मनिर्मोचनेपि वा॥ दशरात्रं पिबेद्व्रत्नं स्वस्थापि यदि गोर्भवेदिति। पराशरः। पाषाणेनैव दंडेन गा
वो येनाभिघातिताः॥ शृंगभंगे चरेत्पादं द्वौ पादौ नेत्रघातने॥ लांगूले पादकृच्छ्रं तु द्वौ पादावस्थिभंजने। त्रिपादं चैव
कर्णे तु चरेत्सर्वं निपातने। इति स एव। शृंगभंगे स्थिभंगे च कटिभंगे तथैव च॥ यदि जीवति षण्मासान्प्रायश्चित्तं न वि

Indira Gandhi National
Centre for the Arts

घातइति। व्यासः यवसं चोपहर्त्तव्यं यावद्दोहेन तद्गुणं॥ संपूर्णोर्द्दत्त्रिणां द्घान्नतः पापात्प्रमुच्यते॥ पराशरः॥ यद्यसंपूर्णसर्
३९ वांगो हीनदेहो भवेन्नरः॥ गोघातकस्य तस्यार्द्धं प्रायश्चित्तं विनिर्द्दिशेत्॥ स एव। प्रेरयेत् कूपवापीषु वृक्षच्छेदेषु पातयेत्। ग
वीशानेषु विक्रीतस्ततः प्राप्नोति किल्बिषमिति। कूपवाप्यादिनिम्नेषु पातनार्थं वृक्षच्छेदनादि दुर्गमेषु भक्षणार्थं प्रेरणे गो
मांशानहस्ते गोविक्रये च गोवधपापमित्यर्थः। स एव। गोवृषाणां विपत्तौ च यावंतः प्रेक्षकाजनाः। अनिवारयतां तेषां सर्वे
षां पातकं भवेत्॥ संभावितगोपतनदेशे स्वोपभोगार्थकूपादिखनने दोषमाह॥ स एव। वेश्मद्वारनिवासेषु यो नरः खातु
मिच्छति। स्वकार्यगृहखातेषु प्रायश्चित्तं विनिर्द्दिशेत्॥ स्वकार्यपराद्धर्मार्थेन दोषः। तथा च स एव। कूपखाते तटायाते
दीर्घखाते तथैव च॥ अन्येषु धर्मखातेषु प्रायश्चित्तं न विद्यत इति॥ दीर्घखातं वाप्यादि। अत्र स्वयमेव जलार्थं गतेभ्य
ते च न दोषइत्याह स एव। कूपखाते तटाबंधे नदीबंधे प्रपासु च। पानीयेषु विपन्नानां प्रायश्चित्तं न विद्यते। तच्चाहितार्थे
विहितरज्जुबंधने ज्ञेयं॥ अपरार्के व्यासः। अथात्र चेद्वद्धं काष्ठं गोर्गोपि नेम्नते॥ गोमूत्रेण तु संमिश्रं त्रिरात्रं पाव
कं पिबेदिति। एतन्निषेधरज्जुबंधनपरं॥ रज्जुविधिनिषेधो प्रागुक्तौ। न नारिकेलैर्न च शाणवल्कलैर्न चापि मौंजे ३९

ननवन्नश्रृंखलैः। एतैस्तु गावो न निबंधनीया बध्वा तु तिष्ठेत् परशुं गृहीत्वा॥ अन्यगोवधे विशेषमाह मनुः। यो पस्य हिंसा
द्द्व्याणि ज्ञानतो ज्ञानतो पि वा॥ स तस्योत्पादयेत् तुष्टिं राज्ञेदद्याद्व तत्समं॥ पराशरः। प्रमापणे प्राणभृतां दद्यात् प्रतिरूप
कं॥ तस्यानुरूपं मूल्यं वा दद्यादित्यब्रवीद्यमः॥ ब्राह्मे॥ आहैगोपतनयेद्दत्वा गोमूल्यं साधु कल्पितमिति एतानि च सर्वाणि प्राय
श्चित्तानि वृषवधेपि भवंति। निमित्तवाक्ये गवामनुवादेन तत्रस्त्रीलिंगस्याविवक्षितत्वात्। दानं तु स्त्रीगवीनामेव। तद्वाक्ये ग
वां विधेयत्वेन तत्रस्त्रीत्वस्य विवक्षितत्वात्। गोसहस्रं शतं वापीत्यादौ लिंगविशेषनिर्द्देशाभावेपि स्त्रीगवीनो भवत। तासां दुग्धा
दिद्वारा बहूपकारकत्वात्॥ अत एव गोश्चाश्वश्चाश्वतरश्चेत्यत्र गोलिंगविशेषानिर्द्देशेपि तस्य द्वादशशतं दक्षिणेति तच्छेषे
नाश्वादीलिंगस्य गोपदस्य मर्शीइ व स्त्रिया एवास्या ग्रहणे बहूपकारकत्वमेव विनिर्द्देनमिति भवति। अन्यथा तत्र दृषाणामपि
दानमापद्येतेति दिक्॥ याज्ञवल्क्यः। गजे नीलवृषाः पंच शुके वत्सो द्विहायनः। खराजमेषेषु वृषो देयः क्रौंचे त्रिहायनः।
मनुः। वासो दद्याद्धयं हत्वा पंचनीलान्वृषान् गजं। अजमेषावनड्वाहं खरं हत्वैकहायनमिति एतानि प्रायश्चित्तानि धनि
कविषयाणि॥ निर्धनस्य तु जाबालिः हस्तिनं तुरगं हत्वा महिषं गां तथैव च॥ कृच्छ्रं सांतपनं कुर्यात्सोष्ट्रकन्यानन्तेषु

चा॥ विष्णुः॥ हस्तिनं तुरगं हत्वा महिषोष्ट्रौ कपिं तथा॥ एषु सर्वेषु कुर्वीत सप्तरात्रमभोजनं इदमभ्यासविषयं। अस्मिन्नेव
४० विषयेऽपि सिंहव्याघ्रतुरंगीश्वमृगखड्गरुरुहद्विपान्॥ हत्वा सांतपनं कुर्याज्जीमूकमान्नतेषु च॥ सुमंतुः॥ वानरसिंहमार्जारमं
डूकमूषकाश्ववधे प्राजापत्यमिति पराशरः। हत्वा मूषकमार्जारसर्पाजगरडुंडुभान्। कृशरं भोजयेद्विप्रान् लोहदंडं च दक्षि
णेति विष्णुः हत्वा मूषकमार्जारनकुलमंडूकडुंडुभाजगराणामन्यतमं कृसरान्नं भोजयित्वा लोहदंडं दक्षिणां दद्यात्। यत्तु
शंखः। हत्वा द्विजस्तथा सर्पं विलेशयजलेशयौ॥ सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्मवधे तु यत् इति तत्कामतः पञ्चोशनाः। ख
रमार्जारमंडूकसर्पाजगरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत् किंचिद्दद्यादिति तदकामाभ्यासे॥ विष्णुः श्वानं हत्वा त्रिरा
त्रमुपवसेदिति। यत्तु माधवीये॥ पैठीनसिः। काकोलूककृकलासकर्कखरहकाश्मंगालभासवर्हिणमूषकचक्रवा
कहंसप्लवनकुलमंडूकविडालश्ववध एतेषामेकैकस्मिन्नृषभ इव धवद्विहितमिति। तत्कामतोऽत्यंताभ्यासविषयं॥
मनुः॥ हत्वा वानरं श्येनं भासौ च स्त्रीयेच्छ्रूसलणायगां॥ क्रव्यादस्त्वमृगान् हत्वा धेनुं दद्यात्पयस्विनीं॥ अक्रव्यादीवत्सतरी एम. ४०
मुष्टं हत्वा तु कृष्णलं। स एवा अग्निकार्ष्यप सीदद्यात्सर्पं हत्वा द्विजोत्तमः। पलालभारकं षंढे सैसकं चैव माषकं॥

तिस्रिरै तु तिलद्रोणं गवादीनामशक्नुवन्। दानं दातुं चरेत्कृच्छ्रं एकैकस्य विशुद्धये॥ प्रत्येकं प्राजापत्यं कुर्यात् इति केचित्
विज्ञानेश्वरस्तु। कृच्छ्रपरं तपोमात्रपरं। तपश्चिचासंवत्सरः षण्मासास्त्रयः पक्षस्ततो द्वादशेकश्चतुर्विंशत्यहो द्व्यहः त्र्यहः षड
हस्त्र्यहोहो रात्राश्चेति कालाः। एतान्येवानादेशे विकल्पेन क्रियेरन् एनःसिगुरुणि गुरूणि लघुनि लघूनि इति गौतमोक्तानि
तानि दानतारतम्येन व्यवस्थाप्यानीत्याह॥ याज्ञवल्क्यः। उरगेष्वायसो दंडः पंडके त्रपुसीसकं। कोले घृतघटो दद्यादुष्ट्रे गुंजा
हयेंऽशुकं॥ कोलः सूकरः। पंडकस्यमृगपंक्तिसमभिव्याहारात् स एव न तु गोविप्रादिः। तत्र तु तद्वधनिमित्तमेव लघुप्राय
श्चित्तमिति विज्ञानेश्वरः॥ मम तु यथा गोब्राह्मणवधनिषेधस्तज्जात्यवच्छेदेनैव प्रवर्त्तते न तज्जातीयपंडवधे इदं प्रायश्चि
त्तं तथा मृगादिजातिपुरस्कारेणापि प्रायश्चित्तस्योक्तत्वात्तत्रापि न प्रवर्त्तते अतो पत्रजातिविशेषपुरस्कारेण प्रायश्चित्तं नो
क्तं तज्जातीयपंडकवध एवैतत्प्रायश्चित्तमिति प्रतिभाति॥ माधवीये॥ कश्यपः। मृगमहिषवराहकुंजरगंडशरभरा
रुरुवानरसिंहव्याघ्रऋषभसरटशल्यकादीनामन्येषां च वधे होरात्रोषितस्त्रीर्णांते घृतं दद्यात्॥ व्यासः। सर्वांश्च प्राणिनः
स्थूलान् मंडूकनकुलेऽष्टहरितिइदमज्ञानतः स कृद्वधे॥ ज्ञानतस्तु याज्ञवल्क्यः॥ मार्जारगोधानकुलमंडूकश्वपत

Indira Gandhi National Centre for the Arts

४१ त्रिणः। हत्वाऽहं पिबेत् क्षीरं कृच्छ्रं वा पादिकं चरेत्॥ विष्णुः॥ गोधोलूकचाषकाकवधे त्रिरात्रमुपवसेत्॥ व्यासः॥ सूकरोष्ट्र
खरान् हत्वाऽहमेतद्व्रतं चरेत्॥ यत्तु वसिष्ठः। श्वमण्डूकमार्जारनकुलसर्पदर्दुरमूषकान् हत्वा कृच्छ्रं द्वादशरात्रं चरेत्॥
तदकामतोऽभ्यासविषयं॥ दर्दुरो लघुमूषकः। यत्तु मनुः॥ मार्जारनकुलौ हत्वा चाषं मण्डूकमेव च॥ श्वगोधोलूककाकांश्च
शूद्रहत्याव्रतं चरेत्॥ शूद्रहत्याव्रतं षाण्मासिकं॥ पयः पिबेत्त्रिरात्रं वा योजनं वाध्वनो व्रजेत्। उपस्पृशेत्स्रवन्त्यां वा
सूक्तं वाऽब्दैवतं जपेत्॥ पराशरः। वृककाककपोतानां सारीतित्तिरिघातकः। अन्तर्जले उभे संध्ये प्राणायामेन शुध्यति। वृकः
पक्षिविशेषः। संध्ये इत्यत्यन्तसंयोगे द्वितीया॥ यावद्भिः प्राणायामैः संध्याद्वयं समाप्यते तावतः कुर्यात्॥ प्राणायामेने
त्येकवचनमविवक्षितमिति माधवः। इदमकामतः सकृद्वधे। स एव। कारण्डवचकोराणां पिङ्गलाकुररस्य च॥ भारद्वाजा
दिकं हत्वा शिवं पूज्य विशुध्यति। पराशरः। भासं डुं चाषभासांश्च पारावतकपिञ्जलं। पक्षिणां चैव सर्वेषां अहोरात्रमभो
जनं॥ यत्तु संवर्तः। चक्रवाकं तथा क्रौञ्चं तित्तिरिं शुकसारिकं॥ गृध्रं श्येनमुलूकं च तथा पारावतानपि॥ टिट्टिभं कुक्कुटं एम०
हंसं सारसं भासमेव च॥ गृध्रे च टिट्टिभे खञ्जरीटके। यथागवितथा हत्वा भगवानङ्गिरा ञ्जालपादं च शरभमहोरात्रे ४१

ण शुध्यति। यदपि संवर्तः गृध्रश्येनशशादीनामुलूकस्य च घातकः। अपक्वाशी दिनं तिष्ठेत् त्रिकालं मारुताशन इति तत्का
मकृतवधपरं। यत्तु संवर्तः। हंसं बकं बलाकां च बर्हिणं तथा। सारसं चाषभासं च हत्वा त्रीन् दिवसान् क्षिपेदिति तद
भ्यासपरमिति माधवः। यत्त्वङ्गिराः। शुके भासे च गृध्रे च टिट्टिभे खञ्जरीटके। यथागवितथा हत्वा भगवानङ्गिरा अब्रवीदिति
तत्कामतोऽत्यन्ताभ्यासपरं॥ अतिधनिकस्य तित्तिर्यादौ विशेषमाह मनुः। घृतकुम्भं वराहे तु तिलद्रोणं तु तित्तिरिं॥ शुकं
द्विहायनं वत्सं क्रौञ्चं हत्वा त्रिहायनं॥ धनिकस्य कामतो बलाकादिवधे माधवीये कश्यपः। बकबलाकाहंससारसका
रण्डवचक्रवाककुररगृध्रश्येनखञ्जरीटटिट्टिभोलूकशुकसारिकातित्तिरमयूरमूषकामेजनककलविङ्ककपोतपारा
वतादीनां वधे प्रायश्चित्तमहोरात्रोषितः सर्वबीजानि दद्यादिति। धनिकस्याकामतो वधाभ्यासे तु याज्ञवल्क्यः। हंसश्ये
नकपिक्रव्याज्जलस्थलशिखण्डिनः। भासं हत्वा तु दद्याद्गामक्रव्यादस्तु वत्सिकां जलशब्देन बकादयः॥ स्थलशब्दे
न बलाकादय इति मिताक्षरायां॥ याज्ञवल्क्यः॥ किंचित्सास्थिवधे देयं प्राणायामस्त्वनस्थिक इति॥ किंचिदष्टमुष्टिधा
न्यं॥ मनुः॥ अस्थिमतां तु सत्वानां सहस्रस्य प्रमापणे॥ पूर्णे चानस्यनस्थ्नां तु शूद्रहत्याव्रतं चरेदिति॥ शूद्रहत्याव्रतं

Indira Gandhi National Centre for the Arts

षाण्मासिकं॥ अथात्मघाते॥ यमः जलाग्न्युद्बंधनभ्रष्टाः प्रव्रज्याभिदूहत्याव्रतंभाणम्नाशकच्युताः। विषप्रपतनप्रायःश
४२ स्त्रघातहताश्च ये॥ नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः॥ चांद्रायणेन शुध्यंति तप्तकृच्छ्रद्वयेन चेति॥ आत्मघातिपुत्रादि
र्न तज्जातीयवधप्रायश्चित्तं समुचितमेतत्कुर्यात्॥ मरणमध्यवसन्निवृत्ते तु वसिष्ठः॥ आत्महननाध्यवसाये जीवन्नात्मत्यागी
कृच्छ्रं द्वादशरात्रं चरेत्त्रिरात्रं चोपवसेदिति। एतदल्पाध्यवसाये। अग्निपातादिबह्वध्यवसाये तु पराशरः॥ जलाग्निपतने
चैव प्रव्रज्यानाशनेषु च॥ प्रत्यवसितवर्णानां कथं शुद्धिर्विधीयते। प्राजापत्यद्वयेनैव तीर्थाभिगमनेन च॥ वृषैकादशदा
नेन वर्णाः शुध्यंति ते त्रयः। ब्राह्मणस्य प्रवक्ष्यामि वनं गत्वा चतुष्पथे। सशिखं वपनं कृत्वा प्राजापत्यद्वयं चरेत् गोद्वयं
दक्षिणां दद्यात् शुद्धिं पाराशरोऽब्रवीत्॥ मुच्यते तेन पापेन ब्राह्मणत्वं च गच्छति। अध्यवसायादृत्तौ त्वंगिराः। यः प्रत्यव
सितो विप्रः प्रव्रज्याग्निजलादिभिः॥ अनाशकनिवृत्तश्च गृहस्थत्वे चिकीर्षति॥ चारयेत्त्रीणि कृच्छ्राणि त्राणि चांद्राय
णानि तु॥ जातकर्मादिभिः प्रोक्तैः पुनः संस्कारमर्हति॥ वैधमरणमध्यवसायत्यजतां तु पराशरः॥ जलाग्निपतने चैव एम.
प्रव्रज्यानशने तथा॥ अध्यवसन्निवृत्तानां प्रायश्चित्तं कथं भवेत्। ब्राह्मणानां प्रसादेन तीर्थानुसरणेन च॥ गवां च ४२

त्रातदत्तिर्न वर्णाः शुध्यंति ते त्रयः॥ ब्राह्मणस्य प्रवक्ष्यामि गत्वारण्यं चतुष्पथं॥ सशिखं वपनं कृत्वा त्रिसंध्यमवगाहनं॥
गायत्र्यष्टसहस्रं तु जपेच्चैव दिने दिने॥ मुच्यते सर्वपापेभ्यो ब्राह्मणत्वं च गच्छति॥ भिक्षार्थी प्रविशेद्ग्रामं गृहान्सप्त वनेव
सत्॥ धौतभिक्षां समश्नीयात्पादकृच्छ्रेण विशुध्यतीति॥ अनुगमनान्निवृत्तौ त्वापस्तंबः। चितिभ्रष्टा तु या नारी मोहात्प्रचलि
ता ततः। प्राजापत्येन शुध्येत तस्माद्वै पापकर्मण इति। आत्मघातिप्रेतक्रियायां तु वसिष्ठः॥ य आत्मघातिनः कुर्यात्स्नेहा
त्प्रेतक्रियान्नरः। स तप्तकृच्छ्रसहितं चरेच्चांद्रायणव्रतं॥ उशना। प्रायोनाशकशस्त्राग्निविषोद्बंधतरणोदकैः। काष्ठाद्यै
श्चात्मनो हंतुर्नृपब्रह्मसरीसृपैः। शृंगिदंष्ट्रिश्वचांडालविद्युताभिहतस्य च॥ तथा संकरजातस्य नाशौचोदकवद्व्रपः।
तस्य शेषं यदि वा क्रोशेद्दिनमेकमभोजनं॥ अज्ञानाद्दहनादौ तु कृच्छ्रः सांतपनः स्मृतः॥ बुद्धिपूर्वे पुनस्तस्य कृच्छ्रो गो
मूत्रयावकः। तप्तकृच्छ्रोपि वा शक्तौ मासं भिक्षाशिनोपि वा कृत्वा च वहनादीनि प्रायश्चित्तमकुर्वतां॥ तप्तकृच्छ्रद्वया
च्छुद्धिरेकरएवानुयायिनां॥ आत्मघातनिमित्तं प्रायश्चित्तमकुर्वतां॥ आत्मघातिपुत्रादीनामित्यर्थः। च्यवनः॥ आ
त्मघातकस्पर्शनवहनदहने तप्तकृच्छ्रं चरेद्विंशतिगावो दक्षिणा ब्राह्मणेभ्य इति॥ पराशरः॥ चंडालेन श्वपाकेन

Indira Gandhi National Centre for the Arts

गोभिर्विप्रो हतो यदि। आहिताग्निर्हतो विप्रो विषेणापि हतोपि वा॥ लौकिकाग्निना स दग्धव्यो मंत्रसंस्कारवर्जितः॥ स्पृष्ट्वा
४२ दृष्ट्वा च वोढा च सपिंडेषु च तत्सयः। प्राजापत्यं चरेत्पश्चाद्विप्राणामनुशासनं। दग्धास्थीनि पुनर्गृह्य क्षीरे प्रक्षालयेद्बुधः
॥ स्वाग्निभिश्च पुनर्दाहः स्वमंत्रेण पृथक्पृथक्। एतच्च बुद्धिपूर्वक आत्मघाते॥ प्रायो नाशकशस्त्राग्निविषोदकोद्बं
धनप्रपतनैश्चेच्छतामिति गौतमोक्तेः। अथापमृत्यौ तु भविष्यत्पुराणे॥ चंडालगोब्राह्मणाग्निपशुदंष्ट्रिसरीसृपैः॥
प्रमादान्मरणे चाब्दं तप्तकृच्छ्रमथापि वा॥ स्मृत्यर्थसारे तु। तप्तकृच्छ्रद्वयं पंचदशकृच्छ्राणि वा कृत्वा दाहादि कार्यमिति॥
आंगिराः॥ अथ कश्चित्प्रमादेन म्रियतेग्न्युदकादिभिः। तस्याशौचं प्रकुर्वीत कर्तव्या चोदकक्रियेति। ऊर्ध्वोच्छिष्टादि
मरणे पराशरांगिरसौ॥ ऊर्ध्वोच्छिष्टे त्वधोच्छिष्टे अंतरिक्षे मृतिर्यदि॥ कृच्छ्रत्रयं प्रकुर्वीत आशौचमरणेपि वा॥
तथा॥ ऊर्ध्वोच्छिष्टे त्वधोच्छिष्टे उभयोच्छिष्टे तथैव च॥ अस्पृश्यस्पर्शमरणे श्वानश्वानखद्रुहैर्मरणेन क्रव्यादसं
स्पर्शे कृमिकीटोद्भवेपि च॥ एतद्दोषानुसारेण प्रायश्चित्तं समाचरेत्॥ कृच्छ्रांस्त्रिषट्पंचदशान्वा चांद्रायणमथ एम.
वापि वेति॥ त्र्यब्दाः कृच्छ्रादिप्रवस्था। अथ पर्युषितशवदाहे गालवः॥ दिवा वा यदि वा रात्रौ शवस्तिष्ठति कर्हि ४२

चित्॥ तत्पर्युषितमित्याहुर्दहने तस्य का गतिः॥ पंचगव्येन संस्नाप्य प्राजापत्यत्रयं चरेत्॥ द्विजस्य शूद्रप्रेतानुगम
ने विष्णुः॥ द्विजः शूद्रप्रेतानुगमनं कृत्वा स्रवंतीमासाद्य तन्निमग्नस्त्रिरघमर्षणं कृत्वोत्तीर्य गायत्र्यष्टसहस्रं जपेदि
ति॥ ॥ अथ सुरापाने सुरापेक्ष्यैव॥ सुरा वै मलमन्नानां पाप्मा च मलमुच्यते॥ तस्मात्ब्राह्मणराजन्यौ वैश्यश्च न सु
रां पिबेदिति॥ मनूक्तेः॥ गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा॥ यथैवैका तथैवान्या न पातव्या द्विजोत्तमैरिति तु
तदुक्तेः स्वतद्दोषतयेतरनिंदार्था॥ अत एव भविष्यत्पुराणे॥ सुरा तु पैष्टी विज्ञेया न तस्यास्त्वितरे समे। पुलस्त्योपि
पानसं द्राक्षं माधूकं खार्जूरं तालमैक्षवं। मधूत्थं सैरमारिष्टं मैरेयं नालिकेरजं। समानानि विजानीयान्मद्यान्येका
दशैव तु। द्वादशं तु सुरामद्यं सर्वेषामधमं स्मृतमिति। द्वादशापि मद्यानि विप्रस्य निषिद्धानि नित्यं मद्यं ब्राह्मणो
वर्जयेदिति स्मृतेः॥ सुरा तु क्षत्रियविशोरपि। पूर्वोक्तमनूक्तेः। तत्र सुरापानप्रायश्चित्तमाह॥ याज्ञवल्क्यः। बालो
वापी जटी वापि ब्रह्महत्याव्रतं चरेदिति तत्र द्वादशाब्दं प्रायश्चित्तं तत्र माहस एव॥ पिण्याकं वा कणान्वापि भ
क्षयेत्तु समा निशि समा अब्दं॥ कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशीति मनूक्तेः। व्यवहारार्थमेव तन्त्रनुपर

Indira Gandhi National
Centre for the Arts

लोकापेतिचापरार्के॥ केचित्तुभक्ष्यपेयैः समा इतिपेठुः मानवं तु व्रतांतरमेवेत्याहुः। परे समानिशीतिबह्वचनांतं पेठुः।
प्रा·मा: नत्रकपिंजलाधिकरणन्यायेनाष्टत्रयं भवतिमानवीये एकवचनं तु जात्यभिप्रायेणेत्याहुः। इदं तु छर्दने सतिज्ञेयं॥ एतदेव
४४ व्रतं कुर्यान्मद्यपश्छर्दने कृते। पंचगव्यं च तस्योक्तं पवित्रं कायशोधनमिति व्यासोक्तेः। गौडीमाध्वीः सकृत्पाने प्येतदेवेति
विज्ञानेश्वरः। यत्तु पंचमहापापिनउक्ता॥ आपस्तंबः। चतुर्थकालमितभोजनो पोभ्युपेयात् त्र्यनासनाभ्यां विहरन् त्रिभिर्वर्षैः
पापमपनुदतीति॥ यच्च यमः। बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः। समत्वं ब्राह्मणैर्गच्छेदित्येषा वैदिकी श्रुतिः। भूमिप्रदा
नं यः कुर्यात्सुरां पीत्वा द्विजोत्तमः॥ पुनर्न च पिवेत्तां तु संस्कृतः स विशुध्यतीति तानि याज्ञवल्कीयत्रैवार्षिकसमानविष
याणीति विज्ञानेश्वरः। यत्तु भविष्ये। अकामतः सुरां पीत्वा पैष्टीं सत्कुलनंदन। कृच्छ्रातिकृच्छ्रौ कृत्वैव पुनः संस्कारतः शु
चिः। कणान्वा भक्षयेदब्दं पिण्याकं वा सकृन्निशि॥ यदि रोगी भवेत् दुष्टो नेतरस्य कदाचन॥ कृच्छ्रश्चात्र सुरश्रेष्ठ तत्तं
श्चैव उदाहृतः। यत्तु मनुः। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति॥ मतिपूर्वमनिर्देश्यं प्राणांतिकमितिस्थिति
रिति। तत्र वारुणीपदं पैष्ट्यापरं। उत्तरार्द्धं प्राणांतिकनिर्देशात्। इदं तु रोगिपरमेव। अत्र संस्कारमात्रमेव प्रायश्चि प्रम·
त्तमिति केचित् तन्न। अज्ञानाद्वारुणीं पीत्वा संस्कारेणैव शुध्यति। न तु कृच्छ्राचितेनेह केवलेन विशुध्यतीति भविष्योक्तेः। ४४

अज्ञानाद्दोषधार्थम तएव बृहस्पतिः॥ गौडीमाध्वींतथापैष्टींपीत्वा विप्रः समाचरेत्। तप्तकृच्छ्रं पराकं च चांद्रायणमनुक्र
माद्दिति ज्ञानतश्च॥ पानसादिमद्यपाने व्यासेक्रमाद्द्वयोर्व्रतयोरद्बृत्तिमाह यमः। गोघ्नवद्विहितः कल्पश्चांद्रायणमथा
पि वा। अनभ्यासे तपो भूयस्ततः शुद्धिमवाप्नुयात्। कामतः सकृत्पाने पराशरः। मद्यपश्च द्विजः कुर्यान्नदीं गत्वा समुद्रगां
॥ चांद्रायणे ततश्चीर्णे कुर्याद्ब्राह्मणभोजनं॥ अनडुत्सहितां गां च दद्याद्विप्रेषु दक्षिणां॥ इदं च गवाधिकं शक्तं प्रति। अ
ज्ञानतः सकृत्पाने तु दिकृच्छ्र बृहस्पतिः। पीत्वा प्रमादतो मद्यमतिकृच्छ्रं चरेत् द्विजः॥ कारयेत्तस्य संस्कारं भक्त्या विप्रांश्च
भोजयेत्। पराशरः। द्राक्षेक्षुटंकं खर्जूरं पानसादेश्च यो रसः। सद्योजातं तु तं पीत्वा त्र्यहात् शुध्येद्द्विजोत्तमः। इदं तु त्रिए
वं द्राक्षादिरसानां मादकत्व एव द्रष्टव्यं॥ अन्यथा सद्योजाते त्वरसादावपि स्यात्। सुरासंस्पृष्टद्रव्यस्याज्ञानतो भक्षणे
आह मनुः। अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च पुनः संस्कारमर्हंति त्रयो वर्णा द्विजातय इति॥ पुनः संस्का
रश्च पुनरुपनयनमिति निबंधकृतः॥ तस्य विधिरुक्तः संस्कारमयूखे। यत्तु सुमंतुः। ब्राह्मणस्य कपस्य वाणस्य सानुध
नस्य तु द्रेकस्यानं ना विश्वस्य सहसां तु ऋषा त्यजंति एत्र मुपवासस्य तत्कृच्छ्रेण शुद्धो भवतीति त्रैवार्षिकविषयं॥

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ४५ कामतः सकृत्सुरापाने याज्ञवल्क्यः॥ सुरांबुघृतगोमूत्रपयसामग्निसंनिभं॥ सुरापोन्यतमं पीत्वा मरणाच्छुद्धिमिच्छतीति। य
त्तु वसिष्ठः। अभ्यासे तु सुरापा अग्निवर्णां सुरां पिबेदिति तत्कामपरं॥ गौडी माध्वी मत्याभ्यासे ऽमत्या चाभ्यासे तु माधवी
ये॥ व्यासः। मत्या मद्यमपत्या वा पुनः पत्वा द्विजोत्तमः॥ ततोग्निवर्णां पीत्वा तां मृतः शुध्येत्स किल्बिषात्॥ ॥ अथाभक्ष्य
भक्षणे॥ ।विष्णुः। अभोज्यानामपेयानामभक्ष्याणां च भक्षणे॥ कृच्छ्रपादं विशुध्यर्थं चरेयुः त्रिप्रशोधनं॥ इदं त्वज्ञानात्स
कृद्भक्षणे॥ ज्ञानतस्तु संवर्त्तः। अभोज्यभोजनं कृत्वा अस्तु त्रिवर्णजाः। गोमूत्रयावकाहारः सप्तरात्रेण शुध्यति॥ अभ्या
से तु बृहस्पतिः। अलेह्यानामपेयानामभक्ष्याणां च भक्षणे। रेतोमूत्रपुरीषाणां शुध्येच्चांद्रायणं चरेदिति॥ शिष्टविगीतमा
त्रेनमात्रे भंगादिद्रव्यविशेषे तु अपरार्के भरद्वाजः॥ शिष्टानाशंसितं यत्किंचिदन्नमूलफलादिकं॥ नतद्भोज्यं द्विजातीनां
भुक्त्वा चोपवसेदहरिति॥ ॥ अथ विशेषतः॥ ॥ तत्र जातितो दुष्टे पलांड्वादौ अज्ञानात्सकृद्भुक्ते बृहस्पतिः॥ लशुनं कवकं
चैव तत्पलांडुं गृंजनं तथा॥ चत्वार्यज्ञानतो जग्ध्वा तप्तकृच्छ्रं चरेद्द्विज इति। ज्ञानतस्तु याज्ञवल्क्यः। पलांडुं विड्वराहं च छत्र राम॰ ४५
कं ग्रामकुक्कुटं॥ लशुनं गृंजनं चैव जग्ध्वा चांद्रायणं चरेत्॥ गृंजनं लशुनतुल्यं रक्तं इति विज्ञानेश्वरः॥ यदीयं चूर्णं

गायकाः कंठशुध्यै विटाश्चमदार्थमश्नंति स एव विशेष इति माधवः॥ विषदिग्धेन शल्येन यो मृगः परिहन्यते॥ अभक्ष्यं तस्य तन्मां
सं तद्धि गृंजनमिष्यत इत्यपरार्कः॥ यत्तु हेमाद्रिमाधवीयागाजनमूलमिति तन्न। हेमाद्रावेव गृंजनं चुक्रिका चुक्रं गाजरं पोतिका
तद्येति व्यासे पृथक्कुनिर्देशात्। शातातपः॥ लशुनं गृंजनं जग्ध्वा पलांडुं च तथा शुनी मित्सुत्वा उपायनं पुनः कुर्यात्तप्तकृच्छ्रं च
रेन्मुनिरिति॥ चांद्रायणानुवृत्तौ विष्णुः। लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटनरगोमांसभक्षणे सर्वेष्वेतेषु द्विजातीनां प्राय
श्चित्तांते पुनः संस्कारं कुर्यादिति। यत्तु मनुः। छत्राकं विड्वराहं च लशुनं ग्रामकुक्कुटं। पलांडुं गृंजनं चैव मत्या जग्ध्वा पतेन्नरः
। अमत्यैतानि षड्जग्ध्वा कृच्छ्रं सांतपनं चरेत्। यतिचांद्रायणं वापि शेषेषूपवसेदहरिति॥ अत्र कामतोभ्यासे पतनं। अ
ज्ञानतः औषधार्थं सकृद्भक्षणे सांतपनं॥ औषधार्थमेव ज्ञानतः सकृद्ज्ञानतोभ्यासे च चांद्र॥ पलांड्वाद्येकनाद्यपरोगे तु ने
व दोषः। तथा च पलांड्वाद्यनुवृत्तौ सुमंतुः। एतान्येवातुरस्य भिषक्क्रियायामप्रतिषिद्धानीति। चतुर्विंशतिमते॥ लशुनं
गृंजनं चैव तत्पणजफलं तथा॥ ऊली चैव द्विजो भुक्त्वा चरेच्चांद्रायणव्रतमिति। तणराजस्तालः॥ कुलीपलांडुः॥ परशरः। पी
यूषं श्वेतलशुनं वृंताकं फलगृंजनं॥ पलांडुं वृक्षनिर्यासं देवस्वं कवकानि च॥ उष्ट्रीक्षीरमविक्षीरमज्ञानाद्भुंजते द्विजः। सत्रि

Indira Gandhi National
Centre for the Arts

णत्रोपवासेन पंचगव्येन शुध्यति॥ पीयूषं अचिरप्रसूतापागोर्दुग्धं॥ सुमंतुः। लशुनपलांडुगृंजनभक्षणे सावित्र्यष्टसहस्रेणमूर्ध्नि
संपातान्नयेदिति॥ एतन्मुखप्रवेशमात्रपरं॥ मिताक्षरायां स्मृतिः। नालिकाशणछत्राककुसुंभालाबुविड्भवान्॥ कुंभीककेसु
ढंलाककोविदारांश्च वर्जयेत्॥ तथाकालप्रसूतानि पुष्पाणि च फलानि च॥ विकारवच्च यत्किंचिन्प्रयत्नेन विवर्जयेत् इति। तथा
वटप्लक्षाश्वत्थदधित्थनीपकरंबमातुलुंगफलानि वर्जयेत्॥ यमः। तंडुलीयककुंभीकव्रश्चनप्रभवालया॥ एतेषां भक्ष
णं कृत्वा प्राजापत्यव्रतं चरेदिति। कामतोभ्यासे तु षडह। यमः। नालिकानालिकेरांश्च श्लेष्मातकफलानि च॥ खट्वा वार्त्ताकुकुंभी
कव्रश्चनप्रभवालया॥ भूस्तृणं शिग्रुकं चैव कुसुंभकं भंकवकानि च। एतेषां भक्षणं कृत्वा चरेच्चांद्रायणं द्विजः॥ द्विजपदाच्छूद्र
देरनिषेधः। आपस्तंबः। भक्षयेद्यदि नीलां तु प्रमादात् ब्राह्मणः क्वचित्। चांद्रायणेन शुद्धिः स्यादापस्तंबोब्रवीन्मुनिरिति। स
द्धिः शन्मते॥ शणपुष्पं शाल्मलं च करनिर्मथितं दधि। बहिर्वेदिपुरोडाशं जग्ध्वा नाद्यादहर्निशं। कौर्मे॥ अलाबुं शिग्रुकं चै
व जग्ध्वाप्येतद्व्रतं चरेत्॥ औदुंबरं च कामेन तप्तकृच्छ्रेण शुध्यतीति॥ शंखः॥ माहिषं दुग्धमाजं च मस्यं क्षीरेषु निर्दिशे प्र॰
त। भुक्त्वा परस्य तु क्षीरं मासं कुर्याद्व्रतं बुधः। अनिर्दशाहं गोक्षीरं माहिषं वाजमेव च॥ गोश्च क्षारं विवत्सायाः संधिन्याश्च तथा पयः ४६

संधिन्यमेध्यभक्षाया भुक्त्वा पक्षं व्रतं चरेत्। क्षीराणि यान्यभक्ष्याणि तद्विकाराशने बुधः। सप्तरात्रव्रतं कुर्याद्यदेतत्परिकीर्ति
तमिति। अनभ्यासे तु संवर्त्तः। अवत्सैकशफास्त्रीणां क्षीरं प्राश्य द्विजोत्तमः। अनिर्दशापागोश्चैव त्रिरात्रं यावकं पिबेदिति। अ
कामतोनभ्यासे तु शेषेषूपवसेदहरिति मनूक्तउपवासः। उष्ट्रादिक्षीरे तु शातातपः। उष्ट्रीक्षीरमानुषीक्षीरपाने पुनरु
पनयनं॥ तप्तकृच्छ्रं च आममांसस्पर्शसंधिन्यनिर्दशायागोः क्षीरप्राशने वृथामांसभक्षे च प्राजापत्यं॥ कपिलाक्षीर
पाने विशेषमाहापस्तंबः। क्षत्रियश्चैव वृत्तस्थो वैश्यः शूद्रोथवा पुनः। यः पिबेत्कापिलं क्षीरं न ततोन्योस्ति पापकृ
त्॥ भविष्यपुराणे॥ कापिलं यः पिबेच्छूद्रो नरके स विपच्यते। कृतशेषं पिबेद्विप्रो विप्रः स्याद्यन्यथा पशुः। अन्यथा हुत
शेषपाने। तत्र शूद्रस्य कपिलाक्षीरपाने श्रवणेन ब्रह्महेतितादृश्यातिदेशः कृतस्तेन तस्य तत्र न वा शूद्रेतरयोश्चांद्राय
णमनादिष्टत्वात्॥ ब्रह्मपुराणे॥ घृतात्फेनं घृतामंडं पीयूषमथ चाईगोः॥ दधिक्षीरमयाज्यं च दुष्टायाश्चैव गोः प
यः। अनिर्दशायाश्च तथा संधिन्याश्च तथैव च॥ सगुडं मरिचाक्तं च तथा पर्युषितं दधि॥ जीर्णतक्रमपेयं तु नष्टस्वा
दं च फेनवत्॥ प्रमादाद्भक्षिते तेरिभिर्वनेपक्षव्रतं चरेदिति। आईगोः सद्यःप्रसूता दुष्टा पापाद्याधादिना॥ अथ मांसभक्षे

Indira Gandhi National
Centre for the Arts

णेमनुः। नाकृत्वाप्राणिनांहिंसांमांसमुत्पाद्यतेक्वचित्। नचप्राणिवधः स्वर्ग्यस्तस्मान्मांसंनभक्षयेत्॥ तत्रविशेषानुक्तौव
मा॰मा॰ ४७ कामतः सकृद्भक्षणेदोषेषूपवसेदहरितिमनूक्तेः॥ कामतस्तु॥ अनुपाकृतमांसानीत्याद्युपक्रम्यमत्स्यांश्चकामतोजग्ध्वा
सोपवासस्त्र्यहंवसेदिति॥ अकामात्प्राशेमनुः। भुक्त्वामांसमभक्ष्यंचसप्तरात्रंयवान्पिबेदिति॥ कामतोभ्यासेविष्णुः। अन
र्चितंवृथामांसंभुक्त्वामांसंपयसावर्त्तेतेति। नरमांसादिभक्षणेउशनाः॥ नरमांसंखरमांसंचगोमांसंचाश्वमेवच॥ भुक्त्वा
पंचनखादीनांमहासांतपनंचरेत्। स्मृत्यंतरे। जग्ध्वामांसंनराणांचविड्वराहंखरंतथा। गवाश्वकुंजरोष्ट्राणांसर्वपांच
नरंतथा॥ क्रव्यादंकुक्कुटंग्राम्यंकुर्यात्संवत्सरंव्रतं। यमः। मांसमूत्रपुरीषाणिप्राश्यगोमांसमेवच॥ श्वगोमायुक
पीनांचसप्तकृच्छ्रंविधीयते॥ उपोष्यवाद्वादशाहंकूष्मांडैर्जुहुयाद्घृतमिति। अत्राद्यमकामतः कामतोपरं॥ बृहद्यमः
॥ शुष्कमांसाशनेविप्रोव्रतंचांद्रायणंचरेदिति। षड्त्रिंशन्मते॥ अजाविमहिषमृगाणामामामांसभक्षणेकेशनखरुधि
रप्राशनेमतिपूर्वेत्रिरात्रमज्ञानादुपवासइति॥ क्वचिन्मांसभक्षणमनुजानातियाज्ञवल्क्यः॥ प्राणात्ययेतथाश्राद्धेप्रो ण्म॰ ४७
क्षितंद्विजकाम्यया॥ देवान्पितॄन्समभ्यर्च्येत्यनुज्ञातपरं॥ नतुनिषिद्धपरं॥ नित्तुमनुः खादन्मांसंनदोषभाक्इतियत्तुम

नुः। नमांसभक्षणेदोषोनमद्येनचमैथुने॥ प्रवृत्तिरेषाभूतानांनिवृत्तिस्तुमहाफलेति। तदनुज्ञातपरं॥ नतुनिषिद्धपरं॥ निषि
द्धाचरणस्यपुण्यजनकत्वादितिशूलपाणिः। तन्नसत्यपिपुरुषार्थेनानृतंवदेदितिनिषेधेदार्शपौर्णमासिकेनतेन
निषिद्धाचरणस्यैवक्रतूपकारस्यपुण्यजनकत्वदर्शनात्॥ तत्वतस्तुनात्रनिषिद्धाचरणंपुण्यजनकं॥ किंतुप्रजा
पतिव्रतइवमांसनिवृत्तिसंकल्पः। यथैकादश्यांनभुंजीतेतिनिषेधसत्वेपिव्रतविधिनाभोजनाभावसंकल्पः। फलायवि
धीयते। एतेनगृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनादितियाज्ञवल्कीयमपिव्याख्यातं। एतच्चफलंसांवत्सरिकसंकल्प
स्य॥ वर्षेवर्षेश्वमेधेनयोयजेतशतंसमाः। मांसानिचनखादेद्यस्तयोःपुण्यफलंसममितिमनूक्तेः। योगीश्वरः। वसे
त्सनरकेघोरेदिनानिपशुरोमभिः। संमितानिदुराचारोयोहंत्यविधिनापशून्। हंतेत्याहमनुः। अनुमंताविशसितानिहंता
क्रयविक्रयी॥ संस्कर्त्ताचोपहर्त्ताचखादकश्चेतिघातकाः। अत्रचदेवान्पितॄन्नितिसामान्यतोनुज्ञातमप्यजादिमांसं
विशेषेणनभक्ष्यं। तथाचमनुः। यक्षरक्षःपिशाचान्नंमद्यंमांसंसुरासवं। तद्ब्राह्मणेननात्तव्यंदेवानामश्नताहविः। य
त्तुमेधातिथिः। निषिद्धमांसपरमेतदित्याहतन्नविशेषनिषेधवैयर्थ्यापत्तेः। नचायंदोषातिशयार्थः। यस्यहिनि

Indira Gandhi National Centre for the Arts

प्रा: मा: षेधस्यनिषिद्धविषयत्वमेवनियतं॥ तत्रानिषिद्धविषयत्वाभावाद्गत्यादोषविशेषः कल्प्यते। यथानंदासुअभ्यंगनिषेधेऽ
४८ तिपुनः षष्ठ्यांनिषेधोदोषातिशयार्थः। केचित्तुमांसरसलोलुपा अपक्वमांसविषयत्वमस्याहुः। उपक्रमेयस्मादुक्तः पित्र्या
चान्नमित्युक्तेः। यज्ञादीनांचक्रव्यादत्वात्पक्वमेवमांसमन्नं। यथोपसंहारेपिदेवानामसृक्ताहविरित्युक्तेः। देवानांचहविः
पक्वमेवभवति। अतःपक्वमेवविषयत्वंनापक्वमितितत्तुच्छं॥ नहियज्ञादयः पक्वंनाश्नंति। क्रव्यात्वंतुतेषांपक्वालाभेप
क्वमप्यश्नंतीत्यभिप्रायेण देवानांहविश्चाममपिविहितं यथाग्निहोत्रेतंडुलैर्जुहोतीतिचित्रायांचरुंदधिमधुघृतंधाना
नाउदकंतंडुलाः तत्संसृष्टंप्राजापत्यमितितथापर्यग्निकृतानारण्यानुत्सृजंतीत्यत्रपशुरूपाममांसस्यैवदेवतासंबंध
उक्तः। तस्मादुपक्रमोमांसमात्रनिंदार्थएव। अत्रविशेषः श्रीपितृचरणकृतेद्वैतनिर्णये द्रष्टव्यः। अथब्रह्मचारिणो
मधुमांसभक्षणे॥ ॥देवलः। मृतान्नंमधुमांसंचयद्यश्नीतिव्रतीक्वचित्॥ त्रिरात्रोपोषितः सम्यक्रात्रिमेकंजलेवसेत्॥ इ
दमज्ञानतः सकृद्भक्षणे। ज्ञानेसंवर्तः॥ ब्रह्मचारीतुयोश्नीयान्मधुमांसंकथंचन॥ प्राजापत्यंचकृत्वासौमौंजीहोमेनशुध्य प्रा:
ति। मौंजीहोमः पुनरुपनयनं॥ वसिष्ठः ब्रह्मचारीचेन्मधुमांसमश्नीयाच्छिष्टभोजनीयं॥ द्वादशरात्रंचरित्वाव्रतशेषंसमा ४८

पयेत्। सूतकभोजनेप्येवमिति। शिष्टभोजनीयंशिष्टभोजनयोग्यंविहितमित्यर्थः। अभक्ष्यमांसादिभक्षणेप्रातिस्वि
कंतदपिकार्यं। अपवादमाहदेवलः। अकामोपनतंवाजलनेयेनदुष्यतीति। अकामोपनतंकामभक्षितं॥ तथाब्रह्मचार्यधि
कारेबौधायनः। सचेद्व्याधीयीतिकामंगुरोरुच्छिष्टंभैषज्यार्थेसर्वंप्राश्नीयाद्येनेच्छेत्तेनचिकित्सेत्सयदागदःस्यात्तदादि
त्यमुपतिष्ठेद्धंसःशुचिषदिति। लघुहारीतः। आमिषस्यतुयोभांडेपक्वमश्नातिसव्रतः। कुशमूलविपक्वेनत्र्यहंक्षीरेण
वर्त्तयेदिति॥ ॥अथशारीरमलभक्षणेप्रायश्चित्तं॥ ॥तत्रमलानाहमनुः। वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविट्नखाः
। श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेमलान्नृणां॥ ॥प्रायश्चित्तमाहयोगीश्वरः॥ अज्ञानात्तुसुरांपीत्वारेतोविण्मूत्रमेवच।
पुनःसंस्कारमर्हंतित्रयोवर्णाद्विजातयः। पुनःसंस्कारः पुनरुपनयनं। इदंचप्रातिस्विकैः शारीरमलभक्षणप्रायश्चित्तैःस
मुच्चीयतइतिशूलपाणिः। स्वतंत्रमेवप्रायश्चित्तमित्यन्ये। अज्ञानतः सकृद्भक्षणेतुसंवर्तः॥ विण्मूत्रभक्षणेविप्रः प्राजा
पत्यंसमाचरेत्। ज्ञानतः सकृद्भक्षणेतुअंगिराः। प्रजापत्यंचरेद्विप्रोतिकृच्छ्रंदात्रिषश्चरेत्॥ कृच्छ्रातिकृच्छ्रौकुर्वीतवि
प्रोविण्मूत्रभक्षणेइतिपत्नुवसिष्ठः। मत्यामद्यपानेसुरापाद्यज्ञानेकृच्छ्रातिकृच्छ्रौघृतंप्राश्य पुनःसंस्कारोमूत्रशकृच्छ्रु

Indira Gandhi National Centre for the Arts

काम्यवहारेषु चैवमिति तदपि विप्रस्याज्ञानतः सकृद्भक्षणे तु अस्मिन्नेव विषये गौतमः। अमत्या मद्यपाने पयो घृतमुदकं वा
मा·मा· ४९ युः प्रतित्र्यहं तप्तानि स तत्कृच्छ्रः। ततः संस्कारो मूत्रपुरीषरेतसां प्राशने चैवमिति। यत्तु बृहस्पतिः। रेतोमूत्रपुरीषाणां शु
द्ध्यै चांद्रायणं चरेत्। इति तदमतिपूर्वाभ्यासविषयं॥ केशादिभक्षणे यद्विज्ञानमते। केशनखरुधिराशने मतिपूर्वे त्रिरा
त्रमज्ञानादुपवासः। यत्तु स्मृत्यंतरे। केशकीटनखं प्राश्य मत्स्यकंटकमेव च॥ हेमतप्तघृतं पीत्वा तत्क्षणादेव शुध्यति। त
न्मुखमात्रप्रवेशविषयं॥ प्रचेताः। अन्ने भोजनकाले तु मक्षिकाकेशदूषिते। अनंतरं स्पृशेदापस्तच्चान्नं भस्मना स्पृशेत्॥ ॥
अथ क्रियादुष्टभक्षणे। तत्रोच्छिष्टभक्षणे। मनुः। विडालकाकाखूच्छिष्टं जग्ध्वा श्वनकुलस्य च। केशकीटावपन्नं च पिबेद्ब्रह्म
सुवर्चलां॥ पानं त्वेकस्मिन्दिने॥ एतच्चाकामतः सकृद्भक्षणे॥ कामतस्तु॥ विष्णुः। पक्षिश्वापदजग्धस्य रसस्यान्नस्य भू
यसः। संस्काररहितस्यापि भोजने कृच्छ्रपादकं। अकामतोऽभ्यासे त्रिरात्रं तपः॥ ध्वांक्षकाकावलीढशूद्रोच्छेषणभोजने तिकृ
च्छ्र इति। कामतोऽभ्यासे यावकव्रतं प्रकृत्य शंखः। श्वनामुच्छिष्टकं भुक्त्वा मासमेकं व्रती भवेत्॥ काकोच्छिष्टं गवाघ्रातं भुक्त्वा एम·
पक्षं व्रती भवेत्॥ बृहद्विष्णुः। ब्राह्मणः शूद्रोच्छिष्टाशने सप्तरात्रं पंचगव्यं पिबेत्। वैश्योच्छिष्टाशने पंचरात्रं राजन्योच्छि ४९

ष्टाशने त्रिरात्रं॥ ब्राह्मणोच्छिष्टाशने एकाहमिति। अकामतो विप्रस्य विप्राद्युच्छिष्टभक्षणे शंखः। ब्राह्मणोच्छिष्टाशने म
हाव्याहृतिभिरभिमंत्र्यापः पिबेत्। क्षत्रियोच्छिष्टाशने ब्राह्मीरसविपक्वेन त्र्यहं क्षीरेण वर्तयेत्। वैश्योच्छिष्टभोजने त्रिरा
त्रोपोषितो ब्राह्मीसुवर्चलां पिबेत्॥ शूद्रोच्छिष्टभोजने षड्रात्रं नभोजनमिति॥ अकामतोऽभ्यासे तु यमः। भुक्त्वा सह ब्राह्म
णेन प्राजापत्येन शुध्यति॥ भूभुजा सह भुक्त्वान्नं तप्तकृच्छ्रेण शुध्यति। वैश्येन सह भुक्त्वान्नं अतिकृच्छ्रेण शुध्यति॥ शूद्रेण सह
भुक्त्वान्नं चांद्रायणमथाचरेदिति। इदं कामाभ्यासविषयमिति विज्ञानेश्वरः॥ कामतोऽभ्यासे त्वेतदेव द्विगुणं कल्प्यं॥ विज्ञाने
श्वरमते तु कामतोऽभ्यासे इदं। अंत्योच्छिष्टभोजने तु आपस्तंबः। अंत्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः। चांद्रं कृच्छ्रं
तदर्धं च ब्रह्मक्षत्रविशां विधिरिति॥ चांद्रं चांद्रायणं। अंगिराः। चंडालपतितादीनामुच्छिष्टान्नस्य भक्षणे॥ चांद्रायणं च
रेद्विप्रः क्षत्रः सांतपनं चरेत्। षड्रात्रं च त्रिरात्रं च वर्णयोरनुपूर्वशः इति द्विजः शुध्येत्पएकेण शूद्रः कृच्छ्रेण शुध्यतीति
नूत्नार्धपपाठ॥ शूलपाणिः॥ सांतपनं महत्॥ इदमज्ञानतः सकृद्भक्षणे॥ ज्ञानतस्तु द्विगुणं। पीतोच्छिष्टपाने वृद्धशातातपः
। पीतोच्छिष्टं तु पानीयं पीत्वा तु ब्राह्मणः क्वचित्। त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनरिति। इदं चाकामतोऽभ्यासे कामतश्च

Indira Gandhi National
Centre for the Arts

मा॰मा॰ ५० सकृत्पाने कामतो मासे तु षड्भ्रणानातपः॥ पीतशेषं तु यत्किंचित् भोजने मुनिभिः स्मृतं॥ अभोज्यं तद्द्विजातीनां भुक्त्वा
चांद्रायणं चरेत् इति। स्त्रीणामुच्छिष्टभोजने तु आपस्तंबः। शूद्रोच्छिष्टभोजने सप्तरात्रमभोजनं स्त्रीणां चेति इदं च कामतः
सकृद्ग्रहणे॥ अकामतस्तु षड्रात्रं॥ एतत्सहचारिशूद्रोच्छिष्टभोजने द्रष्टव्यं नाहितिके चित्॥ परे धर्मेवाक्तः॥ सहभोजने
तु बृहद्व्यासः। माता वा भगिनी वापि भार्या वान्या स्वयं पोषितः। न ताभिः सह भोक्तव्यं भुक्त्वा चांद्रायणं चरेत् इति। यत्तं गिरः
ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन॥ तत्र दोषं न मन्यंते सर्व एव मनीषिण इति। तदापद्विषयं विवाहविषयं वा। उच्छि
ष्टापवादमाहापस्तंबः॥ पितुर्ज्येष्ठस्य च भ्रातुः उच्छिष्टं भोज्यं। आपदि शूद्रगृहभोजने तु पराशरः। आपत्काले तु विप्रे
ण भुक्तं शूद्रगृहे यदि। मनस्तापेन शुध्येत् द्रुपदां वा शतं जपेत्। शापोच्छिष्टभक्षणे षड्द्विंशन्मते॥ दीपोच्छिष्टं तु यत्तै
लं रात्रौ रथ्याहृतं च यत्॥ अभ्यंगाच्चैव यच्छिष्टं भुक्त्वा नक्तेन शुध्यति। तैलग्रहणात् घृते न दोषः॥ ॥अथ श्राद्धभोज
ने॥ शंखः॥ चांद्रायणं नवश्राद्धे पराको मासिके मतः। पक्षत्रये त्रिकृच्छ्रं स्यात् षण्मासे कृच्छ्रमेव च॥ आब्दिके कृच्छ्रपा स्म॰
दः स्यादेकाहं पुनराब्दिके॥ अत ऊर्ध्वं न दोषः स्यादित्येवं वचनं यथेति। मासिके आद्ये द्वितीयादिषु तु प्रायश्चित्त ५०

तारतम्यं कल्प्यं॥ षाण्मासिकशब्देन ऊनषाण्मासिकमपि गृह्यते। एवमाब्दिकपदेन ऊनाब्दिकमपि। न दोषः पूर्ववदिति शे
षः। तृतीयाद्याब्दिकेपि त्रिरात्रं चांत्यमासे षुप्रत्यब्दं चैकाहः स्मृतमिति षड्विंशन्मते प्रायश्चित्ते यत्तु भरद्वाजः। भुक्त्वा चेत्पार्व
णे वैश्वश्राद्धे प्राणायामान् षडाचरेत्। उपवासस्त्रिमासादिवत्सरांतं प्रकीर्तितः। प्राणायामत्रयं त्र्यहादावहे॥ एतत्सपिंडने॥ अ
सरूपे स्मृतं नक्तं व्रतपारणके तथा॥ द्विगुणं क्षत्रियस्यैतत् त्रिगुणं वैश्यभोजने॥ साक्षाच्चतुर्गुणं ह्येतत् स्मृतं शूद्रस्य भोज
न इति। तत्त्रिमासादौ न्यायाद्विषयं। यत्तु हारीतः। चांद्रायणं नवश्राद्धे प्राजापत्यं तु मिश्रके॥ एकाहस्तु पुराणेषु प्रायश्चि
त्तं विधीयत इति। तच्छंखवाक्यसमानविषयं॥ मिश्रकं संवत्सरांतर्गतं श्राद्धमित्यपरार्के॥ एकादशाहिकमित्यन्ये॥ चां
द्रायणं नवश्राद्धे इत्येतदाद्यनवश्राद्धविषयं॥ प्राजापत्यं तु मिश्रक इत्याद्यमासिकविषयं। द्वितीयमासिकश्राद्धादि
षु षड्विंशन्मतोक्तं। प्राजापत्यं नवश्राद्धे पादोनं वाद्यमासिके॥ त्रैपक्षिके तदर्धं स्यात् द्वौ पादौ मासिके तथा॥ पादोनं कृ
च्छ्रमुद्दिष्टं षाण्मासिके तथाब्दिके॥ त्रिरात्रं चांत्यमासे षु प्रत्यब्दं तदहः स्मृतमिति। क्षत्रियादिश्राद्धभोजने तु तत्रैव॥ चां
द्रायणं नवश्राद्धे पराको मासिके मतः॥ त्रैपक्षिके शांतपनं कृच्छ्रं मासद्वये स्मृतं॥ क्षत्रियस्य नवश्राद्धे भ्रतमेतदुदाहृ

प्रा॰मा॰ तं॥ वेदस्यार्द्धाधिकं प्रोक्तं तत्त्रियामनुमनीषिणः॥ शूद्रस्य तु नवश्राद्धे चरेच्चान्द्रायणद्वयं॥ सार्द्धं चान्द्रायणं मासि त्रिपक्षे त्वैन्द
५१ वं स्मृतं। मासद्वये पराकः स्यादूर्ध्वं सांतपनं स्मृतमिति॥ यत्तु हारीतः। एकादशाहे तु त्र्यहं भुक्त्वा सं च पने तथा॥ उपोष्य विधि
वद्भुक्त्वा कूष्मांडैर्जुहुयाद्धृतं॥ यदपि विष्णुः। प्राजापत्यं नवश्राद्धे पादोनं त्वाद्यमासिके। त्रैपक्षिके तदर्द्धं तु पंचगव्यं द्विमा
सिके इति तदुभयमापद्विषयं॥ भरद्वाजः। अपांक्तेयाम्य दुहितृश्राद्धमेकादशेहनि। ब्राह्मणस्तत्र भुक्त्वान्नं त्रिशुचान्द्रायणं च
रेत्। आमश्राद्धे तथा भुक्त्वा तप्तकृच्छ्रेण शुध्यति। संकल्पिते तथा भुक्त्वा त्रिरात्रं क्षपणं भवेदिति। आमश्राद्धं इति नवश्राद्धवि
षयं॥ यत्तु तत्रैव विष्णुः॥ आमश्राद्धाशने त्रिरात्रमिति। तदापद्विषयं॥ यत्तु शंखः। आमश्राद्धाशने विद्वान् मासमेकं
व्रतं चरेदिति॥ तदभ्यासविषयं॥ संकल्पितं इति षाण्मासिकादिविषयं॥ मनुः। मासिकान्नं तु योश्नीयादसमावर्त्ति
को द्विजः। स त्रीण्यहान्युपवसेदेकाहमुदके वसेदिति॥ यत्तु संवर्त्तः। मृतकान्नं नवश्राद्धं मासिकान्नं तथैव च॥ ब्रह्मचा
री तु योश्नीयात् मधुमांसं कथंचन॥ प्राजापत्यं तु कृत्वासौ मौंजीहोमेन शुध्यतीति। तद्बुद्धिपूर्वविषयं। अनुक्तप्राय एम॰
श्चित्ते तु सर्वत्र॥ उशनाः दशकृत्वः पिबेदापो गायत्र्या श्राद्धभुग्द्विजः। ततः संध्यामुपासीत शुध्येत्तु तदनंतरमिति आम ५१

श्राद्धे तु सर्वत्रार्द्धं॥ तथा च षाड्गुंशन्मते। आमश्राद्धे भवेदर्धं प्राजापत्यादि सर्वदेति। अथ संस्कारान्नभोजने॥ प्रायश्चित्तविवेकें
गिरः॥ जन्मप्रभृति संस्कारे बालस्यान्नस्य भोजने॥ असपिंडैर्न भोक्तव्यं संस्कारानां ते विशेषतः व्यासः॥ निवृत्ते व्रतहोमे तु प्रा
श्रामकरणात्तथा॥ चरेत्सांतपनं भुक्त्वा जातकर्मणि चैव हि॥ ततोन्येषु तु भुक्त्वान्नं संस्कारेषु द्विजोत्तमः॥ नियोगादुपवासेन
शुध्यते निंद्यभोजने॥ धौम्यः। ब्रह्मौदने च सोमे च सीमंतोन्नयने तथा॥ जातश्राद्धे नवश्राद्धे द्विजश्चांद्रायणं चरेत्। आपस्तंबः।
याज्ञकान्नं नवश्राद्धं संग्रहे चैव भोजनं॥ स्त्रीणां प्रथमगर्भे च द्विजश्चांद्रायणी चरेत् इति स्त्रीणां संग्रहो विवाहः॥ ॥ अथ हस्त
दत्तादिभक्षणे प्रायश्चित्तमाह यमः। माहिषं फाणितं शाकं गोरसं लवणं घृतं॥ हस्तदत्तानि भुक्त्वा तु भोक्ता सांतपनं चरे
त् एतत्कामतः। सांतपनं दिनत्रयसाध्यं। अकामतस्त्वाह पराशरः। माहिषं फाणितं शाकं गोरसं लवणं घृतं। हस्तदत्तानि
भुक्त्वा तु दिनमेकमभोजनमिति। फाणितं इक्षुविकाररसविशेषः। पर्यायदत्तान्नभोजने। वृद्धयाज्ञवल्क्यः। ब्राह्मणान्नं द
ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। द्वयमेतदभोज्यं स्याद्भुक्त्वा तूपवसेदहरिति। शूद्रहस्तभोजनादौ तु क्रतुः॥ शूद्रहस्तेन यो
भुंक्ते पानीयं वा पिबेत्क्वचित्॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुद्ध्यति। एवं याज्ञवल्क्योक्तेषु॥ गोघ्रातं शकुनोच्छिष्टं पद्

Indira Gandhi National Centre for the Arts

स्पृष्टंचकामतइत्यादिष्वअपिकल्प्यंप्रायश्चित्तं॥मनुः॥व्रतहीनंतुयोभुंक्तेनरस्त्वाकृतिपंचकं॥पश्चाद्धुतेनयोभुंक्तेभुक्त्वाचां
प्रा॰मा॰ द्रायणंचरेत्॥वृथापाकान्नभक्षणेशातातपः।यत्रनाग्निंतिरेवाश्वपितरश्चयथाविधि।वृथापाकःसविज्ञेयस्तस्यनाद्यात्कथं
५२ चन।वृथापाकस्यभुंजानःप्रायश्चित्तंचरेद्द्विजः।प्राणायामत्रिरभ्यस्यघृतंप्राश्यविशुध्यति॥लिखितोपि।यस्यचाग्नौनक्षिप
तेयस्यचाग्रंनदीयते॥नतद्भोज्यंद्विजातीनांभुक्त्वाचोपवसेदहः।तथा।वृथाकृशरसंयावपायसापूपशष्कुलीः॥आहि
ताग्निर्द्विजोभुक्त्वाप्राजापत्यंचरेदिति॥अनाहिताग्निस्तूपवासः।पराशरः॥त्रिरहः।तथा।वृथाक्रो एकपंक्त्युपविष्टानां
विप्राणांसहभोजने यद्येकोपित्यजेत्पात्रंशेषमन्नंनभोजयेत्।मोहाद्भुंजीतयस्तत्रपंक्त्यावुच्छिष्टभोजनः।प्रायश्चित्तंचरे
द्विप्रःकृच्छ्रंसांतपनंतथा।एतच्चकामतः॥यत्तुमाधवीयेस्मृत्यंतरं।यस्तुभुंक्तेद्विजःप[...]मुच्छिष्टायांकदाचनः।अहोरा
त्रोषितोभूत्वापंचगव्येनशुध्यतीतितदकामतः।निंदितपंक्तिभोजनेंगिराः।यस्तुपंक्तिषुभुंजानःकुत्सितानांविशेषतः
।अहोरात्रोषितःस्नातःपंचगव्येनशुध्यति।क्षत्रियादिपंक्तिषुविष्णुः।ब्राह्मणःक्षत्रियपंक्त्यावुपविश्यासंस्कारानुपराभुंक्तेतदानक्तमा एम॰
चरेद्वैश्यपंक्त्यामेकरात्रंशूद्रपंक्त्यांत्र्यहमाचरेदिति॥इतिक्रियादुष्टाशनप्रायश्चित्तं॥॥अथाभोज्यान्नाः॥व्यासः॥गर्भोदासराज ५२

न्यानिदृशाजन्मानिशूकरः॥श्वावैसप्तजन्मानीत्येवंमनुरुवाचह॥शूद्रान्नेनोदरस्थेनयःकश्चिन्म्रियतेद्विजः।सभवेत्सूकरो
ग्राम्यस्तस्यवाजायतेकुले॥आपस्तंबः॥आहिताग्निस्तुयोविप्रःशूद्रान्नेनप्रवर्त्तते।पंचतस्यविनश्यंतिआत्माब्रह्मत्रयोग्नयः॥
॥किंचिदपवदतिहारीतः।कंडुपक्वंस्नेहपक्वंपायसंदधिसक्तवः।एतान्यशूद्रान्नभुजोभोज्यानिमनुरब्रवीत्।कंडुभ्राष्ट्रं।क्लीबेंब
रीषंभ्राष्ट्रोनाकंडुर्नास्त्वदिनीस्त्रियामितिकोशात्।याज्ञवल्क्यः।शूद्रेषुदासगोपालकुलमित्रार्द्धसीरिणः।भोज्यान्नानापितश्चैव
वयश्चात्मानंनिवेदयेत्।एतेषांचान्नंसंभोज्यमाह्य॥संभोज्यधित्वागर्हणीयाच्छूद्रान्नंगृहमागतमिति॥विष्णुपुराणात्।आ
पस्तंबः।आममन्नंमधुघृतंधानाःक्षीरंतथैवच।गुडमांसरसाग्राह्यानिवृत्तेनापिशूद्रतः।सुमंतुः।गोरसश्चैवसक्तुंचतैलंपि
ण्याकमेवच॥अपूपान्भक्षयेच्छूद्राद्यच्चान्यत्पयसाकृतं।पराशरः।घृतंक्षीरंतथातैलंगुडंतैलेनपाचितं गत्वानदीतीरेविप्रो
भुंजीयाच्छूद्रभोजितं।आरनालंतथाक्षीरंकांजिकंदधिसक्तवः।स्नेहपक्वंतथाचान्नंशूद्रस्यापिनदुष्यति।लिखितः।भुक्त्वा
वार्धुषिकस्यान्नंअव्रतस्यासुतस्यच।शूद्रस्यचतथाभुक्त्वात्रिरात्रंस्यादभोजनं।इदमकामतः।कामतस्तुशूद्रादीनुक्त्वासु
मंतुः।भुंजानोन्यतमस्यान्नंअमत्याक्षपणंत्र्यहं॥मत्याभुक्त्वाचरेत्कृच्छ्रंरेतोविण्मूत्रमेवचेति आहत्यावधिकंकल्प्यंपाद्गव

Indira Gandhi National
Centre for the Arts

प्रा॰मा॰ ५२ ल्कयः। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ॥ तयोरन्नं न भोक्तव्यं भुक्त्वा चांद्रायणं चरेत्॥ अथ रजकाद्यन्ने आपस्तंबः। रजक
माधरैलूष वेणुचर्मोपजीविनां। यो भुंक्ते ब्राह्मणश्चान्नं शुद्धिश्चांद्रायणेन तु। एतत्कामतः अकामतो धीयत्तु रजकादीनां विधा
यममः। भुक्त्वा चैषां स्त्रियो गत्वा पात्वा च प्रतिगृह्य च। कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैंदवद्वयमिति। एतदभ्यासे यत्तु संवर्त्तः।
अंत्यजान्नं यदा भुंक्ते शूद्रो मोहात्कथंचन। एकं एत्रोषितो भूत्वा दानं दत्वा विशुध्यति। तदपरिः। अथ कापालिकान्ने॥ आ
पस्तंबः। कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा। ज्ञानात्कृच्छ्राब्दमुद्दिष्टं अज्ञानादैंदवद्वयं। कृच्छ्राब्दमभ्यासविषयं॥
अथ चांडालान्ने॥ अंगिराः। अंत्यावसायिनामन्नमश्नीयाद्यस्तु कामतः। स तु चांद्रायणं कुर्यात्तप्तकृच्छ्रमथापि वा॥ अत्र काम
तश्चांद्रायणमकामतस्तप्तकृच्छ्रं॥ यत्तु कृच्छ्रपादानुवृत्तो वसिष्ठः। एतदेव चंडालान्नभोजने। ततः पुनरुपनयनं तदपि चांद्राय
णसमान विषयं॥ विष्णुः॥ चंडालान्नं भुक्त्वा त्रिरात्रमुपवसेत्॥ सिद्धं भुक्त्वा पराक इति। तद्बलाद्भोजितविषयं। यत्तु मनुस्मं
तं। चांडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च॥ पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छतीति। तत्राज्ञानतो त्यं ताभ्यासे पा प्रा॰
तित्योक्तेर्घूदशाब्दं॥ कामतस्तु चतुर्विंशत्यब्दं॥ म्लेच्छादिभिर्बलाद्भोजितस्य कारिताशुभकर्मणश्च प्रायश्चित्तमाहापस्तं ५२

बः। बलाद्दासीकृता ये तु म्लेच्छचंडालदस्युभिः। अशुभं कारिताः कर्म गवादिप्राणिहिंसनं। उच्छिष्टमार्जनं चैव तथा तस्यैव भोजनं॥
खरोष्ट्रविड्वराहाणामामिषस्य च भक्षणं। तत्स्त्रीणां च तथा संगं ताभिश्च सहभोजनं। मासोषिते द्विजातौ तु प्राजापत्यं विशोधनं॥
चांद्रायणं त्वाहिताग्नेः पराकस्त्वथवा भवेत्। चांद्रायणं पराकं च चरेत्संवत्सरोषितः। संवत्सरोषितः शूद्रो मासार्द्धं यावकं
पिबेत्। मासमात्रोषितः शूद्रः कृच्छ्रपादेन शुध्यति। ऊर्ध्वं संवत्सरात्कल्प्यं प्रायश्चित्तं वत्सरोषितः। संवत्सरो द्विजोत्तमैः। संवत्स
रैस्त्रिभिश्चैव तद्भावं संनिगच्छति। शूलपाणिस्तु॥ संवत्—श्चतुर्भिश्च तद्भावं सोधिगच्छति। कालो न विद्यते तस्य प्रायश्चित्तैर्दुरात्म
न इति। अंतेपपाठः। प्राजापत्यचांद्रायणादिवासंवासमात्रगधादिहिंसायाः प्रातिस्विकं तत्तत्प्रायश्चित्तमेवाकामतो विहितं
ज्ञेयं॥ आशौचान्ने छागलेयः। प्राणायामशतं कृत्वा शुध्यं तेस्र द सूतके॥ वैश्यैश्च षड्भवेद्धि विंशति ब्राह्मणे दश। एकाहं
चत्र्यहं पंचसप्त एत्र मभोजनं॥ इदमकामतः। यत्तु मार्कंडेयः। भुक्त्वा तु ब्राह्मणाशौचे चरेत्सांतपनं द्विजः। यत्तु शंखः। ब्रा
ह्मणस्य तथा भुक्त्वाऽशौचे मासं व्रती भवेदिति। तदभ्यासविषयं अत्र सर्वत्र सूतकग्रहणं मृतस्यापि उपलक्षणं॥ अंगि
रः। सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत्पानीयमज्ञात्वा नात्समश्नीयात्सदोषदिः। पानीयपाने कुर्वीत पंच

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ गव्यभक्षणं॥ त्रिरात्रं भोजने प्रोक्तं स्पृष्ट्वा स्नानं विधीयते। ब्राह्मे। योगो मघात्रयोदश्यां कुंजरच्छायसंज्ञकः। भवेन्मघापांसंस्थे शी
५४ हंसश्चैव करे स्थिरः। सूतके मृतके वापि ग्रहणेः शशिसूर्ययोः। छायायां कुंजरस्याथ भुक्त्वा तु नरकं व्रजेत्॥ भुक्त्वा प्रमादाद्द्वि
प्रश्च सकृच्चांद्रायणं चरेत्। एतच्च प्रायश्चित्तं प्रज्ञातीयस्याशौचिनोन्नं भुक्तं तज्ज्ञात्वा चितमाशौचं कृत्वा तदंते कार्यं। तथा च
विष्णुः। ब्राह्मणादीनामाशौच यः सकृदन्नमश्नाति तस्य तावदाशौचं यावत्तेषां॥ आशौचव्यपगमे प्रायश्चित्तं कुर्यादिति। ब्राह्मे।
। मृतोन्मत्तातुराणां च मुमूर्षोर्वा कदाचन॥ तथा। तद्गृहे नान्नमश्नीयात्सवसत्यग्निहोत्रिणि॥ एतेषां तु गृहे भुक्त्वा द्विजश्चांद्राय
णं चरेदिति॥ अत्रापवादः। म्लेच्छादीनां पयः पीत्वा पुष्करिण्यां ह्रदे पि वा। जानुदघ्नं शुचि ज्ञेयं अधस्ताद् शुचिस्मृतं। ततो यं य
पिबेद्द्विपः कामतो कामतोपि वा॥ अकामान्नक्तभोजी स्यात् होरात्रं तु कामतः इति। तज्जानुदघ्नोनं। अत एव व्यासातपः॥
अत्येरपि कृते कूपे सेतौ वाप्यादिके पि वा॥ तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते॥ अर्थात्यजभांडजले॥ पराशरः।
भांडस्थमंत्यजानां तु जलं दधि पयः पिबेत्॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः। ब्रह्मकूर्चोपवासेन द्विजा एम॰
तीनां तु निले॥ पराशरः। भांडस्थमंत्यजानां तु जलं दधि पयः पिबेत्॥ ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव प्रमादतः। ब्रह्म ५४

कूर्चोपवासेन द्विजातीनां तु निष्कृतिः। शूद्रस्य चोपवासेन तथा दानेन शक्तितः इति॥ तदकामतः। कामतस्त्वापस्तंबः। मद्यं धम्ले
च्छभांडभ्यो पल्वा परिवर्ते द्विजः। कृच्छ्रपादेन शुध्येत पुनः संस्कारमर्हति॥ शूद्रोदकपाने शातातपः। यदि विप्रः प्रमादेन शूद्र
तोयं पिबेत्स्वयं मित्युपक्रम्य। उपोष्य बिल्वपत्राणां पलाशस्य कुशस्य च॥ एतेषामुदकं पीत्वा तेन शुद्धिमवाप्नुयात्। अ
पवादमाह। जाबालः। नवभांडे तु पानीयं शूद्रविट्क्षत्रजन्मनां॥ पेयं तदपि विप्राणां पयो दधि तथैव च॥ शंखः। घृतद
धिपयःपलक्षाणाभाकरभां। डस्थितानाम दोष इति शातातपः॥ घृतं तैलं दधि क्षीरं तथैव क्षारसो गुडः। शूद्रभांडस्थि
तं तक्रं तथा मधु न दुष्यतीति॥ प्रपादिजलपाने लघुहारीतः। प्रपाजलं क्षीरघटस्य चैव द्रोणीजलं कोशविनिर्गतं च॥ पी
त्वावगाहेत जलं सवासा उपोषितः शुद्धिमवाप्नुते च। क्षीरघट· क्षीरहक्षनिर्यासाधारपात्रं॥ द्रोणीप्रायसयुक्तायां छ
त्रे प्रा।+ णीनौका जलनिस्सारणपात्रं। कोशविनिर्गतं कूपादे श्चर्मपुटकनिःसारितं एतत्कामतः सकृत् आपदि तु नदो
षः इत्याह स एव। द्रो+ वर्त्तके तथा॥ ग्रामप्रपाजलं चैव पीत्वा यत्र न दुष्यति। छत्रे प्रावर्त्तके से। चके… इति शूलपा
णिः। यमः। प्रपामरण्ये घटके च कूपे द्रोणीजलं कोशगतास्तथापः। ऋतेपि शूद्रात्तदपेयमाहुरापद्गतो भूमिगताः पि

Indira Gandhi National
Centre for the Arts

बेद्य॥ आपद्गतिरेवजंलभूमिष्ठं कृत्वा पात्रांतरेणोद्धृतं पेयमित्यर्थः॥ ॥ अथ संसर्गदुष्टे॥ विष्णुः॥ मद्यादिकुस्कमाद्रीश्च फलकं
मा॰मा॰ ५५ दे कृमूलकान्॥ विएमूत्रदूषितान्नाद्यपचरेत्कृच्छ्रं च पादतः॥ संनिकृष्टेर्धमेवस्मात्कृच्छ्रे। यशुचिभोजने। संनिकृष्टत्वम हा
न्नसंसर्गः। इदं चाज्ञानतः सकृद्भक्षणे रसानुपलब्धौ च॥ ज्ञानतस्तद्द्विगुणं॥ अभ्यासे वृत्तिः। रसोपलब्धौ तु कामतो व्यासः॥
संसर्गदुष्टं पश्चान्यत्क्रियादुष्टं च कामतः। भुक्त्वा स्वभावदुष्टं च तप्तकृच्छ्रं समाचरेत्॥ अज्ञानतो रसोपलब्धौ त्वर्थं॥ संव
र्तः। केशकीटावपन्नं च नीलीलाक्षे। पद्यातितं स्नायस्थिचर्मसंस्पृष्टं भुक्त्वा तूपवसेदहरिति॥ शातातपोपि॥ केशकीटावपन्नं
रुधिरमांसास्ववपमूत्रपवेष्टितयतस्य बलीटश्च सूकरगवाघ्रातमुक्तपर्युषितदृष्यापक्वदेवान्नहविषांभोजनेउ
पवासः। पंचगव्याशनं चेति एतदु भयमाप्यकामतः। यत्तु शंखः। दूषितं केशकीटैश्च मार्ज्जारैर्मूषकैस्तथा। मक्षिकाम
षकैश्चैव त्रिरात्रं तु व्रतं चरेदिति। तद्नापद्किामतः। रजस्वलादिसंस्पर्शेने तु शंखः। अमेध्यपतितचंडालपुल्कसर
जस्वलावधूतकुणिकुष्ठिकुनखिसंस्पृष्टानि भुक्त्वा कृच्छ्रं चरेदिति॥ कुणिर्हस्तविकलः। एतत्कामतः। अकामतो स्म॰
र्धं॥ श्वादिस्पृष्टभोजने तु लघुविष्णुः॥ शूद्रदृष्टं शुना वापि संस्पृष्टं प्रायभोजनं॥ तप्तकृच्छ्रेणशुध्येत प्राजापत्येन वा ५५

पुनः॥ शक्त्यापएकोशतमइति धर्मस्य निश्चयः। शश्वैरपादिकैर्दुष्टं गर्दभैः स्तकैस्तथा। पादहीनं चरेत्कृच्छ्रं शक्त्या सर्वं चरेद्द्वि
जः॥ पाकोत्तरं केशकीटादिपाते तु प्रचेताः। अन्नभोजनकाले तु मक्षिकाकेशदूषितं। अनंतरं स्पृशेदापः तच्चान्नं भस्मना
स्पृशेत्। तेन सह पक्वं तु सान्नं॥ विशुद्धमपि चाहारं मक्षिकाकृमिजंतुभिः। केशरोमनखैर्वापि दूषितं परिवर्जयेदिति। हारीतो
क्तेः। चंडालादिदृष्टे तु। ब्रह्मपुराणे॥ चंडालपतितामेध्यैः कुनखैः कुष्ठिना तथा॥ ब्रह्मप्रसूतिकोदक्याकौलेयककुटंबिभिः।
दृष्टं वा कीटकेशाक्तं मद्भुस्लकनकांबुभिः। शुद्धमध्यात्सहल्लेखं प्रदुष्टं मुष्टमेव चेति। कौलेयकश्वा॥ कुटंबीप्राणिविशेषतः
संहल्लेखं विष्टादिस्मारकं। अदुष्टं पर्युषितं॥ एतत्स्पृष्टभक्षणे तु ब्रह्मपुराणे। चंडालपतितामेध्यैः कुनखैः कुष्ठिना तथा॥ उद
क्यासूतिकास्पृष्टं भुक्त्वा मासं वनेवसेदिति। क्लीबादिदृष्टे तु। शातातपः। क्लीबाभिशस्तपतितैः सूतिकोदक्यनास्तिकैः। दृष्टेना
घातदं त्वन्नं तु तस्य निष्कृतिरुच्यते। तदुक्तोपवसेद्रात्रिं तत्स्पृष्टे तु चतुर्गुणं। उच्छिष्टे षड्गुणं प्रोक्तं अभ्यासे षड्गुणं भवेत् इति॥ का
कादिस्पृष्टमप्यवदति प्रायश्चित्तविवेके यमदेवद्रोणपाविवाहेषु यज्ञेषु प्रकृतेषु च। काकैश्च संस्पृष्टमन्नं तन्न विवर्जयेत्॥
अन्नं तन्मात्रमुद्धृत्य शेषं संस्कारमर्हति। घनानां प्रोक्षणाच्छुद्धिर्द्रवाणामतिपातनात्॥ संसर्गाच्च भवेच्छुद्धिरपामग्नेर्घृतस्य

Indira Gandhi National
Centre for the Arts

प्रा॰ प्रा॰
५६

च॥ छागेन मुखसंस्पृष्टं शुचि चैव च तद्भवेत्॥ यमः॥ गुडादिद्रव्यसंयुक्तं वर्ज्यं पर्युषितं दधि॥ तथैव यावकादीनि मंथादिरचितान्य
पि। अत्र प्रायश्चित्तं ब्रह्मपुराणे॥ सगुणं त्वविशुद्धं च तथा पर्युषितं दधि दीर्णं तक्रमपेयं च नष्टस्वादं च फेनवत्॥ प्रमादाद्भक्षिते
रेभिर्वनेपव्रतं चरेत्। भुक्त्वा तु क्षारलवणं त्रिरात्रं तु वने वसेत्॥ सगुडं मरिचाक्तं च वर्ज्यं पर्युषितं दधीति मदनः पाठः। अस्थ्या
दिदूषितान्नाशने॥ ब्रह्मपुराणे॥ अस्थ्यादिदूषितं चान्नं भुंजानः कपरो भवेत्। स्नात्वार्कमर्चयित्वा तु घृतं प्राश्य विशुध्यतीति॥
शवदूषितजलपाने पराशरः। कूपे च पतितं दृष्ट्वा श्वसृगालौ च मर्कटं॥ अस्थिचर्मादि पतितं पीत्वा मेध्या अपो द्विजः॥ ना
रं तु कुणपं काकं विड्वराहं खरोष्ट्रकं॥ गावयं सौप्रतीकं च मायूरं खाड्गं तथा॥ वैयाघ्रमार्क्षं सैंहं वा कूपे यदि निमज्जति। तडाग
स्याप्यदुष्टस्य पातं स्यादुदकं यदि॥ प्रायश्चित्तं भवेत्पुंसां क्रमेणैकेन सर्वशः॥ विप्रः शुध्येत्त्रिरात्रेण क्षत्रियस्तु दिनद्वयात्॥
एकाहेन तु वैश्यस्तु शूद्रो नक्तेन शुध्यति। सुप्रतीको गजः। हारीतः। क्लिन्ने भिन्ने शवे चैव तत्रस्थं यदि तत्पिबेत्। शुध्यै चां
द्रायणं कुर्यात्तप्तकृच्छ्रमथापि वेति। तत्कामतो संतताभ्यासे॥ कामतो मानुषशवोपहतजलपानाभ्यासे वा चांद्रायणंत राम॰
प्तकृच्छ्रयोः शक्ताद्यवस्था॥ शवदूषिते स्नानमात्रेपि हारीतः। यदि कश्चित्ततः स्नायात्प्रमादेन द्विजोत्तमः जपंस्त्रिषवणस्नाना ५६

दहोरात्रेण शुध्यति॥ कामतो द्विगुणादिकल्प्यं। देवलः। जलाशयेष्वथाल्पेषु स्थाल्पेषु स्थावरेषु महीतले॥ कूपवत्कथिता शु
द्धिर्महत्सु न तु दूषणं॥ वापीकूपतडागेषु दूषितेषु विशोधनं॥ घटानां शतमुद्धृत्य पंचगव्यं ततः क्षिपेदिति। अंगिराः। कू
पे विण्मूत्रसंस्पृष्टे पीत्वा तोयं द्विजोत्तमः॥ त्रिरात्रेण विशुध्येत्तु कुंभे सांतपनं स्मृतं॥ ॥अथ गुणदुष्टाशने॥ तत्र मनुः शुक्ता
नि च कषायांश्च पीत्वा मेध्यान्यपि द्विजः। तावद्भवत्यप्रयतो यावत्तन्न व्रजत्यधः॥ शुक्तं॥ कालपरिवासमात्रेण द्रव्यांतरसं
सर्गकालपरिवासाभ्यां यावत् अम्लीभवति। अत्राकामतः शेषेषु पवसेदहरिति मनूक्त उपवासः। विष्णुरपि। यवगोधूम
जं पयो विकारं स्नेहाक्तं चुक्रुषाभवं वर्जयित्वा पर्युषितं भाक्ष्योपवसेत् चुक्रुषाभवं सूपशास्त्रोक्तं जनविशेषतः। कामत
स्तु शंखः। लोहितान्वृक्षनिर्यासान् व्रश्चनप्रभवांस्तथा॥ केवलानि च शुक्तानि तथा पर्युषितं च यत्। ऋजीषपक्वं भुक्त्वा
च त्रिरात्रं तु व्रती भवेदिति ऋजीषं पिष्टपवनं एतच्चामलकादि फलशुक्तं कांजिकादिव्यतिरेकेण। कुंडिकासफलायै
षु गृहेषु स्थापितास्ता भवेत् तत्स्यात्कांजिकाग्राह्याने तरस्याः कदाचनेति मिताक्षरायांस्मरणात्। मनुः। दधिभक्षं तु शु
क्तेषु सर्वं च दधिसंभवं॥ यानि चैवाभिषूयंते पुष्पमूलफलैः शुभैरिति। उद्धृतस्नेहादिषु तु गौतमः॥ उद्धृतस्नेहपि

Indira Gandhi National
Centre for the Arts

प्रा॰मा॰
५७

रण्याकमथितप्रभृतीनिचचित्रवीर्याणिनाश्नीयादित्युक्त्वाप्राकृपंचनखेभ्यः।छर्दनंघृतप्राशनंवेति।पर्युषितापवादमाह।याज्ञ
वल्क्यः।अन्नंपर्युषितंभोज्यंस्नेहाक्तंचिरसंभृतं।अस्नेहाअपिगोधूमयवगोरसविक्रियाः।अकृतान्नभोजनेतुलिखितआह।यस्य
वाग्नौनक्रियतेयस्यचाग्रंनदीयते।नतद्भोज्यंद्विजातीनांभुक्त्वातूपवसेदहः।संवर्त्तः।शूद्राणांभाजनेभुक्त्वाभुक्त्वावाभिन्नभाजने।।
अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति।भिन्नपवादमाहदेवलः।ताम्ररजतसुवर्णाश्मशंखशुक्तिस्फटिकानांभिन्नमभिन्नमि
ति।।भिन्नभाजनंचकांस्यमेवभिन्नकांस्येतुपोरनीपानघांस्नात्वाजपेद्द्विजः।गापत्रअष्टसहस्रंतुएकभक्तस्तदाशुचिरितिबौधा
पनोक्तेः।एतच्चज्ञानतः।अज्ञानतस्तुपराशरः।।भिन्नभांडेतुभुंजानोह्यज्ञानेनद्विजोत्तमः।सुवर्णोदकसंस्पृष्टंघृतंप्राश्यवि
शुध्यति।।भिन्नाच्छाण्यपांस्मृत्यंतरे।वटार्काश्वत्थपत्रेषुकुंभीतिंदुकपत्रयोः।कोविदारकदंबेषुभुक्त्वाचांद्रायणंचरेत्।पलाश
पद्मपत्रेषुगृही।भुक्त्वैंदवंचरेत्।वानप्रस्थोयतिश्चैवलभतेचांद्रकंफलं।।पलाशोवल्लीपलाशइतिस्मृत्यर्थसारे।हेमाद्रौ
च।।अथकालदुष्टाशने।।ब्रह्मपुराणे।सूतकेमृतकेवापिग्रस्तयोःश्चंद्रसूर्ययोः।छायायांकुंजरस्याथभुक्त्वातुनरकं एम॰
व्रजेत्।भुक्त्वाप्रमादाद्द्विमस्तुसम्यक्चांद्रायणंचरेत्।।षड्विंशन्मतेचंद्रसूर्यग्रहेभुक्त्वाप्राजापत्येनशुध्यतीति।तदकामतः ५७

।हहंतारदीपे।।अर्कद्विपर्वरात्रौचचतुर्दश्यष्टमीदिवा।एकादश्यामहोरात्रंभुक्त्वाचांद्रायणंचरेत्।ग्रहणसंन्निहितनि
षिद्धकालेअज्ञानतोभोजनेतुचंद्रसूर्यग्रहंप्रकृत्यषड्विंशन्मतेतस्मिन्नेवदिनेभुक्त्वात्रिरात्रेणैवशुध्यतीति।प्रायश्चित्तवि
वेकेसंवर्त्तः।।अपोशानमकृत्वातुयोभुंक्तेनापदिद्विजः।भुंजानस्तुपदाब्रूयाद्गायत्र्यष्टशतंजपेत्।।अष्टशतमष्टोत्तरशतं।।
सएव।।अनाचांतःपिवेद्य—भक्षयेद्वापिकिंचन।।गायत्र्यष्टसहस्रंतुजप्यंकृत्वाविशुध्यति।लघुहारीतः।विनायज्ञोपवीतेन
भुंक्तेचब्राह्मणोयदिस्नानंकृत्वाजपंचैवउपवासेनशुध्यति।ब्रह्मपुराणे।रेतोमूत्रपुरीषाणांउत्सर्गश्चेत्प्रमादतः।तदादौतुप्र
कर्त्तव्यातेनशुद्धिर्मृदंबुभिः।पश्चाद्दाचम्यतुजलेजप्तव्यमघमर्षणं।एतदनगीर्णग्रासे।।सकृन्निगीर्णग्रासेतु।आपस्तंबः।
भुंजानस्यतुविप्रस्यकदाचित्स्रवतेगुदं।।उच्छिष्टमशुचित्वंचप्रायश्चित्तंकथंभवेत्।आदौकृत्वातुवैशौचंततःपश्चादुप
स्पृशेत्।अहोरात्रोषितोभूत्वापंचगव्येनशुध्यति।।यत्तुशातातपः।।मूत्रोच्चारसमुत्सर्गेमोहाद्भुंक्तेथवापिबेत्।।त्रिरात्रं
तकुर्वीतइतिशातातपोक्तवादितितद्भूयोग्रासाशने।।आपस्तंबः।मूत्रोच्चारंसकृत्कृत्वाअकृत्वाशौचमात्मनः।।मोहा
द्भुक्त्वात्रिरात्रंतुयवान्पीत्वाविशुध्यतीतिमूत्रपदंपुरीषादेरुपलक्षणं।शातातपः।अथभोजनकालेचेदशुचिर्भवतिद्वि

Indira Gandhi National
Centre for the Arts

जः। भूमौ निक्षिप्य तं ग्रासं स्नात्वा विप्रो विशुध्यति॥ अशित्वा सर्वमन्नं तु त्रिरात्रेण विशुध्यतीति। तैलाभ्यंगादिना स्नाननिमित्ते अकृ
प्रा॰ प्रा॰ तस्नानस्य॥ संवर्त्तः। समुत्पन्ने द्विजः स्नाने भुंजानो यदि वा पिबेत् वा॥ गायत्र्यष्टसहस्रं तु जपेत् स्नात्वा समाहितः। अष्टसहस्रमष्टाधि
५८ कसहस्रं। एतच्च सकृदभ्यासे त्रांखः। नीलवस्त्रं परीधाय भुक्त्वा स्नानार्हको भवेत्॥ त्रिरात्रं तु व्रतं कुर्यात् छित्वा गुल्मलतां तथेति॥
क्रतुः। आसनारूढपादो वा वस्त्रार्धप्रावृतोपि वा॥ मुखेन धमितं भुक्त्वा कृच्छ्रं सांतपनं चरेदिति। एवमेवस्थितप्रकृत्यगच्छत्र्याथाने रत्न
भोजने॥ एकाहस्य हानीत्यभ्रस्य भक्षणे प्रायश्चित्तानि योजनीयानि॥ पराशरः। भुंजानश्चैव यो विप्रः पादं हस्तेन संस्पृशेत्॥ स्व
मुच्छिष्टमसौ भुंक्ते यो भुंक्ते भुक्तभाजने पादुकास्थो न भुंजानः पर्यंकस्थः स्थितोपि वा॥ श्वानचंडालदृष्टो वा भोजनं परिवर्जयेति॥
॥ इति कालदुष्टान्नाशने प्रायश्चित्तं॥ अथ वाग्दुष्टभावदुष्टाशने॥ ब्रह्मपुराणे। भर्त्सनं भर्त्सवाक्येन यो दद्याद्दोषधर्मतः। गुरोरपि
न भोक्तव्यं वाग्दुष्टं तन्महाघकृदिति। यत्र वर्णाकारादिना ऽ भक्ष्यबुद्धिर्विषादिशंकावा जायते तद्भावदुष्टं॥ तत्राकामतः सकृ
द्भक्षणे भावदुष्टादिभक्षणे गौतमः। छर्दनं घृतप्राशनं चेति। कामतस्तु शंखः। वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते॥ भुक्त्वा प्रा.
न्नं ब्राह्मणः पश्चात्त्रिरात्रं तु व्रती भवेदिति। हारीतः। शंकितं प्रतिशंकितान्नं विद्विष्टान्नमथापि च। यदि भुंजीत विप्रो यः प्रा ५८

प्रायश्चित्तं कथं भवेत्। एकरात्रोपवासश्च गायत्र्यष्टशतं जपेत् प्राशयेत् पंचगव्यं च अभिमंत्रैः पंचगव्यं पृथक् पृथक्। इति। इति स्मरणपानप्रसक्ता
नुप्रसक्तप्रायश्चित्तः। अथ स्तेयवर्णलेपे॥ आपस्तंबः॥ ब्राह्मणस्य वर्णापहरणं महापातकमिति। तेन स्वर्णस्य षोडशेति या
ज्ञवल्क्योक्तेः। स्वर्णशतं षोडशमाषोन्मितहेमवचनः॥ एवं चेतो न्यूनहरणे न महापातकं॥ प्रायश्चित्तमाह याज्ञवल्क्यः
निवेनिवेद्य नृपे शुध्येत् सुरापव्रतमाचरन् इति स्मरणपव्रतं द्वादशाब्दं॥ सुवर्णस्तेयानुहन्त्रो महाव्रतं वा द्वादशाब्दानि कुर्यात्
इति कल्पतरौ विष्णूक्तेः॥ द्वादशभिर्वर्षैर्महापातकिनः शुध्यंत इति हारीतोक्तेश्च॥ युगपदनेकसुवर्णहरणेप्येकमेव
प्रायश्चित्तं नावृत्तिः। हरणक्रियाया एकत्वात्। ब्रह्मवधादौ तु हननक्रियाभेदात्। आवृत्तमेव प्रायश्चित्तं॥ प्रायश्चित्तांतरं
आहस्य एव॥ आत्मतुल्यं सुवर्णं वा दद्यात्॥ यत्तु व्यासः। एतदेव व्रतं स्तेनः पादन्यूनं समाचरेत् इति॥ तं त्रिर्गुणस्वामिकसु
वर्णापहारविषयमिति विवंधकृतः। वयं तु। पादोनसुवर्णापहारविषयमिति प्रतीमः। यदप्य—एके॥ त्रिरब्दं वाच
रेत्कृच्छ्रं यजेद्वा क्रतुना द्विजः। तीर्थानि वा भ्रमन् विप्रस्तस्तेयाद्विमुच्यते इति तु तत्कामं कुटुंबभरणाय निर्गुणस्वामि
कसुवर्णापहारविषयमिति केचित्। युक्तं तु पूर्वरीत्यार्द्धसुवर्णापहारविषयत्वं साम्यात्तिदेशाविषयाभूतानश्वरत्नाद्य

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ५१ पहारविषयत्वं वा ॥ क्रतुरत्र स्वर्जिद्दक्षिणः तीर्थभ्रमणं चाशीत्यधिकशतयोजनगमनं द्रष्टव्यं ॥ यत्वापस्तंबः स्तेयं कृत्वा सु
रां पीत्वा गुरुतल्पं च गत्वा चतुर्थकालमितभोजना अपोभ्युपेयुः सवनानुकल्पं स्थानासनाभ्यां विहरंत एते त्रिभिर्वर्षैः
पापानुदंतीति । यदृष्यंगिरा ॥ महापातकसंयुक्ता वर्षैः शुध्यंति तत्त्रिभिरिति तदुभयं पद्मापहारेत्रमेवानुतापेन स्वामिने प्र
त्यर्पयति तद्विषयमिति प्राचः । अन्ये तु स्वर्णचतुर्थांशापहारविषयत्वमाहुः । वस्तुतः सगुणविप्रस्य निर्गुणविप्रस्वामीक
स्वर्णापहारविषयत्वं युक्तं ॥ तथा च भविष्ये विप्रस्य गुणवान्विप्रो निर्गुणस्यापहृत्य च ॥ चतुर्थकाले भुंजानस्त्रिभिर्वर्षै
र्व्यपोहतीति ॥ विषयांतरमप्युक्तं तत्रैव ॥ यदा च निर्गुणः स्वामी क्षत्रियो वैश्य एव च ॥ हृत्वा च ब्राह्मणो वीर तदापस्तंबभाषितं ॥
तत्रैव ॥ क्षत्रियस्य गुणाढ्यस्य हृत्वा विप्रस्य निर्गुणः ॥ चतुर्थकाले भुंजानस्त्रिभिर्वर्षैर्व्यपोहतीति । इदं च वाक्यद्वयं ॥ न्यू
नाधिकपरिमाणविषयत्वाद विरुद्धं ॥ यत्तु सुमंतुः स्वर्णस्तेयी मासं सावित्र्याष्टसहस्रमाज्याहुतीर्जुहुयात्त्र्यह
त्रिरात्रमुपवासः प्रकृच्छ्रेण च पूतो भवतीति । यच्चापस्तंबः । स्तेयं कृत्वा सुरां पीत्वा संवत्सरं चरेदिति तत्स्वर्णद्वादशभा एम॰
गापहारविषयं ॥ यत्तु सुमंतुः स्वर्णस्तेयी द्वादशरात्रं वायुभक्षः पूतो भवतीति । तन्मानस्यापहारविषयमिति प्राचः । ५१

निष्फलकायिकप्रवृत्तिविषयत्वं तु सम्यक् मिताक्षरायां इदं मनसि पापं ध्यात्वा प्रणवपूर्वा व्याहृतीर्मनसा जपेत् । व्याहृत्य प्रा
णायामं त्रिरात्रं चरेत् ॥ प्रवृत्तौ कृच्छ्रं द्वादशरात्रं चरेदिति व्याहृत्याभिलप्य ॥ षड्विंशन्मते ॥ यवमात्रस्वर्णस्य प्रायश्चित्तं दिन
द्वयं सुवर्णकृष्णलं स्तेयकमथ चेत् द्विजोत्तमः ॥ कुर्यात्सांतपनं कृच्छ्रं तत्पापस्यापनुत्तये । अपहृत्य सुवर्णस्य मासमात्रं द्विजाध
मः । गोमूत्रयावकाहारः त्रिभिर्मासैर्व्यपोहति ॥ वर्णस्यापहरणे वत्सरं यावकी भवेत् ॥ ऊर्ध्वं प्राणांतिकं ज्ञेयमथवा ब्रह्महत्र
तं ॥ वत्सरमिति । सुवर्णपरिमाण द्वादशांशमाषाधिकहेमविषयं ॥ प्राणांतिकं तु ज्ञानपूर्वकापहारविषयं ॥ अज्ञानतस्तु द्वा
दशाब्दं विप्रस्य । यत्तु भवदेवः । विप्रे तु सकलं देयं पादोनं क्षत्रिये स्मृतं ॥ वैश्येर्धं पादशेषं तु शूद्रजातिषु शस्यत इति वि
ष्णूक्तेः । क्षत्रियादेः पादपादहानिरिति । तदयुक्तं ॥ द्विविधं स्तेयं बलावष्टंभेन क्रियमाणं साहसाख्यमेकं परं च चौर्यं त
त्राद्ये पादोनादिवाधकेन चतुर्विधसाहसविषयेण पर्षद्ब्राह्मणनाभिमांगिरसोक्तस्यैव द्वैगुण्यस्यास्याप्यत्वात्
द्वितीयेपि विप्रस्वामिकसुवर्णस्यैव ब्राह्मणार्द्धं तु विज्ञेयं द्रव्यमुत्तममिति । नारदेनोत्तमद्रव्यतोक्तेस्तत्र च दंड
भूयस्त्वाहत्यागोषु ब्राह्मणसंस्थास्वितनेन विप्रस्वामिकगोवधे दंडगौरवाद्विदुषोतिक्रमे दंडभूयस्त्वमिति वचना

Indira Gandhi National Centre for the Arts

प्रा॰मा॰ ६०

च्चात्रापि क्षत्रियादीनां प्रायश्चित्ताधिक्यमेवोचितं न तु पादपादन्यूनमिति। कामतः स्वर्णस्तेये तु याज्ञवल्क्यः। ब्राह्मणः
स्वर्णहारी तु राज्ञे मुसलमर्पयेत्। स्वकर्म ख्यापयंस्तेन हतो मुक्तोथवा शुचिः। मुक्तः प्रहृतोपि जीवन्नत्वप्रहृत एवेत्यर्थः। अ
प्रहृतेन स्त्री राज्ञेति गौतमेनाप्रहारेण दोषोक्तेः ततो मुसलमादाय क्रुद्धो हन्यात्तु तं स्वयं। यदि जीवति स स्तेनस्ततः स्ते
याद्विमुच्यत इति संवर्त्तोक्तेश्च॥ एतेन स्तेनपोष्याणां बहूनां सति संभावनायामप्रहृतोपि जाचनशुद्ध इति माधवोक्ति
रिति रपास्ता मानाभावाच्च॥ भविष्ये॥ महत्यपहृते पुत्र तथाल्पे च हृते गुरु॥ इत्यद्रव्यविशेषाद्वै स्वामिनस्तस्करस्य च॥
प्रयोजनविशेषाच्च विशेषाद्देशकालयोः॥ अनुबंधविशेषाच्च प्रायश्चित्तं विकल्पयेत्। तत्रैवाद्य धस्यापहृतं द्रव्यं तत्त
स्यैव विनिर्दिशेत्। प्रायश्चित्तं ततः कुर्यादेवं शुद्धिमवाप्नुयात्॥ विष्णुः। दत्त्वैवापहृतं द्रव्यं धनिकस्याप्युपायतः। प्रायश्चि
त्तं ततः कुर्यात्कल्मषस्यापनुत्तये॥ अत्र विशेषमाह मनुः। चरेत्सांतपनं कृच्छ्रं तन्निर्यात्यात्मशुद्धय इति॥ तद्द्रव्यं निर्या
त्य स्वामिने दत्त्वा शुद्धये प्रायश्चित्तं पोष्य त्वार्थमित्यर्थः। अत एव भविष्ये॥ तन्निर्यात्येति वाक्यं तु प्रवदंति मनीषिणः। प्रा॰ ६०
तत्पूर्वं चैव योग्यस्य सूचकं नात्र संशयः॥ तत्पूर्वं प्रातिस्विकप्रायश्चित्तात्पूर्वं योग्यस्येति भावप्रधानो निर्देशः। यो

ग्यत्वस्येत्यर्थः। केचित्तु सुवर्णपरिमाणन्यूने चोरितं धनं स्वामिने दत्वा स्वशुद्धये सांतपनकृच्छ्रं कुर्यादिति मानवीयार्थः। तत्कृच्छ्रे
न सुवर्णमितं। पूर्वं ततो न्यूनं योग्यस्य शुद्धेः कारकमिति तु भविष्यस्यार्थ इत्याहुः॥ सुवर्णस्तेये तु एकादशांशाधिकं चोरि
तधनं स्वामिने देयं। तथा च मिताक्षरायां॥ स्तेये ब्रह्मस्वभूतस्य स्वर्णादेः कृते पुनः। स्वामिने प्रहृतं देयं हर्त्रा त्वेकादशाधिकं॥
गुणसंशुद्धिभावाय ततः श्चांद्रायणद्वयं॥ संवत्सरेण शातय्यं निपुणां शुद्धिमिच्छता॥ अभाद्धेकांचनस्यस्यात्र तमेतच्चतुर्गु
णं॥ चरेद्यतात्मा निःसंगः पूर्णं वर्षचतुष्टयं॥ समाप्ते कांचनं गाश्चरजतं चापि शक्तितः। देयमत्रं द्विजाग्रेभ्यः शुभं पापोप
शांतय इति॥ गुणसंशुद्धिरणस्य शुद्धिः। चांद्रायणत्रयमिति। यवमध्यादीनि त्रीणि चांद्रायणानि वत्सरमध्ये इत्यर्थः इदं
च दोषप्रायश्चित्तादिकं रसवेधाद्यापादितसुवर्णस्यादत्रपे त्वात्राहो न भवति। सुवर्णत्वजातिसमकायाभावात्॥ अथ सुव
र्णस्तेयसमेषु॥ मनुः॥ निक्षेपस्यापहरणं नराश्वरजतस्य च। भूमिवज्रमणीनां च रुक्मस्तेयसमं स्मृतं। स्मृतं नरे॥ पुरुषा
णां कुलीनानां नारीणां च विशेषतः। मुख्यानां चैव रत्नानां हरणे वधमर्हति॥ याज्ञवल्क्यः। अश्वरत्नमनुष्यस्त्रीभूधेनुहर
णं तथा॥ निक्षेपस्य च सर्वस्य स्वर्णस्तेयसमं स्मृतं। मनुष्यग्रहणेनैव सिद्धे स्त्रीपदं षष्ठ्याद्यर्थं॥ विष्णुः। ब्राह्मणभूहर

Indira Gandhi National Centre for the Arts

णांसुवर्णस्तेयसममिति। अत्र षड्वृंशिन्मुक्तं॥ परिभाषायां॥ अल्पमूल्यरत्नादौ तु चतुर्विंशतिमते॥ रत्नानां हरणे विप्रश्चरेच्चांद्रायणत्र
प्रा·मा· यमिति। मनुरपि। मणिमुक्ताप्रवालानां ताम्रस्य रजतस्य च॥ अयःकांस्योपलानां च द्वादशाहं कणान्नता॥ स एव मनुष्याणां तु हरणे
६१ स्त्रीणां क्षेत्रगृहस्य च॥ वापीकूपतडागानां शुद्धिश्चांद्रायणं स्मृतमिति। मनुष्यो दासः। स्त्री दासी। स्मृत्यंतरे॥ रूप्यं हृत्वा द्विजो
मोहाच्चरेच्चांद्रायणव्रतं॥ गद्याणदशकादूर्ध्वं पादशतां द्विगुणं भवेत्। आसहस्राच्च त्रिगुणं ऊर्ध्वं हेमविधिः स्मृत इति। गद्याणो
गुर्जरदेशे प्रसिद्धः॥ रत्नताम्रायःकांस्यमनुष्यापहारेष्वपि प्रायश्चित्तेपन्नार्थनियममेव मूल्येयत्ता ज्ञेया॥ मनुः॥ धान्यान्नधन
चौर्याणि कृत्वा कामाद्द्विजोत्तमः॥ सजातीयगृहादेव कृच्छ्राद्धेन विशुध्यतीति॥ स्मृत्यंतरे॥ अष्टापद्यं स्तेयकिल्बिषं शूद्रस्य
द्विगुणोत्तराणीतरेषामिति॥ किल्बिषं दंडः॥ स शूद्रस्यापह्रियमाणद्रव्यादष्टगुणः॥ विदुषस्तत्र विप्राणां तु षोडशद्वात्रि-
शच्चतुःषष्टिगुण इति। अत एव मनुः। अष्टापद्यं हि शूद्रस्य स्तेये भवति किल्बिषं। षोडशैव तु वैश्यस्य द्वात्रिंशत्क्षत्रियस्य च॥ प्रा·
ब्राह्मणस्य चतुःषष्टिः पूर्णं वापि शतं भवेत्॥ शंखः। तथा धनस्यापहारे मणीनां रजतस्य च॥ धान्यापहरणे चैव कुर्यात्संव ६१
त्सरव्रतमिति॥ इदं च दशकुंभधान्ये तन्मूल्ये च धनादावपहृते ज्ञेयं॥ धान्यं दशभ्यः कुंभेभ्यो हरतोऽभ्यधिके वध इति मनू

क्तेः॥ कुंभमाह कात्यायनः॥ दशद्रोणा भवेत्खारी कुंभोपि द्रोणविंशतिरिति॥ द्रोणलक्ष। पलं च कुडवः प्रस्थ आढको द्रोण एव च॥
धान्यमानेषु विज्ञेयाः क्रमिशोमी चतुर्गुणा इत्येवं क्रमात् ज्ञेयः॥ यत्तु जाबालः। पक्वान्नमौषधं तैलं शय्या वा सउपानहौ॥ कां
स्यायस्ताम्रसीसं वा अर्द्धकृच्छ्राईमेव च॥ उदके फलमूलेषु पुष्पपर्णसुगंधिषु॥ मद्यांडमधुमांसेषु संतोष्य स्वामिनं ततः॥
पापं निवेद्य विप्रेभ्यः प्रायश्चित्तेन युज्यत इति॥ कृच्छ्राद्धं पादमित्यर्थः। तदधिकपरिमाणगुडादि विषयं॥ जाबालः। मणिमुक्ता
प्रवालानां ताम्रस्य रजस्य च॥ अयःकांस्योपलानां च द्वादशाहं कणान्नतेति। द्वादशगुणप्रायश्चित्तदर्शनात्तन्मूल्याद्दश
गुणमूल्यमणिमुक्ताद्यपहार इदं॥ यत्तु विष्णुः। रजतस्वर्णभूमिकन्यानां सकृद्धरणे चांद्रायणमिति। तत्किंचिदधिकवि
षयं॥ मनुः॥ कार्पासकीटजोर्णानां द्विशफैकशफस्य च॥ पक्षिगंधौषधानां च रज्ज्वाश्चैव त्र्यहं पय इति॥ कीटजाः
पट्टादयः॥ देवद्रव्यापहारेषु मनुः। देवद्विद्रव्यहर्त्ताऽप्सुनिमग्नोऽघमर्षणमावर्त्तयेदिति। अत्र संवत्सरप्रक्रमा
त्तावत्कालीनावृत्तिर्ज्ञेया॥ स्तेयप्रसंगाद्वृत्तिच्छेदे प्रायश्चित्तमाह शंखः। यस्य यस्य तु वर्णस्य वृत्तिच्छेदं समाचरेत्॥ तस्य
तस्य वधे प्रोक्तं ब्राह्मणानुमते चरेदिति। एतच्च वृत्त्यर्हभूम्यपहारे ज्ञेयं॥ अत्र चापहारशब्दस्य बलात्ज्ञानपूर्वपरत्वा

Indira Gandhi National Centre for the Arts

प्रा॰ प्रा॰ ६२ दानवाचित्वात्समादतइतिशास्त्रार्थपरिज्ञानपरं।अत्रोभयत्रवधनिमित्तकप्रायश्चित्तातिदेशात्यादोनं॥तच्चकामेकामो
कस्यअकामेत्वकामोक्तस्येति।स्तेयापवादमाहशंखः॥अस्तेयमग्नयेकाष्ठमस्तेयंचतृणंगवे कन्याहरणमस्तेयंयो
हरत्यनलंकृतामितिकन्याहरणंराक्षसविवाहपरं॥मनुरपि॥द्विजोध्वगः क्षीणवृत्तिर्द्वाविक्षूद्वेचमूलके॥आददानःपर
क्षेत्रान्नदंडंदातुमर्हति।तथा॥चणकव्रीहिगोधूमयवानांमुद्गमाषयोः॥अनिषिद्धैर्ग्रहीतव्यामुष्टिरेकःपथिस्थितैः॥
तथैवसप्तमेभक्तेभक्तानिषडनश्नता।अश्वस्तनविधानेनहर्तव्यंहीनकर्मणइति।इतिभट्टनीलकंठकृतेप्रायश्चित्तेप्रा
यश्चित्तानि॥ ॥अथागम्यागमनप्रायश्चित्तानि॥ ॥तत्रगुरुतल्पेशंखः॥ ॥अधःशायीजटाधारीपर्णमूलफलाशनः।ए
ककालंसमश्नैववर्षेतुद्वादशेगते रुक्मस्तेयाकृणपश्चब्रह्महागुरुतल्पगः।व्रतेनैकेनशुध्यंतिमहापातकिनस्त्विमइति।
गुरुतल्पगोगुरुभार्य्यागामी।गुरुःपिता।अतएवसंवर्त्तः।पितृदारान्समारुह्यमातृवर्जंनराधमः।भगिनींचनिजांगत्वा
निष्कृतिर्नविधीयतइति॥निष्कृतिर्व्रतरूपा।मरणरूपात्वस्त्येव।पितृभार्यांतुविज्ञायमातृवर्जंनराधमः॥जननींवाप्य
विज्ञायनाप्नुतःशुद्धिमाप्नुयात्।इतिषट्त्रिंशन्मतात्।अत्रजननीगमनंनमहापातकं॥किंत्वतिपातकं॥मातृगम प्रा॰ ६२

नंदुहितृगमनंस्नुषागमनमित्यतिपातकानीतिविष्णूक्तेः॥मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानीतिभवदेवीये॥
वृद्धहारीतोक्तेश्च॥एतेनगुरुश्चासावंगनेतिकर्मधारयेणजननीगमनंमहापापमितिभवदेवोक्तिरपास्ता॥यत्तुमूलपा
णिः।आचार्यस्तत्पिताज्येष्ठोभ्राताचैवमहीपतिः॥मातुलःश्वशुरस्त्राताभातामहपितामहौ॥वर्णश्रेष्ठःपितृव्यश्चपुंस्येतेगु
रवोमताइतिदेवलोक्तेश्च।आचार्यश्रेष्ठोगुरूणामितिगौतमोक्तेः।त्रयःपुरुषस्यगुरवोभवंतिमातापिताआचार्यश्चेतिविष्णू
क्तेश्चाचार्यादिपत्नीगमनमपिमहापापमित्याह॥तन्न॥आचार्यपत्नींस्वसुतांगच्छंश्चगुरुतल्पगइतिआचार्यादिपत्नीषुगु
रुतल्पातिदेशविरोधात्॥नचातिदेशोहीनवर्णपत्नीपरोमानाभावात्।देवलादिवचांसित्वाचार्यादीनांपूज्यत्वपराणि॥क
थंचगुरोश्चालीकनिर्बंधइत्यत्रगुरुपदंकेवलपितृपरमत्रत्वाचार्यादिपरमितिविरुद्धंमूलपाणेर्वचःश्रद्धेयं।प्रा
यश्चित्तंतदमाहांगिराः।महाव्रतंचरेद्वापिदद्यात्सर्वस्वमेववेति।व्यभिचरितायांसवर्णायां।मातरिसकृद्गमनेतुयो
गी॥चांद्रायणंवात्रीन्मासानभ्यसन्वेदसंहितामिति।गर्भोत्पत्तौ — तान्येवप्रायश्चित्तानिद्विगुणानि॥गमनेयद्व्रतंप्रो
क्तंगर्भेतद्द्विगुणंभवेदितिचतुर्विंशतिवाक्यात्।गमनावृत्तावपिप्रायश्चित्तावृत्तिः।कामतोजनन्यतिरिक्तगुरुभार्यागमने

Indira Gandhi National
Centre for the Arts

तुयाज्ञवल्क्यः।तप्तेयःशयनेसार्द्धमायस्यायोषितास्वपेत्।तप्तेशरीरंवाहत्स्नमेमनुरपि॥स्वयंवाशिश्नवृषणावुत्कृत्याधायचांजलौ॥
नैऋतींदिशमातिष्ठेदानिपातादजिह्मगइति।आतिष्ठेत्गच्छेत्।निपातोमरणं॥अयमेवचदंडः।आसामन्यतमागच्छन्
गुरुतल्पगउच्यते॥शिश्नस्योत्कर्त्तनात्तत्रनान्योदंडोविधीयतइतिदेवलोक्तेः।जनन्यामकामतोपिगमनएतदेवमरणंप्राय
श्चित्तरूपंबोध्यं॥जनन्यांकामतस्तुवसिष्ठः।निष्कालकोघृताक्तोगोमयाग्निनापादप्रभृत्यात्मानमवदाहयेदिति॥अ
भ्यासेगर्भोत्पत्तौचेदमेवान्यानुक्तेः।एतानिचप्रायश्चित्तान्यौरसपुत्रस्यैव॥दत्तकादीनान्तून्नंकल्प्यमितिनिबंधकृतः
।जनन्यांकामतःप्रवृत्तस्यरेतः।सेकाद्वर्वाक्निवृत्तौद्वादशाब्दं।अकामतःषडब्दं।तत्सपत्न्यांकामतःषडब्दं॥अकाम
तस्त्र्यब्दमितिकल्प्यं।शूद्रस्यविप्रागमनेतुप्रचेताः।शूद्रस्यब्राह्मणीमोहाद्गच्छतःशुद्धिमिच्छत।पूर्णमेवव्रतंदेयं
मातायस्याद्विजस्यसेति।गुरूपभुक्तास्वपिसाधारणस्त्रीषुगमनेगुरुतल्पदोषोनास्तीत्याह॥व्याघ्रपादः।ज्ञात्युक्तंपार
दार्यंचकन्यादूषणमेवच॥साधारणस्त्रियोनास्तिगुरुतल्पत्वमेवचेतिसाधारणस्त्रीवेश्या॥॥अथभगिन्यादिगमने॥॥ 
मनुः॥रेतःसेकःकुमारीषुस्वयोनिष्वंत्यजासुच॥सख्युःपुत्रस्यचस्त्रीषुगुरुतल्पसमंविदुरिति॥स्वयोनिर्भगिनी।कुमा 

रीउत्तमजातीयाकन्या॥सखामातुलस्त्वनुले।मातुलदोषस्त्वन्यथादमः।दूषणेतुकरच्छेदउत्तमायांवधस्तथेति॥तत्रैवदंडविशे
षोक्तेः।याज्ञवल्क्यः।सखिभार्याकुमारीषुस्वयोनिष्वंत्यजासुच।सगोत्रासुसुतस्त्रीषुगुरुतल्पसमंस्मृतमिति।अंत्यावसा
यिनआह॥मध्यमांगिराः।चंडालःश्वपचःक्षत्तासूतोवैदेहकस्तथा॥मागधायोगवौचैवसप्तैतेंत्यावसायिनइति॥चं
डालादीनाहयाज्ञवल्क्यः॥ब्राह्मण्यांक्षत्रियात्सूतोवैश्याद्वैदेहकस्तथा॥शूद्राज्जातस्तुचांडालःसर्वधर्मबहिष्कृतः।क्षत्रि
यामागधंवैश्याच्छूद्रात्क्षत्तारमेवच॥शूद्रादायोगवंवैश्याजनयामासवैसुतमिति।विष्णुः।पितृव्यमातामहमातुल
पत्न्यभिगमनंगुरुदारगमनसमंपितृष्वसृमातृष्वसृगमनंश्रोत्रियर्त्विगुपाध्यायमित्रपत्न्यभिगमनंचेति।अत्र
साम्यातिदेशाद्द्वादशाब्दप्रायश्चित्तमित्युक्तंपरिभाषायां।याज्ञवल्क्यः।पितुःस्वसारंमातुलानींस्नुषामपि।मातुःसपत्नीं
भगिनींआचार्यतनयांतथा॥आचार्यपत्नींस्वसुतांगच्छंस्तुगुरुतल्पगइति॥मातुःसपत्नीहीनवर्णा॥समोत्तमवर्णाग
मनस्यगुरुतल्पत्वोक्तेः॥नारदः।मातामातृष्वसाश्वश्रूर्मातुलानीपितृष्वसा।पितृव्यसखिशिष्यस्त्रीभगिनीतत्सखीस्नु
षादुहिताचार्यभार्याचसगोत्राशरणागता॥राज्ञीप्रव्रजिताधात्रीसाध्वीवर्णोत्तमाचया।आसामन्यतमांगच्छन्गुरुतल्प

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ६४ गच्छत इति। एतेनाभिषिक्तक्षत्रियपत्नी। क्षत्रियांतरपत्न्यां लघुप्रायश्चित्तस्यैव कल्प्यमानत्वात्। मातृग्रहणं दृष्टांतार्थं॥
अत्र मातृसपत्न्यातिदेशोक्तिदिरूपमानप्रायश्चित्तं पादोनं। भवतीति वृद्धपारिभाषायामेव॥ तच्चाकामतस्त्रीणां। मातृग्रहणं
दृष्टांतार्थं एकरात्रादूर्ध्वमत्यंताभ्यासविषयं। अत्रैव कामतोत्यंताभ्यासे तु वृहद्यमः। रेतःसिक्त्वा कुमारीषु स्वयोनिष्वंत्य
जासु च। सपिंडापुल्कसानां तु भुक्त्वा गत्वा च योषितं। कृच्छ्रं चरेत् ज्ञानादज्ञानादैंदवद्वयमिति॥ इदमेव च कुमारीगमनेपि ज्ञे
य॥ वृहद्यमयाज्ञवल्क्याद्यनेकवचनोपात्तत्वेन तुल्यधर्मत्वात्। बहूनामेकधर्माणामेकस्यापि यदुच्यते॥ सर्वेषां तद्भवेत्कार्यमेक
रूपा हि ते स्मृता इति विज्ञानेश्वरादयः। अकामत एकरात्राभ्यासे तु त्रैवार्षिकं। तथा च मनुः। यत्करोत्येकरात्रेण वृषलीसेवना
द्द्विजः। तद्भैक्ष्यभुग्जपन्नित्यं त्रिभिर्वर्षैर्व्यपोहतीति। वृषली चात्र चंडालीति अपरार्कमिताक्षराकल्पतरुभवदेवीयादिषु॥
तथा च मिताक्षरायां। स्मृत्यंतरं। चंडाली बंधकी वेश्या रजस्था या च कन्यका॥ ऊढा या च सगोत्रा स्यात् वृषल्यः पंच कीर्तिता इति
॥ शूद्रीति शूलपाणिः। स्मृत्यंतरवाक्यं॥ त्वनाकरमिति मेने। अत्र चैकरात्रेणेत्यत्यंतसंयोगवाचिन्यास्तृतीयया अभ्यासोवगम्यते॥ राम॰
कामत एकरात्राभ्यासे तु द्विगुणं॥ माधवीये। व्याघ्रः। आश्रितस्यापि विदुषः आहिताग्नेश्च एषितः। आचार्यस्य च राज्ञश्च ६४

भार्यां प्रव्रजितां तथा। धात्रीं पुत्रीं च पौत्रीं च सखीं मातुलस्यैव च पितुः सखीं तथा गत्वा गुरुतल्पव्रतं चरेत्। एकरात्रादूर्ध्वका
मतोत्यंताभ्यासपरमिदं। अस्मिन्नेव विषये॥ मनुः। चंडालांत्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञाना
त्साम्यं तु गच्छतीति। अत्राज्ञानात्त्रैवार्षं॥ ज्ञानतो मरणं॥ जनन्यां च भगिन्यां च स्वसुतायां तथैव च। स्नुषायां गमनं चैव विज्ञेय
मतिपातकं॥ अतिपातकिनः त्वेते प्रविशेयुर्हुताशनं॥ न ह्यन्या निष्कृतिस्तेषां विद्यते हि कथंचनेति कात्यायनोक्तेः। वृ
हद्धारीतोपि। मातृदुहितृभगिनीस्नुषागमनान्यतिपातकानि स घोग्निप्रवेशोतिपातकिनामिति। यत्तु संवर्तः। मातरं यो धिग
च्छेत्तु स्वस्नुषां पुरुषाधमः। न तस्य निष्कृतिं विद्यात् स्वकां दुहितरं तथेति। भ्रातृभार्यागमने संवर्तः। पितृव्यभार्यागमने
भ्रातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्यान्नान्या निष्कृतिरुच्यत इति॥ एतच्च कामतो बहुकालाभ्यासविषयं॥ कामतस्तु
मरणांतिकमेव॥ यत्तु॥ याज्ञवल्क्यः। अनियुक्तो भ्रातृजायां गच्छंश्चांद्रायणं चरेदिति। तद् सवर्णव्यभिचारिभ्रातृजाया
विषयमिति। कनिष्ठभ्रातृभार्यागमने चतुर्विंशतिमते। भ्रातुश्चैव कनिष्ठस्य भार्यां गत्वा तु कामतः। कृच्छ्रद्वयं सांतपनं
प्रकुर्वीताथवापि वेत्। आचार्यभार्यागमने जातूकर्ण्यः। आचार्यादेस्तु भार्यासु गुरुतल्पव्रतं चरेत्। आदिपदादुपाध्या

Indira Gandhi National Centre for the Arts

मा॰मा॰
६५

दीनांग्रहणं। यत्तु चतुर्विंशतिमते॥ चरेच्चांद्रायणं विप्रो गत्वोपाध्याययोषितं॥ आचार्यस्य परं कन्तु बोधायनवचो यथेति। न
घभिचरितोपाध्यायभार्यापिस्यल्लीपरं॥ यत्तु बृहद्यमः॥ चांडालीपुल्कसीम्लेच्छस्नुषां च भगिनीं सखीं। मातापित्रोः स्वसारं च नि
क्षिप्तां शरणागतां। मातुलानीं प्रव्रजितां सगोत्रामन्ययोषितं। शिष्यभार्यां गुरोर्भार्यां गत्वा चांद्रायणं चरेदिति। यत्तु सुमंतुः। मा
तृष्वसृसुताभगिनीभागिनेयीगो चांडालीगमनेषु तप्तकृच्छ्रत्रयं सांतपनं चेति। यच्चांगिरः। पतितान्यस्त्रियो गत्वा भुक्त्वा भुक्त्वा
च प्रतिगृह्य च। मासोपवासं कुर्वीत चांद्रायणमथापि वेति। यच्च संवर्तः॥ चांडालीपुल्कसीम्लेच्छीश्वपाकीपतितां तथा॥
एता गत्वा द्विजो मोहाच्चरेच्चांद्रायणव्रतं। यच्च हारीतः। गुरुतल्पगो मन्यमयीं स्त्रीं प्रतिकृतिमग्निवर्णां कृत्वा तामालिंग्य
मन्युना पूतो भवति। एवमेव पितृव्यस्त्रीगमने ल्वस्य मातृपितृष्वसृगमने कन्यासगोत्रासखीपाभगिनीगमने चांद्रायणं
वेति तत्र चांद्रायणं रेतःसेकादर्वाक् इति ज्ञेयं॥ यदपि संवर्तः भगिनीं मातुराप्तां च स्वसारं चान्यमातृजां। एता गत्वा द्विजो मो
हात्तप्तकृच्छ्रं समाचरेत्॥ कुमारीगमने चैव तमेतद्विनिर्दिशेत्। तथा गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च। तस्य दु एम॰
हितरं चैव चरेच्चांद्रायणव्रतं। मातुलस्य सुतां गत्वा मातुलानीं सनाभिनीं। एता गत्वा त्रिपो मोहात्पराकेण विशुध्य ६५

तीति। तद्व्यवहितपतितादिभगिन्यादिगमनविषयं॥ यत्तु विष्णुः चांडालीगमने तत्साम्यमाप्नुयात्। अज्ञानाच्चांद्रायणं॥ यच्च गौतमः।
चांडालीगमने कृच्छ्राब्दो मत्या द्वादशरात्र इति। तत्र साम्यं कृच्छ्रीद्वयो विषयः कल्प्यः। चांद्रायणस्यापि। अज्ञानात्सकृद्गमने हरणं
मात्रे तु द्वादशरात्रः॥ बौधायनः। मातृष्वसा भागिनेयी स्नुषा मातुलानी सखी गम्यागमने कृच्छ्रातिकृच्छ्रौ चांद्रायणमिति। संव
र्तः। सखिभार्यां समारुह्य श्वश्रूश्चैव हि मानवः। अहोरात्रोषितो भूत्वा ततः कृच्छ्रद्वयं चरेत्॥ चतुर्विंशतिमते। मातुश्च स्व
स्रियां गत्वा पितृव्यतनयां तथा॥ तप्तकृच्छ्रं प्रकुर्वीत षड्रात्रं तत्सुतासु च॥ गुरोर्दुहितरं गत्वा पराकं च समाचरेत्॥ भागि
नेयीं द्विजो गत्वा चरेच्चांद्रायणव्रतं॥ मातुलस्य सुतां गत्वा पितुः स्वस्रियां तथा। प्राजापत्यं प्रकुर्वीत हारीतवचनं यथा। मा
तुःश्वस्स्रीयां गत्वा तु कामतः। पितृव्यतनयां चैव संपादं कृच्छ्रमाचरेत्। द्रौहित्रीपुत्रतनयां चरेच्चांद्रायणव्रतं। तत्सुतां
तत्स्नुषां गत्वा पराकं तु समाचरेत्। संबंधिनस्त्रियं गत्वा पादकृच्छ्रं समाचरेत्॥ विधवागमने कृच्छ्रमहोरात्रसमन्वितं।
आचार्यस्य परं तु बोधायनवचो यथा॥ सखिभार्यां समारुह्य जातिस्वजनयोषितं। स कृत्वा प्राकृतं कृच्छ्रं पादं कुर्या
त्ततः पुनः। कुमारीगमने विप्रश्चरेच्चांद्रायणव्रतं॥ पतितां तु द्विजो गत्वा तदेव व्रतमाचरेदिति। बृहन्मनुः। मातुर्मा

Indira Gandhi National
Centre for the Arts

त्यगमनेपि तन्मातृगमने तथा॥ एताश्च कामतो गत्वा द्विजः श्चांद्रायणं चरेत्। संवर्त्तः। असतीं मातुलानीं च स्वसारं चान्यमातृजां॥ ए
ताद्विजस्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत्। इत्याद्यनेकस्मृतिवचनातिसंबंधसंनिकर्षविप्रकर्षापेक्षया योजनीयानि॥ वर्षाणी
त्यनुवृत्तौ। गौतमः। द्विपरदारे त्रीणि श्रोत्रियस्य द्रव्यलाभे चोत्सर्गो यथास्थानं वा गमयेदिति॥ तया प्रदत्तं धनं तु त्यक्तव्यं। तदा
यं तत्रैव वा प्रत्यर्पणीयमित्यर्थः। वार्षिकप्रायश्चित्तव्रतमुक्तं स एव। उभयात्मकेषु चैवमिति। यमः। द्विवर्षे परभार्यायां त्रीणि श्रो
त्रियपत्नीष्विति। तत्रेयं व्यवस्था॥ ऋतुकाले कामतो ज्ञातिमात्रब्राह्मणीगमने वार्षिकं॥ तत्रैव गुणविशेषशालिनां द्विवर्षं॥
तादृश्या एव श्रोत्रियभार्यायागमने त्रीणि वर्षाणीति। अथवा श्रोत्रियगुणवद्ब्राह्मणक्षत्रियादिभार्याविषयत्वेनैतानि॥
व्यवस्थापनीयानि। अत एव शंखः। वैश्यायामवकीर्णः संवत्सरं ब्रह्मचर्यं त्रिषवणं वानुतिष्ठेत्। क्षत्रियायां द्विवर्षं त्री
णि ब्राह्मण्यां वैश्यावच्च शूद्रायामिति। वैश्यावच्चेति ब्राह्मणः परिणीतायां। शूद्रपरिणीतायां तु षाण्मासिकमेव॥ शूल
पाणिस्तु सच्छूद्रा वैश्यावत्। असच्छूद्रां तु षाण्मासिकमित्याह। तेन क्षत्रियस्यापि क्षत्रियागमने द्विवार्षिकमेव। तदा
ह प्रजापतिः। विप्रो नृपस्य भार्यायां यत्करोति समागमे॥ तदेव क्षत्रियस्यापि कुर्यादत्रैव संगम इति। एवं क्षत्रियस्य वैश्या



दिस्त्रीषु क्रमेण वार्षिकं षाण्मासिकं च एवं वैश्यस्यापि वैश्याशूद्रयोर्वार्षिकषाण्मासिके॥ शूद्रस्य शूद्रायां षाण्मासिकमेव॥
अनुपभुक्तागमनं। आपस्तंबः॥ सवर्णायामनन्यपूर्वायां सकृत्संनिपाते पादः। पतत्येवमभ्यासे पादः। पादश्चतुर्थे सर्वमिति।
अनुपभुक्तायामेकस्यां श्रोत्रियपत्न्यागमने पादहीनं वार्षिकं॥ तादृश्यां द्वितीयायां षडब्दं। तृतीयायां नवाब्दं॥ चतुर्थ्यां द्वाद
शाब्दं॥ अनन्यपूर्वायामित्युक्तेरेकस्यामेव चतुरभ्यासेन द्वंद्वप्रायश्चित्तं किंतु पादपादन्यूनं कल्प्यमिति शूलपाणिविज्ञानेश्व
रौ॥ व्यभिचारितक्षत्रियावैश्यागमने स एव। क्षत्रियां वाथ वैश्यां वा गच्छेद्यः काममोहितः। तस्य सांतपनं कृच्छ्रं भवेत्तत्पाप
मोचकं॥ तत्सवर्णानुलोमविषयं। यत्तु स एव। विप्रामस्वजनां गत्वा प्राजापत्यं समाचरेदिति तद्व्यभिचारितब्राह्मणीविष
ये ब्राह्मणस्य। यत्तु वसिष्ठः। ब्राह्मणश्चेदप्रेक्षापूर्वकं ब्राह्मणदारानभिगच्छेन्निवृत्तिधर्मकर्मणः कृच्छ्रो निवृत्तकर्मणोऽति
कृच्छ्र इति। अप्रेक्षा अज्ञानं॥ निवृत्तधर्मकर्मस्मो दाराणि सन्त्वषः। ब्राह्मणस्य स्वैरिण्यां प्रायश्चित्तमाह यमः। ब्राह्मणो
ब्राह्मणीं गत्वा द्विजे दद्यात्कृष्णाजिनं॥ क्षत्रियायां धनुर्दद्याद्वैश्यायामायसीं शिलं॥ शूद्रां गत्वा तथा विप्रः उदकुंभं द्विज
तये॥ त्रिरात्रोपोषितः स्नात्वा दद्यात्संमार्जनीं तथेति। अत्र त्रिरात्रोपोषितः स्नात्वेति प्रत्येकसंबध्यते॥ एतच्च संबंधकी

Indira Gandhi National
Centre for the Arts

विषयमित्यन्ये॥ स्वैरिण्यां प्रायश्चित्तांतरमाह तुः। शंखलिखितौ। स्वैरिण्यां वृषल्यामवकीर्णः सचैलस्नात उदकुंभं ब्राह्म
णाय दद्याद्वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयेत्॥ क्षत्रियायां त्रिरात्रोपोषितो यवाढकं दद्यात् ब्राह्मणायाहमु
पोषितो घृतपात्रं दद्यादिति कल्पतरुकारस्तु प्रकीर्णास्वेवमस्वतंत्रास्विति वाक्यशेषं पपाठ। प्रकीर्णा केनचिद्वह
द्धा॥ अस्वतंत्रा त्वबद्धा॥ तदेवं द्विविधस्वैरिणीगमनेप्येतदेव प्रायश्चित्तमित्यर्थः। शूलपाणिस्तु स्वैरिण्यां वृष
ल्यामवकीर्ण इति पठित्वा प्रसूत इत्यनेन स्वैरिण्यामपत्योत्पादनेप्येतदेव प्रायश्चित्तमित्याह॥ तन्न॥ तादृशपाठस्य
कल्पतरुप्रभृतिदृष्टत्वाद्गर्भोत्पादने द्विगुणप्रायश्चित्तस्य वक्ष्यमाणत्वाच्च॥ बंधकीगमने तु षड्विंशन्मते॥ ब्राह्मणो
बंधकीं गत्वा किंचिद्दद्याद्द्विजातये॥ राजन्यां च धनुर्दद्याद्वैश्यां गत्वा तु चैलकं। शूद्रां गत्वा तु वै विप्र उदकुंभं द्विजातये॥
दिवसोपोषितो वा स्याद्दद्याद्विप्राय भोजनमिति॥ किंचिदष्टमुष्ट्यात्मकं धान्यं। अष्टमुष्टि भवेत्किंचिदिति स्मृतेः। प्रा
यश्चित्तांतरमाह प्रचेताः। बंधकीगमने उपस्पृश्य प्राणायामं कुर्यात्। ब्राह्मणो बंधकीं गत्वा कमंडलुं दद्यात् त्रिपर्वं एम॰
धकीमायुधं वैश्यबंधकीमतो दमिति। अत्र त्रिषु वर्णेषु योषादानात्प्रथमं शूद्रबंधकीपरं॥ स्वैरिणीबंधक्योल 

क्षणमुक्तं स्मृत्यंतरे। चतुर्थे स्वैरिणी प्रोक्ता पंचमे बंधकी मतेति। महाभारतेपि। अतः परं स्वैरिणी स्यात्पंचमे बंधकी तथेति
यत्तु मनुः। शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिं। जनयित्वा सुतं तस्यां ब्राह्मण्यादेव हीयत इति। तत्पापगौरवं। एता
नि च प्रायश्चित्तानि गर्भानुत्पत्तिविषयाणि। तदुत्पत्तौ तु यद्विशेषप्रायश्चित्तमुक्तं तदेव तत्र द्विगुणं कर्तव्यं। तथा चोश
ना॥ गमने तु व्रतं यस्या गर्भे तु द्विगुणं चरेदिति। आपस्तंबः। चांडालमेदश्वपचकपालव्रतचारिणां॥ अकामतस्त्रियं गत्वा
पराकव्रतमाचरेत्। कामतस्तु प्रसूतो वा तत्समो नात्र संशयः। स एव पुरुषस्तस्यां गर्भो भूत्वाभिजायत इति। कामतः प्रसू
तो वेति। यथा कामतो द्विगुणमुक्तं तथा गर्भेपीत्यर्थः। चतुर्विंशतिमते तु। जातिभेदेन गर्भप्रायश्चित्तविशेष उक्तः। ब्रा
ह्मणीगमने कृच्छ्रं गर्भे सांतपनं स्मृतं॥ राज्ञीगर्भे पराकः स्याद्विड्गर्भे ह्यहाधिकं। शूद्रगर्भे द्विजः कुर्यात्तु चांद्रायणं स्मृतं॥
गर्भमारोप्य गुरुतल्पव्रतं चरेदिति। तत्रैव। वृषल्यामभिजातस्तु त्रीणि वर्षाणि चतुर्थकालसमये नक्तं भुंजीतेति।
एतच्चाकामतोभ्यासेन गर्भोत्पत्तौ। अभिजातः उत्पादितगर्भः। यत्तु हारीतः। ब्राह्मणो वृषलीं गत्वाऽहं भव
ति सूतकी। अथ सा गर्भमाधत्ते ब्राह्मण्यादेव हीयत इति। तथा। ब्राह्मणो वृषलीं गत्वा सद्यो गच्छेदधोगतिं। अथा

Indira Gandhi National Centre for the Arts

स्यां गर्भमाधत्ते पतत्याशु न संशयः इति। तद्वेतानि पापगौरवव्याख्यानपराणि। कएवं प्रसूतो यस्तु वैरूप्यायां भैक्षभुक्तिपतेंद्रिय
॥ शतं सहस्रमभ्यस्य गायत्रीमेद्धृतामिति। अत्र कैवर्त्तीरजकी चैव वरूपाँ वा पिगतो नरः। प्राजापत्यविधानेन कृच्छ्रेणोकेन
शुध्यतीति। शातातपवाक्ये वैरूप्यासमभिव्याहृतकैवर्त्यादिषु गर्भोत्पादेपीदमेव प्रायश्चित्तमिति। प्रातिलोम्यव्यवाये
तु रौरवः। प्रातिलोम्ये वधः पुंसो नार्याः कर्णादिकर्त्तनमिति। वधः प्रायश्चित्तं दंडश्च॥ नार्याः कर्णादिकर्त्तनं तु यथोक्तप्रा
यश्चित्तमनिच्छंत्याः वधे प्रकारविशेषमाह वसिष्ठः। शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्वीरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येद्ब्राह्मण्याः
शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते॥ वैश्यश्चेद्ब्रा
ह्मणीमभियच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां गौरखर
मारोप्य महापथमनुसंव्राज पूता भवतीति विज्ञायते। राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा क्षत्रियमग्नौ प्रा
स्येद्ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाभ्यज्य नग्नां खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति विज्ञायते। ए एम॰
वं वैश्यो राजन्यायां शूद्रश्च राजन्यवैश्ययोरिति॥ महापथव्रजनं दंडः। खरमारोप्य महापथमनुसंव्राजयेत् पूता भवतीति ६८

ख

विज्ञायते। एवं वैश्यो राजन्यायां शूद्रश्च राजन्यवैश्ययोरिति॥ महापथव्रजनं दंडः॥ प्रायश्चित्तं च॥ पूतत्वोक्तेरिति मि
ताक्षरायां॥ अपरार्के तु पूता प्रायश्चित्तयोग्येति व्याख्यातं॥ एतच्चकामतो कामतस्तु शूद्रस्य मरणं वैकल्पिकं चतुर्विं
शत्यब्दार्धं द्वादशाब्दं॥ शूद्रस्यैव क्षत्रिया वैश्ययोर्नववार्षिकं षड्वार्षिके॥ यथा हि द्रुपचेताः शूद्रस्य ब्राह्मणीमो
हं कृच्छ्रतः शुद्धिमिच्छतः। पूर्णमेतद्व्रतं देयं मातापरमात्द्वितस्य सा॥ पादहान्यां त्ववर्णासु गच्छतः सार्ववर्णिकं॥ प्रायश्चि
त्तमिदं देयं अगम्यागमने क्रमात्। एतद्दिशा वैश्यस्याज्ञानतो विप्रागमने नवाब्दं॥ क्षत्रियस्य तु षडब्दं। एवमेव शूलपा
णिरपि। यत्तु माधवीये संवर्त्तः॥ कथंचिद्ब्राह्मणीं गच्छेत् क्षत्रियो वैश्य एव वा॥ गोमूत्रयावकाहारो मासेनैकेन शुध्यतीति
तद्रत्यंतव्यभिचरिताया कामतो गमने ज्ञेयं॥ मिताक्षरायां तु जरद्गत्वा घृतश्लोकार्द्धमेव। कृच्छ्रं सांतपनं वा स्यात्प्रायश्चि
त्तं विशुद्धय इति। रजस्वलागमने प्रायश्चित्तमाह योगी। त्रिरात्रांते घृतं प्राश्य गत्वोदक्यां विशुध्यति। त्रिरात्रोपवासांतद
त्यर्थः। इदमकामतः सकृद्गमने शातातपः। रजस्वलागमने सप्तरात्रमिति॥ यत्तु वसिष्ठः। रजस्वलाव्यवाये शुक्लमृ
षभं दद्यात् कृष्णपिंगलमिति यद्व्यापस्तंबः। उदक्यां परिगच्छेत्तु ब्राह्मणो मदमोहितः। प्राजापत्येन शुध्येत्तु ब्राह्मण

Indira Gandhi National
Centre for the Arts

प्रा·मा· नांचभोजनादिति। तदकामतोभ्यासेकामतः सकृद्गमनेच॥ कामतोत्यंतानवच्छिन्नाभ्यासेतुशंखः। पादंतुशूद्रहत्यायामु
६९ दक्यागमनेतथेति। कामतोभ्यासमात्रेतुसंवर्त्तः। रजस्वलांतुयोगच्छेद्गर्भिणींपतितांतथा। तस्यपापस्यशुध्यर्थमति
कृच्छ्रंविशोधनमिति। दिनभेदात्प्रायश्चित्तविशेषश्चचतुर्विंशतिमते। रजस्वलांतुयोगच्छेत्सएकंतुसमाचरेत्। सां
तपनंद्वितीयेह्नि प्राजापत्यंपरेहनीति। सांतपनोमहासांतपनइतिमदनपारिजाते॥ यत्तुमाधवीये। शातातपः अनु
दकमूत्रपुरीषकरणेश्वपाकस्पर्शेसचैलस्नानंमहाव्याहृतिहोमश्चरजस्वलागमनेचैतदेवेतितदकामतप्रवृत्तस्यरे
तःसेकादर्वाङ्निवृत्तौवोध्यं। कामतस्त्वेतदेवद्विगुणं॥ यत्तुविष्णुना॥ रवस्कःसखाःसगोत्रायाःउत्तमवर्णायारजस्वला
पाःशरणागतायाः प्रव्रजितायानिक्षिप्तायागमनमित्येतान्यनुपातकानीत्यनेनरजस्वलागमनेअनुपातकप्रायश्चि
त्तमुक्तंतच्छोत्रियपत्न्यामेवपरपत्नीत्वेनानवच्छिन्नाभ्यासविषयं॥ एतानिचरजस्वलांतर्वपत्न्यादिगमनप्रायश्चित्ता
निस्वपत्न्यामेव। परपत्नीत्वेतुतादृशंपारदार्यप्रायश्चित्तैर्विजातीयैःसमुच्चीयंते॥ सजातीयेतुअधिकेनन्यूनस्यप्र एम·
संगसिद्धिः। साम्येतुतंत्रमिति॥ एवंविधावादिगमनेपियोज्यं॥ तत्रप्रायश्चित्तंचतुर्विंशतिमते॥ विधवागमनेकृ ६९

६१२

छ्रमहोरात्रसमन्वितं॥ व्रतस्थागमनेकृच्छ्रंसपादंतुसमाचरेत्॥ अथांत्यजागमनप्रायश्चित्तं॥ आपस्तंबः। रजकश्चर्म
कारश्चनटोबुरुडएवच॥ कैवर्त्तमेदभिल्लाश्चसप्तैतेत्वंत्यजाःस्मृताः॥ बृहत्संवर्त्तः। रजकव्याधशैलूषवेणुचर्मो
पजीविनीः॥ एतास्तुब्राह्मणोगत्वाचरेच्चांद्रायणद्वयमिति। आपस्तंबः। म्लेछीनटीचर्मकारीरजकीबुरुडीतथा॥ ए
तासुगमनेकृत्वाचरेच्चांद्रायणद्वयमिति॥ इदंचविप्रस्यकामतःसकृद्गमने॥ क्षत्रियादेस्तुपादपादहीनंकल्प्यं॥
संवर्त्तः। रजकव्याधशैलूषवेणुचर्मोपजीविनां। स्त्रियोविप्रोयदागच्छेत्कृच्छ्रंचांद्रायणंचरेदिति। तदकामतः। अ
तएवाहापस्तंबः। चंडालमेदश्वपचकपालव्रतधारिणां। अकामतस्त्रियोगत्वापराकव्रतमाचरेदिति॥ यत्तूशना॥
पालिकान्नभोक्तृणांतन्नारीगामिनांतथा॥ ज्ञानात्कृच्छ्राब्दमुद्दिष्टंअज्ञानादैंदवद्वयं॥ तत्कामतोभ्यासे॥ यत्तुशा
तातपः। कैवर्त्तीरजकीचैववेणुचर्मोपजीविनां॥ प्राजापत्यविधानेनकृच्छ्रेणैकेनशुध्यतीति। तच्छूद्रपरं॥ अस्मि
न्नेवविषयेद्विस्त्रिगमनाभ्यासेहारीतः। कैवर्त्तीध्वजिनीचैवयाश्चान्याअंत्यसंभवाः। कामेनस्तुवसन्विप्रएता
स्वेवंसमाचरेत्। द्वौमासौभैक्ष्यभक्षेणद्वौमासौपयसावकैः॥ द्वौमासौपंचगव्येनषण्मासाश्चरितव्रतः॥ एवं

प्रा·मा· शुद्धिमवाप्नोतिप्रायश्चित्तानुरोधतइति।येत्वयावसायिनश्चांडालादयस्तेषांत्रिगमनेगुरुप्रायश्चित्तमुक्तंगुरुतल्पातिदे
७० शः।एतासांचरजकाद्यंत्यजस्त्रीणांमध्येपरेकस्याव्यवायेप्रायश्चित्तमुक्तं।ततस्तदृशत्वात्सर्वास्तभवति।तथाचोशना॥
बहूनामेकधर्माणामेकस्यापिप्यदुच्यतेसर्वेषांतद्भवेत्कार्यमेकरूपाहितेस्मृताइति।एतास्तुगर्भोत्पत्तौतुविशेषउक्त
उशनसा॥चांडालींगर्भमापन्नोगुरुतल्पव्रतंचरेत्इति।एतच्चव्रतातिदेशात्रबाष्टंतच्चाकामतःकामतःपुनरपत्यंवः
।अंत्यजायांप्रसूतस्यनिष्कृतिर्नविधीयते॥निर्वासनंकृतांकस्यतस्यकार्यमसंशयमिति।अथस्त्रीणांव्यभिचारे
प्रायश्चित्तं॥मनुः।यत्पुंसःपरदारेषुतच्चैनांचारयेद्व्रतमिति।एतच्चवाचनिकातिदेशात्पादोनमितिकेचित्॥पूर्ण
मेवयुक्तं॥तथाचबृहस्पतिः।यत्पुंसःपरदारेषुसमानेषुविधीयते॥व्यभिचारेपिभर्तुस्त्रीतदशेषंसमापये
दिति।समानेष्वित्यनुलोमानामित्युपलक्षणं॥तच्चप्रातिलोम्यव्यवायव्यावृत्त्यर्थंतत्रगुरुप्रायश्चित्तोक्तेः।भ
र्तुःस्वसः।अव्यवस्थितकल्पनात्वन्यायैवेति।ततश्चसवर्णानुलोमव्यवायेस्त्रीपुंसयोरौत्सर्गिकंतुल्यंप्रायश्चि एम·
त्तं॥तस्यक्वचिदपवादस्तथाचसंवर्तः।बलात्संभवभुक्ताचेदृत्यमानेनचेतसा।प्राजापत्येनशुद्धिःस्यात्तस्याः ७०

पावनंपरमिति।पराशरोपि।सकृद्भुक्ताचयानारीनेच्छंतीपापकर्मभिः।प्राजापत्येनशुध्येतऋतुप्रस्रवणेनवेति।बृहस्पतिरपि।
अनिच्छंतीतियाभुक्तागुप्तांतांकारयेद्गृहे॥मलिनांगीमधःशय्यांपिंडमात्रोपजीविनीं।कारयेन्निष्कृतिंकृच्छ्रंपराकंवासमाग
ता।हीनवर्णोपभुक्तायात्याज्यावध्यापिवा॥भवेदिति।समं।समानजातीयं।अत्रसकृदुपगमेकृच्छ्रः।द्विरभ्यासेपराकः।अ
भ्यासेतुचांद्रायणंतदाहोशना॥व्यभिचारिणींभार्यांकुचेलपिंडगुप्तांनिवृत्ताधिकारांचांद्रायणंपराकंप्राजापत्यंवाकार
येदिति।मनुः।साचेत्पुनःप्रदुष्येत्तुसदृशेनोपयंत्रिता॥कृच्छ्रं।चांद्रायणंचैवतदास्याःपापशोधनमिति।इदंचाकामतः।
कामतस्तद्द्विगुणं।यत्तुऋष्यशृंगः।बलेनकामितानारीसवर्णेनकथंचन॥प्रायश्चित्तंत्रिरात्रंवैतस्याःशुध्यर्थमादिशे
दिति॥तद्रेतःसेकात्प्राग्निवृत्तौद्रष्टव्यं॥पराशरोपि।बंदिग्राहेणयाभुक्ताहत्वाबध्वाबलाद्भयात्॥कृत्वासांतपनंकृच्छ्रं
शुध्येत्पाराशरोब्रवीत्।इच्छयाप्रवृत्तौतस्याःपुंतुल्यमेवप्रायश्चित्तं॥तदाहतुःशंखलिखितौ।इच्छयाव्यभिचारिणींपर
दारेषुपुंसोविहितंतांचारयेदिति।अंगिराः।व्रतंयच्चोदितंपुंसांपतितस्त्रीनिषेवणात्।तच्चापिकारयेन्मूढांपतितासेवना
त्स्त्रियमिति।आसेवनादितिपदच्छेदः।तच्चकामतः।अकामतस्त्वाहसंवर्तः॥ब्राह्मण्यकामाद्गच्छेच्चेत्क्षत्रियंवैश्यमे

Indira Gandhi National Centre for the Arts

प्रा॰मा॰ ७१

ववा। गोमूत्रयावकैर्मासानर्धं च विशुध्यति। ब्राह्मण्याः शूद्रसंपर्के कथंचित्समुपागते॥ चांद्रायणेन शुद्धिः स्यात्तत्रस्याः
पावनं स्मृतमिति। शूलेपाणिस्त्वनत्छंती विषयमेतदितिमासादिति वैश्येक्षत्रियेत्वर्द्धमिति। षड्त्रिंशन्मतेपि॥ ब्राह्मणी क्षत्रि
यवैश्यसेवायामतिकृच्छ्रं कृच्छ्रातिकृच्छ्रौ चरेत्। क्षत्रियपोषितो ब्राह्मणएजन्य वैश्यसेवायां कृच्छ्रार्द्धं प्राजापत्यमतिकृच्छ्रं
च॥ वैश्यपोषितो ब्राह्मणएजन्य वैश्यसेवायां कृच्छ्रपादं कृच्छ्रार्द्धं प्राजापत्यं च। शूद्रायाः शूद्रसेवने प्राजापत्यं॥ ब्राह्मण
एजन्यसेवायां त्वहोरात्रं कृच्छ्रार्द्धमिति। बृहन्मचेताः। विप्रा शूद्रेण संयुक्ता न चेत्तस्यात्प्रसूयते। प्रायश्चित्तस्मृतं तस्या
कृच्छ्रं चांद्रायणं त्रयं॥ चांद्रायणो द्वे कृच्छ्रश्च विप्राया वैश्यसंगमे॥ कृच्छ्रं चांद्रायणेस्यानातस्याः क्षत्रियसंगमे॥ क्षत्रिया शू
द्रसंपर्के कृच्छ्रं चांद्रायणी द्वयं। चांद्रायणं सकृच्छ्रं तु चरेद्वैश्येन संगता॥ शूद्रं गत्वा चरेद्वैश्या कृच्छ्रं चांद्रायणोत्तरं॥ आनुलो
म्येन कुर्वीत कृच्छ्रं पादावरोपितमिति। न चेत्तस्मात्प्रसूयेत इति सर्वत्र संबध्यते॥ ब्राह्मणक्षत्रियविट्स्त्रीभार्याः शूद्रेण सं
गताः। अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति वसिष्ठोक्तेः। पादावरोपितं पादह्रासः॥ शूद्रायाः शूद्रगमनेप त्वाप एम॰ ७१
श्चित्तं तत्रविट्क्षत्रयाविप्रगमने पादार्द्धत्रिपादानं भवति। एवं वैश्यायां यद्वैश्यगमन उक्तं तत्रविट्क्षत्रियविप्रगमने पादो

नमर्द्धं च भवति। क्षत्रियायास्तु क्षत्रियगमने तद्विप्रगमने पादोनमित्यर्थः। गर्भेस्मिन्नौ तु चतुर्विंशान्मते विप्रगर्भे पराकः स्यात्क्षत्रिय
स्य तथैंदवं॥ ऐंदवं च पराकं च वैश्यस्याकामकारतः। शूद्रगर्भे भवेत्साग चांडालो जायते यतः॥ गर्भस्रावे धातुदोषे श्चरेच्चांद्राय
णत्रयं॥ एतच्चाकामकारत इति। विज्ञानेश्वरस्तु कामतः कामतः पुनः पराकादि द्विगुणं कुर्यात्। गर्भस्राव इति शूद्रगर्भस्रावे॥
यदा तु संपूर्णशूद्रगर्भस्य प्रसवस्तदा प्रायश्चित्ताभाव एव॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरा इति वसिष्ठोक्तेः। यदा
त्वाहितगर्भैव व्यभिचरति तदा गर्भपातशंकया प्रसवोत्तरकालमेव प्रायश्चित्तं कार्यं॥ तदुक्तं मिताक्षरायां स्मृत्यंतरे॥ अं
तर्वत्नी तु या नारी समेतो क्रम्य कामिता। प्रायश्चित्तं न कुर्यात्सा यावद्गर्भो न निःसृतः॥ जाते गर्भे व्रतं कुर्यात्स्वान्मासं तु
पावकं॥ न गर्भदोषस्तत्रास्ति संस्कार्यः स यथाविधिरिति। अंत्यजगमने पिस्त्रीणां प्रायश्चित्तमुक्तं। स्मृत्यंतरे॥ चंडालं पुल्कसं म्लेच्छं
श्वपाकं पतितं तथा। ब्राह्मण्यकामतो गत्वा चांद्रायणचतुष्टयं॥ तथा। रजकव्याधशैलूषवेणचर्मोपजीविनाः। ब्राह्मण्ये नान्य
दागब्येद्कामाद्दैंदवद्वयमिति। पराशरः॥ चंडालेन तु संपर्कं पदि गच्छेत्कथंचन॥ सशिखं वपनं कुर्यात् भुंजा पाद्यावकोदनं॥ त्रिरा
त्रमुपवासः स्यादेकरात्रं जले वसेत्। आस्तनात्संमिते कूपे गोमयोदककर्दमे तत्र स्थित्वा निराहारा एकरात्रं ततः क्षिपेत्। शंख

प्रा॰प्रा॰ ७२

पुष्पोलतामूलंपत्रंवाकुसुमफलंक्षारंसुवर्णसंमिश्रंक्वाथयित्वाततःपिबेत्॥एकंभक्तंचरेत्पश्चाद्यावत्पुष्पवतीभवेत् बहिस्ता
वच्चनिवसेयावच्चरतितद्भुतं॥प्रायश्चित्तेततश्चीर्णेकुर्याद्ब्राह्मणभोजनं॥गोद्वयंदक्षिणांदद्यात्शूद्रोस्वापंभुवोब्रवीदिति।एतच्चा
ज्ञानविषयंकामतःसकृद्गमनेतुअत्र्यष्यप्रसंगः।संपृक्तास्याद्यथांत्यैर्पात्कृच्छ्राब्दंसमाचरेदिति।कामतोत्यंतसंपर्केतूत्रानाः।
अत्यजेनतुसंपर्केभोजनेमैथुनेकृते॥प्रविश्येत्संप्रदीप्तेग्नौमृत्युनासाविशुध्यतीति॥यत्तुशातातपः।म्लेच्छेनाभिगताम्
द्याअकामावाकथंचनं॥कृच्छ्रत्रयंप्रकुर्वीतज्ञानेतुद्विगुणंभवेदिति।अत्रचम्लेच्छग्रहणमेकवाक्योपात्तानांचंडालानांम
प्युपलक्षणं॥बहूनामेकधर्माणामेकस्यशिष्टोवाक्यात्।यद्यपिसंवर्त्तः।चाण्डालंपुल्कसंम्लेच्छंश्वपाकंवतितंतथा॥एतागत्वा
स्त्रियःश्रेष्ठाःकुर्युश्चांद्रायणमितितत्कामतोप्रवृत्तस्यरेतःसेकात्प्राक्॰निवृत्तौद्रष्टव्यं॥आहितगर्भायाश्चांडालादिव्य
वायेतुअत्यष्यप्रसंगः॥अंतर्वत्नीतुयुवतिःसंपृक्ताचांत्ययोनिना॥प्रायश्चित्तेनसाकुर्याद्यावद्गर्भोननीनेरततिःनप्रचारंगृ
हेकुर्यीत्रचांगेषुप्रसाधनं॥नशयीतसमंभर्त्रानवावाभुंजीतबांधवैःप्रायश्चित्तंगतेगर्भेविधिंकृत्वाछिकंचरेत्॥हि
रण्यमथवाधेनुंदद्याद्विप्रायदक्षिणामितिमानसिकवाचिकव्यभिचारयोःप्रायश्चित्तमाहवशिष्ठःमनसाभर्तुरभिचारेत्रि

प्रा॰ ७२

रात्रंयावकंक्षीरौदनंवाभुंजानाअधःशयीतऊर्ध्वंत्रिरात्राद्प्सुनिमग्नायाःसावित्र्याचतुर्भिरष्टशतैःशिरोभिर्जुहुयात्पूता
भवंतीतिविज्ञात॥वाकायंधेएतदेवमासंचरित्वाऊर्ध्वंमासाद्प्सुनिमग्नायाःसावित्र्यातुर्भिरष्टशतैःशिरोभिर्जुहुयादितिअ
ष्टाधिकंशतमष्टशतंतैःश्चतुर्भिःशिरोभिःसिरसीत्यर्थः।इदंचमानसिकव्यभिचारेप्रायश्चित्तंरजोदर्शनाद्वर्वाकूव्यवहार्य
त्वसिद्धये॥रजोदर्शनेतुसातितेनैवशुद्धिःतथाचमनुःमद्योपैःशोध्यतेशोध्यंनवेगेनशुभ्यतिरजसास्त्रीमनोदुष्टासन्या
सेनद्विजोत्तमइतिअंत्यजादिव्यवायेतुपराशरः।हीनवर्णोपभुक्तायासात्याज्यावध्याद्वाभवेदिति॥अंकनपक्षेसागएवच
नसत्त्वपरित्यागस्तुशिष्यगागुरुगाचयापतिघ्नीचविशेषेणजुंगितोपगताचयेतिवसिष्ठोक्तेःजुंगितःप्रतिलोमतः।
अत्रचविशेषविधानात्।परित्यागोगृहान्निर्वासनमेव॥अल्पत्रतुविप्रदुष्टांस्त्रियंभर्तानिरुध्यादेकवेश्मनीतिम
नूक्तोनिरोधःपाज्ञवल्क्योपिहृताधिकारांमलिनांपिंडमात्रोपजीविनीपरिभूतामधःशय्यांवासयेद्व्यभिचारिणी
मिति।अत्रचवासनंदेवण्यपज्ञमार्थमेवायत्तुचतुर्विंशन्मते॥स्त्रीणांनास्तिपरित्यागोब्रह्महत्यादितिविर्वितातत्रापिगृह
मध्येतुप्रायश्चित्तानिकारयेत्।परित्यक्ताचरेत्पापंबद्धत्सवापिकिंचन।तत्पापंशतधाभूत्वाबांधवाननुगच्छतीति॥

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ७३ तत्गर्भानुत्पत्तिपरं॥ तद्युक्तापात्कपरित्यागमाह पराशरः। जारेण जनयेद्गर्भं मृते त्यक्ते गते पतौ। तां त्यजेद्परे राष्ट्रे पतितां पाप
कारिणीमिति। अपरेणाप्युक्तं इत्युक्ते गृहान्निष्कासनं गम्यते। अत एव चतुर्विंशतिमते च तस्र एव संत्याज्याः यत्तने सत्य
पि स्त्रियः श्वपाकोपहता पातुभर्तृघ्नी पतिपुत्रगेति अत्र च शिष्यगादीनां त्यागो गर्भविषय एव व्यभिचारे तु तो शुद्धिर्गर्भ
त्यागो विधीयते गर्भभर्तृवधादौ च तथा महति पातके इति याज्ञवल्क्योक्तेः। गर्भः शूद्रादिकृतः ब्राह्मणक्षत्रियविशां गर्भाः
शूद्रेण संगताः॥ अप्रजाता विशुध्यंति प्रायश्चित्तेन नेतरे इति वसिष्ठस्मरणात्। शूद्रग्रहणं प्रतिलोमजोपलक्षणार्थं
तत्तु त्रैवर्णिकया इत्यर्थं। तेन शिष्यगुरुगयोरपि त्रैवर्णिकयोः प्रसवेन त्यागः अयं च त्यागो न गर्भमात्रे किंतु प्रसवमा
त्र इति प्राकृव्याख्यानं अयमेवाभिप्रायो माधवाचार्याणां मिताक्षरायां तु व्यवहारनिरोध एव॥ त्यागशब्देनोक्तो न तु
गृहान्निर्वासनमपीति॥ इति स्त्रीप्रायश्चित्तं॥ ॥अथ पशुगमने शंखलिखितौ॥ तिर्यक्योनिषु गोवर्जं सचेलस्ना
तोपवसभारं दद्यात्॥ पराशरः। महिष्युष्ट्रीखरीगामी त्वहोरात्रेण शुध्यतीति इदमकामतः। कामतस्तु जाबालः राम॰
इतरेषां पशूनां तु कृच्छ्रपादो विशोधनमिति कामतोभ्यासे संवर्त्तः॥ पशुवेश्याभिगमने प्राजापत्यं विधीयते। शुना ७३

गमने विशेषश्चतुर्विंशतिमते शुनीं चैव द्विजो गत्वा अतिकृच्छ्रं समाचरेत् इति यत्तु गोतमः। अमानुषीषु गोवर्जं स्त्रीषु गम
ने कूष्मांडैर्घृतहोम इति तत्कामाकामसकृदसकृदभ्यासेषु विंशत्यष्टोत्तरसहस्रादिसंख्या पायोज्यं॥ अथ गोगमने॥ प
राशरः। गोगमने च। कामतोभ्यासे तु शंखलिखितौ गोष्ववकीर्णः संवत्सरं प्राजापत्यं चरेदिति यत्तु गोतमः। गवि गुरुत
ल्पसम इति। तत्ज्ञानादाजन्माभ्यासे॥ ॥अथ व्रतलोपे॥ योगीश्वरः। अवकीर्णी तु वै कृत्वा ब्रह्मचारी तु योषितं गर्दभं प
शुमालभ्य नैर्ऋतं स विशुध्यति। मनुः। अवकीर्णी तु कालेन गर्दभेन चतुष्पथे पाकयज्ञविधानेन यजेत निर्ऋतिं निशि
कृत्वाग्नौ विधिवद्धोमान्ततश्च अथ पशुकल्प इत्याश्वलायनाद्युक्तं। अत्राकृतीरिति बहुवचनात्त्वापिंजलन्यायेनाकृतिच
पमेव हवेयी वसिष्ठोपि ब्रह्मचारी चेत्स्त्रियमुपेयादवकीर्णी गुरुवक्रीनीजुकृपात्सर्पिषाकृतीः एतस्मिन्नेनसि प्राप्ते वसित्वा गर्दभा
जिनं सप्तागारं चरेद्भैक्षं स्वकर्म परिकीर्त्तयन् तेभ्यो लब्धेन भैक्ष्येण वर्त्तयन्नेककालिकं। उपस्पृशंस्त्रिषवणं शब्देन स वि
शुध्यति पाकयज्ञविधानं॥ पारस्करेपि चतुष्पथे लौकिकेग्नौ रक्षोदेवतं गर्दभपशुमालभेत तनैर्ऋतं वा चरुं निर्वपेत् तत्र त
स्मजुकुयात्। कामाय स्वाहा कामकामाय स्वाहा रक्षोदेवताभ्यः स्वाहेति अत्र गर्दभयागात्पूर्वं वायवे स्वाहेत्यादि चतुर्भिरा

Indira Gandhi National
Centre for the Arts

प्रा॰मा॰ ७४ उपहोमः गर्दभयागोत्तरं तु सं मा सिंचंत्वित्यृचा होमः इत्यपरार्के अत्र पशोरसंभवे चरुरिति विज्ञानेश्वरः। श्रोत्रियस्य पशुरश्रोत्रि
यस्य चरुरिति माधवः अयं चामावास्यायां कार्यः। तथा च तैत्तिरीयश्रुतिः। यो ब्रह्मचार्यवकिरेदमावास्यायां एन्यामग्निं प्र
णीयोपसमाधाय ते त्यादि एतच्च कामतएवाकामतो रेतःसेकमिति निमित्तवाक्ये मनूक्तेः। अत्र शक्तस्य तयाप्रोत्साहितस्य वा
योगीश्वरोक्तो गर्दभयाग एव शक्तस्य तु मनूक्तयागाद्युक्तपसोः समुच्चयः। स्मृत्यंतरे। गर्भव्रतसमुच्चयमेवाह। गौतमः।
गर्दभेनावकीर्णनिर्ऋतिं चतुष्पथे यजेत्॥ तस्याजिनमूर्ध्ववालं परिधाय लोहितपात्रः सप्तगृहान्भैक्षं चरेत्कर्माचक्षा
णः। संवत्सरेण शुध्येदिति॥ इदं च वार्षिकं व्रतमश्रोत्रियविप्रपत्न्यां श्रोत्रियवैश्यपत्न्यां च यत्तु शंखलिखितौ गुप्ता
यां वैश्यायामवकीर्णः। संवत्सरं त्रिषवणमनुतिष्ठेत्। क्षत्रियायां द्वे वर्षे ब्राह्मण्यां त्रीणि वर्षाणीति तद्ब्राह्मणी क्षत्रिय
योः श्रोत्रियभार्ययोरवाकीरणे ज्ञेयं॥ यत्तु पैठीनसिः। अवकीर्णी गर्दभाजिनं वसेत्संवत्सरं प्राजापत्यं चरेदिति त
त्रात्यशूद्रभार्याविषयं स्वैरिण्यादिष्ववकिरणे त्वाह तुः शंखलिखितौ स्वैरिण्यां वृषल्यामवकीर्णः सचेलस्ना एम॰
तउदकुंभं दद्याद्ब्राह्मणाय वैश्यायां चतुर्थकालाहारो ब्राह्मणान्भोजयेत्। यवसंभारं च गोभ्यो दद्यात्। क्षत्रियायांत्रि ७५

एत्रमुपोषितो घृतपात्रं दद्यात्॥ ब्राह्मण्यां षड्रात्रमुपोषितो गां दद्यात्॥ गोष्ववकीर्णः प्राजापत्यं चरेत्॥ षंडायामवकीर्णः पला
लभारं सीषमाषकं वदद्यादिति कल्पतरौ हारीतः। तस्मात्स्त्रीष्ववकीर्णी निर्ऋत्या एव चतुष्पथे गर्दभं पशुमालभेत। भूमौ पशु
पुरोडाशमप्सु मवदानैः प्रचर्य प्राकृत्विष्टकृतमाज्यस्य जुहोति कामावकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा का
मावपन्नोस्म्यवपन्नोस्मि कामकामाय स्वाहा कामाभिदुग्धोस्म्यभिदुग्धोस्मि कामकामाय स्वाहा कामाभिदुग्धोस्म्यभिदुग्धो
स्मि कामकामाय स्वाहा सं मा सिंचंतु मरुतः समिंद्रः संबृहस्पतिः सम। यमग्निः सिंचतु यशसा ब्रह्मवर्चसेनेति तांछवीर्ध्ववा
लां परिधाय मृन्मयं पात्रमादाय सप्तागारं भैक्षं चरेत्स्वकर्म परिकीर्तयन्त्रयोदशे मासे पूतो भवतीति छवी चर्मविशेष
माह बौधायनः। यो ब्रह्मचारी स्त्रियमुपेयात्सोवकीर्णी गर्दभं पशुमालभेत नैर्ऋतः पशुपुरोडाशो रक्षोदेवतो यमदेवतो
वा शिश्नात्प्राशित्रमप्स्ववदानैश्चरंतीति विज्ञायते॥ अथावकीर्णमावास्यायामग्निमुपसमाधायाग्न्यकूपरिस्तीर्य
दार्विहोमिकीं परिचेष्टां कृत्वा द्वे आहुती जुहोति कामावकीर्णोस्म्यवकीर्णोस्मि कामकामाय स्वाहा कामाभिदुग्धोस्म्य
भिदुग्धोस्मि कामकामाय स्वाहा इति हुत्वातिर्यग्तिमभिमंत्रयेत सं मा सिंचंत्विति परिवेष्टेति कर्तव्यता सएव अथब्रह्मचर्य

Indira Gandhi National Centre for the Arts

व्रतमवकिरेन्मांसंवाश्नीयात्स्त्रियंवोपेयात्सर्वत्राग्निर्मिथ्यंतदगारेग्निमुपसमाधायसंपरिस्तीर्यप्रायश्चित्ताद्याहुतीर्जुहोतिका
प्रा॰प्रा॰ मेनकृतंकामःकरोत्कामायेवेदंसर्वान्नूयोगाकारयतितस्मैस्वाहामनसाकृतंमनुतएवेदंसर्वेयंकारयतितस्मैस्वाहाजया
७५ प्रभृतिसिद्ध्याधेनुवरप्रदानात्॥अपरेणाग्निंकृष्णाजिनेनप्राचीनग्रीवेणोत्तरलोम्नामादित्यवसतिस्तुष्टापाजघनार्द्धा
त्मानमपकृष्यतीरेगत्वास्नात्वाचम्यमिमंत्रब्दलिंगाभिर्वारुणीभिर्हिरण्यवर्णाभिःपावमानीभिरितिमार्जयित्वांतर्जलग
तोघमर्षणेनषोडशप्राणायामान्धारयित्वोत्तीर्यवासःपीडयित्वान्यद्धौतवासःपरिधायाचम्यप्रसिद्धमादित्योपस्थानंकृ
त्वाआचार्यस्यगृहानितिजपापदेनजपाहोमाः।प्रभृतिनात्रिभूतानामधिपतिरित्यादिसाध्याहोमाः।अनोजपाहोमाद्धे
नुवरप्रदानांतमत्रकुर्यादित्यर्थः॥अपरेणाग्निमग्निपश्चिमभागेवसतीत्यस्याग्नेराजावितिशेषः।मुष्ठायामितिउषः
कालेजघनात्कृष्णाजिनजघनप्रदेशादात्मानमपकृष्यनिःसार्येत्यर्थः।शंखलिखितौ॥सप्तरात्रेणवकीर्येभैक्ष्याग्नि
कार्येकुर्वन्नधःकामादुत्सर्गेरतसोत्यत्रसप्तात्तत्रप्रायश्चित्तंमहाव्याहृतिभिर्जुहुयात्॥ॐपूर्विकाभिःसंवत्सरंवा एम॰
भक्तंचरेच्चतुर्थकालेमितभुग्गायत्रीवासवत्सरंनुगांजपेदिति॥महाव्याहृतिहोमोत्रलघुत्वाद्भैक्ष्याग्निकार्याकरणे॥ ७५

संवत्सरंचेत्यादिनामितभुगित्यादिनामितभुगित्यादिनामितभुगित्यादिनाचप्रायश्चित्तद्वयमुक्तं।तत्पूर्वोक्तसंवत्सरव्रतस
मानविषयं॥वत्सरानुगांवत्सरपर्यंतमित्यर्थः।स्वप्नेरेतसउत्सर्गेमनुविष्णूस्वप्नेतिसिक्त्वाब्रह्मचारीद्विजः।शुक्रमकामतः
स्नात्वार्कमर्चयित्वात्रिःपुनर्मामित्यृचंजपेत्।दिवास्वप्नेउत्सर्गेबलादुत्सर्गेचनैकृतयागमात्रंएतद्वरेतसउत्सर्गेदिवास्व
प्नेवेतिवसिष्ठेनयागमात्रातिदेशात्॥कृच्छ्रचांद्रायणादिव्रतांतरेष्वतिदृष्टब्रह्मचर्येरेतस्कंदनेपीदमेवव्रतांतरेषुचे
वमितितेनैवातिदिष्टत्वात्॥इदमेवचरीतिस्तस्यापिवानप्रस्थयत्योरपिरेतःस्कंदनेआहशांडिल्यः।वानप्रस्थोयतिश्चै
वरवंडनेसतिकामतः।पराकत्रयसंयुक्तमवकीर्णिव्रतंचरेत्।इदंचब्रह्मचर्यातिदेशोवकीर्णिव्रतंगुरुत्वात्परस्त्री
गमनएव॥कश्यपः।सूर्यस्यत्रिर्नमस्कारंस्वप्नेसिक्त्वागृहीचरेत्।वानप्रस्थोपतिश्चैवत्रिकुर्यादघमर्षणं।स्त्रीसंभो
गमंतरेणकामादुत्सर्गेतुकरणवः।पत्रोत्संगेगृहीकृत्वावारुणीभिरुपस्पृशेत्॥वानप्रस्थोयतिश्चैवचरेच्चांद्रायणत्रयं॥
सप्तरात्रंसंध्यादित्यागेनाचकीर्णत्वेबृहस्पतिः।संध्योपासनमुद्दिष्टप्रथमेब्रह्मचारिणः॥अग्नीधनंभैक्ष्यचर्यांचैतत्कु
र्वीतप्रत्यहं॥अस्यत्रयस्याकरणाद्व्रतीरोगविवर्जितः।अवकीर्णिव्रतंकुर्यात्सप्तरात्रंनसंशयः॥याज्ञवल्क्योपि॥भैक्ष्याग्नि

Indira Gandhi National
Centre for the Arts

कार्यमक्त्यातुसम्रएत्रमनातुरः॥कामावकीर्णइत्याभ्यांहुत्वाचाज्याहुतिद्वयं॥उपस्थानंततकुर्यात्समासिंचत्वनेनतु॥कामाव
प्रा॰ मा॰ कीर्णइत्येतौपूर्वमुक्तौ॥समासिंचत्वितिच।इदंचकार्याभ्यासंगादिनाग्न्यादित्यागे॥तदभावेतुअकृत्वाभैक्षचरेणसमभि
७६ ध्यत्रपावकं॥अनातुरःसप्तरात्रमवकीर्णिव्रतंचरेदिमनूक्तज्ञेयं॥नैष्ठिकेविशेषमाह॥हारीतः।उपकुर्वाणकंपत्कुर्या
त्कामतोकामतोपिवा॥तदेवद्विगुणं॥कुर्याद्ब्रह्मचारीतुनैष्ठिकइति।एतानिचावकीर्णिप्रायश्चित्तानित्रैवर्णिकस्यापिब्रह्म
चारिणःसमानानि।अवकीर्णीद्विजोराजावैश्यश्चापिखरेणतु।इष्ट्वाभैक्षाशिनोनित्यंशुध्यत्यब्दात्समाहितइति।शांडि
ल्योक्तेः॥द्विजोविप्रःअत्रपदगम्यागमनप्रायश्चित्तमेतत्प्रायश्चित्तासमंन्यूनंवातदनेनैवसिध्यति।यत्वधिकंतेनैवतस्य
सिद्धिः।गर्दभयागस्तुपृथगेवकार्यइति।ब्रह्मचारिणोवेदव्रतान्याम्नातानितेषांलोपेप्रायश्चित्तमाहात्रिः।पितामातापरएवा
पिप्राजापत्यत्रयंचरेत्।महापगासुसंस्नाप्ययाहितोअग्रआहुतीः।पंचभिरिदमहांतव्रतलोपेहुनेत्सतीति।संवत्सरम
ध्यएवव्रतलोपएतत्प्रायश्चित्तमितिकेचित्।महानाम्न्यादिव्रतलोपेप्रायश्चित्तपूर्वकंतानिसमावर्त्तनएवकार्याणीतिप्रपो प्रा॰
गपारिजाते।व्यासोपि।वेदव्रतानिकृत्वैवतथैवारण्यकव्रतं।हितंसर्वंकृत्वावेदमुपक्रमेत॥अकृत्वेमानिसर्वाणिवेदो ७६

वाप्यस्नातेयदि॥प्रायश्चित्तानिकृत्वैवव्रतान्यपितथाक्रमात्।गोदानिकंततःकृत्वासमावर्त्तनमारभेदितितत्रप्रायश्चित्तमा
हशौनकः॥व्रतानिविधिवत्कृत्वास्वशाखाध्ययनंचरेत्।अकृत्वाप्यस्नातेयेनसपापीविधिघातकः॥प्रत्येकंकृच्छ्रमेकैकंच
रित्वाज्याहुतीःशतं।हुत्वाचैवतुगायत्र्यास्नायादित्याहशौनकः॥देवलोपिव्रतान्युपक्रम्यकालातिक्रमणेकुर्यात्प्रायश्चित्तंवि
धानतः।कृच्छ्रंद्वादशरात्रंतुहुत्वाचाज्याहुतीःशतं॥अष्टाविंशतिमष्टौवाक्रमात्कुर्याद्व्रतानिहि॥अत्ययेयावदभ्यस्तंवेदं
तावत्पुनःपठेदिति।वेदिति।वेदोदितानांनित्यानांकर्मणांसमतिक्रमे।स्नातकव्रतलोपेचप्रायश्चित्तमभोजनमिति॥ ॥इ
तिव्रतलोपप्रायश्चित्तं॥ ॥अथपरिवेदनं॥मनुः।दाराग्निहोत्रसंयोगंकुरुतेयोग्रजेस्थिते॥परिवेत्तासविज्ञेयःपरिवि
त्तिस्तुपूर्वजः॥गार्ग्योपि।सोदर्येतिष्ठतिज्येष्ठेनकुर्याद्दारसंग्रहं॥आवसथ्यंतथाधानंपतितस्त्वन्यथाभवेदिति।सोदर्य
ग्रहणात्सोदर्येनदोषः।तदाहशातातपः।पितृव्यपुत्रसापत्नपरनारीसुतेषुच॥ज्येष्ठेष्वपिचतिष्ठत्सुनाचूर्णांतुकनी
यसां।दाराग्निहोत्रसंयोगेनदोषःपरिवेदने॥परनारीसुताःक्षेत्रजदत्तकाद्याःपुत्रदानेनप्रतिग्रहीतकुलेपितृव्यपुत्रत्वादि
प्रयुक्तकार्यप्रवृत्तिजनककुलेचतन्निवृत्तिःसप्रमाणमुक्तंव्यवहारमयूखे॥तेनदत्तकसोदरस्यापिकनिष्ठस्यदत्तकमुक्तं

Indira Gandhi National
Centre for the Arts

म्योद्वाहे न दोषः॥ शातातपः॥ क्लीबे देशांतरस्थे च पतिते भिक्षुकेपि वा। योगशास्त्राभियुक्ते च न दोषः परिवेदने॥ भिक्षुको यतिः। योग
मा·मा· शास्त्राभियुक्तो विरक्तः॥ कात्यायनोपि॥ देशांतरस्थक्लीबैकवृषणानसहोदरान्। वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः तज्ज
·०७ डमूकांधबधिरकुब्जवामन — डकान्। अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च॥ धनवृद्धिप्रसक्तांश्च कामतोकारिणस्तथा॥ कु
हकोन्मत्तचोरांश्चापि परिविंदन्न दुष्यति षोडको भग्नचरणद्वयः। अभार्यो मृतभार्यः॥ कामतोकारिणः स्वेच्छयैव नित्यं विवाहमकु
र्वाणाः। अत्र ये सर्वात्मना विवाहानधिकारिणः॥ क्लीबादयस्तेषु सत्सु कालविशेषमंतरेणापि परिवेदने न दोषः। ये तु कालांत
रेपि संभावितविवाहाधिकारा विरक्तवेश्यातिसक्तशूद्रतुल्यकृषिसक्तराजपरतंत्रधनवृद्धिप्रसक्तकामतोकुहकतस्करा
दिषु तत्स्वभावत्वावधारणे न दोषः। देशांतरस्थे विशेषमाह वसिष्ठः। अष्टौ दश द्वादश॥ वर्षाणि ज्येष्ठं भ्रातरमनिविष्टमप्रतीक्ष
माणः प्रायश्चित्ती भवतीति। धर्मार्थमर्थार्थं विद्यार्थं वा देशांतरस्थे द्वादशवर्षप्रतीक्षा कार्या तदर्थं दश द्वादश वेति॥ तथा च सप्र
वद्वादशैव तु वर्षाणि ज्यायान् धर्मार्थयोगतः॥ न्याय्यः प्रतीक्षितुं भ्राता श्रूयमाणः पुनः पुनरिति हेमाद्रिः शूलपाणिस्तु। द्वाद एम·
शैव तु वर्षाणि ब्राह्मणस्य विद्यासंबंधेनेति गौतमवाक्ये ब्राह्मणग्रहणात् एवं॥ द्वादश वर्षाणि प्रतीक्ष्यः॥ क्षत्रियवैश्यश्च ७७

द्वालदशाष्टौ षडिति। तत्तुच्छं॥ अश्रुतषट्कल्पनायां मानाभावात्। धर्मार्थयोश्च क्षत्रियादावपि संभवादिति विवाहे तु ज्येष्ठानुज्ञा
यामपि दोषमाह॥ हारीतः॥ सोदराणां च सर्वेषां परिवेत्ता कथं भवेत्॥ दारैस्तु परिविद्यंते नाग्निहोत्रेण नेज्ययेति॥ अथ प्रायश्चि
त्तं। वसिष्ठः। परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्वा पुनर्निविशेत्॥ अत्रापरार्केकनिष्ठेनोढां ज्येष्ठ उद्वहेत्॥ अ
शास्त्रीयविवाहेन कनिष्ठनिरूपितभार्यात्वानुत्पत्तेः ज्येष्ठोद्वाहयोग्यत्वात् कनिष्ठस्त्वन्यामुद्वहेदिति तन्न॥ तां वै वोपयच्छेदि
ति विज्ञानेश्वरोक्तवाक्यशेषात्॥ भार्यात्वानुत्पत्तिस्तु कनिष्ठोद्वाहेपि साधिका॥ स्पष्टं च हारीतेन ज्येष्ठं साष्टं व्रतमुक्त्वा न्योद्वा
ह एवोक्तः॥ समाप्तेष्टे तां कन्यां ज्येष्ठायोपपादयेयुः सतामनुमान्यान्यया निविशेतैवं धर्मो न लुप्यत इति। तस्मात्परिवे
त्ता कृच्छ्रातिकृच्छ्रौ चरं स्वोढां ज्येष्ठाय ब्रह्मचार्यर्पितात भेत्त्व वडुरूपरिभवपरिहारार्थं निवेद्य तेनानुज्ञातां तामेवोद्वहेदिति
वासिष्ठार्थः॥ यत्तु मनुः॥ कनीयसं प्रत्याहान भूयश्चैनामभिगच्छेदिति तत्पुनर्विवाहाभावे द्रष्टव्यं॥ तत्रैवं व्यवस्था। सं
न्निधावकामतः कृच्छ्रातिकृच्छ्रौ॥ याज्ञवल्कीयं वत्समाणमुपयातकसामान्यव्रतचतुष्टयं च वर्णशक्त्याद्यपेक्षया योज
नीयं॥ कामतः संनिधौ कन्यापित्राद्यनुज्ञायां संवत्सरमिति। अत्रैव शंखः परिवित्तिः परिवेत्ता च संवत्सरं द्वादशरात्र

Indira Gandhi National Centre for the Arts

भेह्नंचरेयातामिति कामतः पित्राननुज्ञातो द्वाहेनुमानवंत्रैमासिकं यत्तु विष्णुः॥ परिवित्तिः परिवेत्ता यया च परिविद्यते तदातायाजक
प्रा॰मा॰ श्चान्द्रायणं कुर्युरिति तत्कृच्छ्रातिकृच्छ्रपरं॥ यत्तु। यमः। कृच्छ्रो द्वयोः परिवेद्ये कन्यायाः कृच्छ्र एव च॥ अतिकृच्छ्रं चरेद्दाता चांद्रा
७८ यणं चरेदिति॥ तदज्ञानतः। क्षत्रियविषयं॥ द्वयेपरिवेत्तृपरिवित्त्योः प्रत्येकं द्वौ कृच्छ्रौ यत्तु सुमंतुः॥ परिवित्तिपरिवेत्तृक
न्यादातृयाजकानां द्वादशरात्रं सक्तुप्राशनं॥ ब्राह्मणतर्पणं च॥ तां पुनर्भुवमाचक्षते न भूयः श्रेनामभिगच्छेदिति तच्छूद्रपरं। प्रसं
गादुच्यते॥ देवलः। ज्येष्ठायां यद्यनूढायां कन्यायामूह्यतेनुजा। या सा त्वग्रेदिधिषुर्ज्ञेया पूर्वा तु दिधिषूः पतिः। प्रायश्चित्तमाह व
शिष्ठः। अग्रेदिधिषुपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत् तां चैवोपयच्छेद् दिधिषूःपतिः कृच्छ्रातिकृच्छ्रौ कृत्वासोढां ज्येष्ठां ज्ये
ष्ठां कनीयस्याः पूर्वविवोढे दत्वान्यामुद्वहेदिति॥ मिताक्षरायां। कल्पतरौ चापरार्केप्यंतरमपि। स्मृत्यर्थसारे॥ कनिष्ठापतिः
द्वादशरात्रं कृत्वा तां स्वोढामेकस्मै ज्येष्ठोद्वाहेन्नातेऽद्वहेत्॥ ज्येष्ठापतिस्तु कृच्छ्रातिकृच्छ्रौ कृत्वा सोढां कनिष्ठापतये ब्रह्मचा
र्यात्तु तस्मै दत्वं निवेद्य तदनुज्ञातां तां ज्येष्ठामेवोद्वहेदिति॥ अपरार्के तु अग्रेदिधिषूपतिस्थाने दिधिषूपतिरितिपठितं स्म॰
॥ दिधिषूपतिस्थाने त्वग्रेदिधिषूपतिरिति तथा च प्रायश्चित्तविकल्प इति। यत्तु गौतमः। परिवित्तिपरिवेत्तृपर्याहितप ७८

र्याधात्राग्रेदिधिषूपतिदिधिषूपतीनां संवत्सरं प्राकृतं ब्रह्मचर्यमिति तत्परिवेत्तृसंवत्सरसमानविषयं॥ पर्याहितपर्याधात्रोः
स्वरूपमुक्तं संवर्त्तेन॥ अनाहिताग्नौ ज्येष्ठे तु कनीयानादधीत चेत्। पर्याधाता कनिष्ठः स्याज्ज्येष्ठः पर्याहितस्तदिति॥ ॥इ
ति गुरुतल्पप्रसक्तानुप्रसक्तप्रायश्चित्तानि॥ ॥अथ संसर्गप्रायश्चित्तं॥ ॥तत्र संसर्गभेदानाह बृहस्पतिः। एकशय्यासनं पं
क्तिर्भांडपंक्त्यन्नमिश्रणं॥ याजनाध्यापने योनिस्तथा वसनभोजनं॥ नवधा संकरः प्रोक्तो न कर्त्तव्योऽधमैः सहेति। योनिः पातकिने क
न्यादानं। तत्कन्यापरिणयनं चेति विज्ञानेश्वरकल्पतरुकारादयः। पातकिस्त्रीगमनमिति अपरार्कः शूलपाणी। योगींदरित्वा
गाविदमेवयुक्तं॥ छागलेयः॥ आलापाद्गात्रसंस्पर्शान्निश्वासात्सहभोजनात्। सहशय्यासनाद्यानात्पापं संक्रमते नृणामिति॥ देव
लः। संलापस्पर्शनिश्वाससहयानाशनासनात्॥ याजनाध्यापनाद्यौनात्पापं संक्रमते नृणामिति॥ वसिष्ठः। पतितसंप्रयोगे
तु ब्राह्मणेन वा यौनेन वा यास्तेभ्यः सकाशात् मात्रा उपलब्धास्तासां परित्यागस्तैश्च न संपिबेदिति॥ मात्रा द्रव्यं॥ एतेषां कर्मणां
मध्ये केन कर्मणा कियता कालेन पातित्यं तदाह बृहद्विष्णुः॥ संवत्सरेण पतति तेन सहाचरन्नेकयानभोजनासनशयनैः।
यौनस्रौवमुखैस्तु संबंधैः सद्य एवेति॥ मुखो मुख्याद्भवो ध्ययनमध्यापनं च॥ एकरात्रान्नभोजनेपि सद्यः पातित्यं॥ याजनं

Indira Gandhi National
Centre for the Arts

प्रा॰ म॰ योनिसंबंधः स्वाध्यायं सहभोजनं॥ कृत्वा सद्यः पतत्येव पतितेन न संशय इति। देवलोक्तेः। यौनस्रौवमुख्यैरिति सत्यपि इह हि निर्दे
७९ शोप्रत्येकमेवैषां पातित्यहेतुत्वं॥ यः पतितैः सह यौवनमुख्यस्रौवाणां अन्यतमसंबंधं कुर्यात् तस्याप्येतदेव प्रायश्चित्तमिति स
मंतूक्तेः॥ कल्पतरौ तु॥ यश्चैतैर्यौनमौख्यस्रौवाणां संबंधानां अन्यतमेन सह संवत्सरं संपर्कमियात् तस्याप्येतदेव प्रायश्चित्त
मिति पाठः॥ तत्रार्थं तामसज्ञानतः। पंचमहायज्ञादियाजनं॥ तथैवांगाद्यध्यापनं॥ तथैव योनिसंबंधो व्यवहितो विवाहसं
बंधश्चेति विज्ञेयं॥ एतेन संवत्सरेण पतति तेन सहाचरन्॥ याजनाध्यापनाद्यौनादेक शय्यैकभोजनादिति हारितीयं॥ यएभा
सिके तु संसर्गे याजनाध्यापनादिभिः॥ एकपात्रासनशय्याभिः प्रायश्चित्तार्द्धमाचरेदिति। संवत्सरेण संस्पर्शे यो नियुक्तो विशेषतः॥
पूर्वोक्तेन विधानेन पतितव्रतमाचरेदिति बार्हस्पत्यं व्याख्यातं। जिकनक्षः॥ समुच्चितानामेव याजनादीनां सद्यः पतनहेतुत्वं॥
प्रत्येकहेतुत्वं तु संसर्गे इति पुनरमूचे॥ परं तु तद्ग्रंथविरुद्धं॥ कौर्मे॥ याजनं योनिसंबंधं तथैवाध्यापनं॥ द्विजः। कृत्वा स
द्यः पतेज्ज्ञानतः सहभोजनमेव च॥ अज्ञानाद्यथवा मोहात्कुर्यादध्यापनं द्विजः। संवत्सरेण पततिसहाध्यापनमेव चेतिद्वि रम॰
तीयवचनमंगाद्यध्यापनपरं॥ बौधायनः। संवत्सरेण पतति पतितेन सहाचरन्॥ ✱ याजनाध्यायनाद्यौनान्नतु पानाश्न ७९

+ याजनाध्यापनाद्यौनात्सद्यो न शयनादिति॥ स्थपनासनात्सद्यो न किंतु संवत्सरेणेति संबंधः॥ एतेन संवत्सरेण पतितेन सहा
चरन्+ नासनादिति मानवमपि व्याख्यातं॥ यैठीनसिन्क। न त्वेकशयनासनादित्यंतपाठं पपाठ। अत्रज्ञानकृत एव संसर्गे पाति
त्यं ज्ञाज्ञानकृते। संवत्सरं तु पतितैः संसर्गं कुरुते तु यः यानशय्यासनैर्नित्यं जानन्वै पतितो भवेदिति देवलोक्तेश्च॥ अत्र संव
त्सरमित्यत्यंतसंयोग वा चिद्वितायाश्च तः षष्ठ्यधिकशतत्रयदिनव्याप्येव संसर्गे पातित्यं भवति न तु तन्न्यूनत्वे इति॥ विज्ञाने
श्वरादयः॥ अतएव वत्सरेण पतति पतितेन सहाचरन्॥ भोजनासनशय्यादिकुर्वाणः॥ सार्वकालिकमिति देवलायं॥ सार्वका
लिपदं अपि संगच्छते॥ ब्रह्महादिचतुष्टयसंसर्ग एव च महापातकं न तु संसर्गिसंसर्गेपि ब्रह्महा मद्यपस्तेनस्तथैव गुरुतल्प
कः। एते महापातकिनो यश्च तैः सह संवसेदिति याज्ञवल्कीयादिषु नेरितिसर्वनाम्ना ब्रह्महादि चतुर्णामेव॥ दोषस्तु संस
र्गिसंसर्गेप्यल्पैव॥ एनस्विभिरणिर्णिक्तैर्नार्थं किंचित्समाचरेदिति मनूक्तेः अपं तु संसर्गस्त्रिविधः। उत्तमो मध्यमः क
नीयान् च। तत्राद्यश्चतुर्धा॥ मध्योप्येकपानासनशय्यैकपंक्तिभोजनभेदाच्चतुर्धा॥ अंत्यस्तु संलापस्पर्शनिश्वासैकपं
क्तिभांडपंक्ति तदीयान्नभोजनतत्प्रतिग्रहतत्स्पृष्टान्नभोजनादिभेदादनेकविध इति निबंधकृतः॥ क्वचित्संसर्गदोषम

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ८० पवद्दितिवसिष्ठः॥ पतितोत्पन्नः पतितो भवत्यन्यत्र स्त्रियाः सा हि परगामिनी भवति तामरिक्थामुपयच्छेतेति याज्ञवल्क्यो
पि। कन्यां समुद्वहेदेषां सोपवासामकिंचनामिति॥ सोपवासां कृतसंसर्गानुरूपप्रायश्चित्तामिति विज्ञानेश्वरः। तन्न। अ
कृतसंसर्गायाः प्रायश्चित्ताभावेन नित्यवच्छ्रवणविरोधात्॥ अतस्तस्या नित्यं पूर्वदिने उपवासोनेन विधीयते॥ अकिं
चनां अगृहीतपितृवस्त्रादिकां॥ वृद्धहारीतः। पतितस्य कुमारीं विवस्त्रामहोरात्रोषितां प्रातः शुक्लेनाहतेन वाससा
च्छादितां नाहमेतेषां न ममैत इति त्रिरुच्चैरभिदधानां तीर्थे स्वगृहे वोद्वहेदिति। उद्वहेदित्यनेन स्वयमेव त्यनेन स्वयमेव
त्यक्तपतितसंसर्गामुद्वहेन्न पुनः पतितात्प्रतिगृह्णीयादिति लभ्यते। पातकसुतत्रयोः स्त्रीपुमपत्ययोः प्रायश्चित्तमाह बौधा
यनः॥ अशुचिशुक्रोत्पन्नानां तेषां शुद्धिमिच्छतां प्रायश्चित्तं पतितानां तृतीयांशः स्त्रीणामंशस्तृतीयमिति॥ प्रापत्यं प्राय
श्चित्तं॥ पतनीयानां नरके पततीति पतनीयाः कर्त्तर्यनीयत्॥ कृत्यल्युटो बहुलमिति स्मृतेः। कर्मप्रवचनीयवत्। तेन
पतितोत्पन्नस्य पुत्रस्य तृतीयोंशः। कन्यायास्तु तत्तृतीयोंशोसौ लिकनवमीश इतियावत्। यत्तु पराशरः। त्यजेद्देशं एम॰ ८०
कृतयुगे त्रेतायां ग्राममुत्सृजेत्। द्वापरे कुलमेकं तु कर्त्तारं तु कलौ युगे॥ कृते संभाषणादेव त्रेतायां स्पर्शनेन च॥ द्वाप

रे त्वन्नमादाय कलौ पतति कर्मणेति। तत्राद्यश्लोके कर्त्तारं त्विति तुशब्देनैवकारार्थेन पूर्वप्रकृतयुगभेदेन व्यवस्थयोक्तं देशग्रा
मकुलसंसर्गत्रयमेव वार्यते। न त्वप्रकृतोयाजनादिसंसर्गोपीति॥ द्वितीयश्लोकेपि कृते संभाषणादेवेत्येवकारेणोत्तरवा
क्यद्वये च तदनुषंगेण कृते संभाषणमात्रात्पतति त्रेतायां स्पर्शमात्रात् द्वापरे तु तत्स्वामिकान्नप्रतिग्रहमात्रात्कलौ तु क
र्त्रैव निषिद्धकर्मणा याजनादिभिरित्यर्थः। अन्यथा पूर्ववाक्ये कर्त्तारं तु कलौ त्यजेदित्यनेन साक्षाद्वृत्तादेः॥ संसर्गो निषिद्धः
द्वितीयवाक्ये तु कलौ पतति कर्मणा इत्यनेन साक्षात्कर्त्तुरेव दोषो न संसर्गकर्त्तुरिति परस्परविरोधः स्यात्। एवं च माधवस्य
कलौ संसर्गदोषाभावोक्तेरत्रैव तात्पर्यं। तथा च कलिनिषिद्धेषु संसर्गदोषस्त्वनुक्तिमादेशादिमात्रसंसर्गः कृतयुगादौ दो
षजनक —नोक्तः। पराशरपूर्वश्लोके यश्चोत्तरश्लोके कृतयुगादौ संभाषणमात्राद्दोष उक्तस्तद्विषया॥ ॥ अथ प्रायश्चि
त्तं॥ याज्ञवल्क्यः। यो येन पतितेनैषां संसर्गं याति मानवः। स तस्यैव व्रतं कुर्यात्तत्संसर्गविशुद्धय इति॥ पतितपदं पापमा
त्रोपलक्षकं॥ संसर्गी येन संसर्गं कुर्यात्तद्व्रतमाचरेदिति॥ जाबालोक्तेः॥ सति पूर्वेपि संसर्गेन मरणान्तिकदेशः किं तु द्वाद
शाब्दस्यैव। व्रतपदात्। अत्र च संसत्यप्यतिदेशो पूर्णमेव द्वादशवार्षिकं भवति द्वादशाभिर्वर्षैर्महापातकिनः पूयंत इति हारी

Indira Gandhi National Centre for the Arts

तोक्तेः। न चेदं संसर्गिभिन्नमहापातकिपरं। हरकल्पेपीक्तरापश्च ब्रह्महा गुरुतल्पगः। व्रतेनैतेन शुध्यंति महापातकिनस्त्विम
इति शंखवाक्ये नोपसंहारादिति वाच्यं॥ महापातकिसंज्ञापा अनर्थक्यापत्तेः। शंखवाक्यं तु संसर्गिणोप्युपलक्षणार्थं॥ काम
कृते ब्रह्मवधे तत्संसर्गेपि च कामकृते मरणतुल्यकल्पं चतुर्विंशत्यब्दं॥ अकामतस्तु द्वादशाब्दमिति केचित्॥ विज्ञानेश्वर
इयस्तु चतुर्विंशत्यब्दमरणतुल्यत्वे मानाभावात् कामकृते वधे संसर्गे च द्वादशाब्दमेव॥ अकामकृते तु षडब्दमित्याहुः॥
अकामतः सद्यः पतनहेतुसंसर्गे तु वसिष्ठः। पतितसंप्रयोगे तु ब्राह्मेण वा स्रौवेण वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उ
पलब्धास्तासां परित्यागस्तैश्च न संवसेदुदीचीं दिशं गत्वा तत्र अनूसंहितामधीयानः॥ पूतो भवतीति परशाः। संसर्गमा
चन् विप्रः पातितादिष्वकामतः। पंचाहं वा दशाहं वा द्वादशाहमथापि वा॥ मासार्द्धं मासमेकं वा मासत्रयमथापि वा॥ अब्दा
र्धमर्द्धमेकं वा भवेदूर्ध्वं तु तत्समः॥ त्रिरात्रं प्रथमे पक्षे द्वितीये कृच्छ्रमाचरेत्। चरेत्सांतपनं कृच्छ्रं तृतीये पक्ष एव तु॥ चतु
र्थे दशरात्रं तु पराकः पंचमे मतः। षष्ठे चांद्रायणं कुर्यात्सप्तमे त्वैंदवद्वयं॥ अष्टमे वाथवा पक्षे षण्मासान्कृच्छ्रमाचरे एम॰
दिति॥ ऊर्ध्वमित्यनेन वर्षद्वयमापि संसर्गे ग्राह्यं॥ अज्ञाततः कृतसंसर्गो दशाहस्यैव पातित्यापादकत्वात्। कामकृते तु ८१

मित्ताक्षरायां स्मृत्यंतरे॥ पंचाहे तु चरेत्कृच्छ्रं दशाहे तप्तकृच्छ्रकं॥ पराकस्त्वर्धमासे स्यान्मासे चांद्रायणं चरेत्॥ मासत्रये तु कुर्वी
त कृच्छ्रं चांद्रायणोत्तरं॥ षाण्मासिके तु संसर्गे कृच्छ्रं त्वब्दार्धमाचरेत्॥ संसर्गे त्वाब्दिके कुर्यात् अब्दं चांद्रायणं नरः इति॥ आ
ब्दिक इति किंचिन्न्यूने द्रष्टव्यं। पूर्णे तु द्वादशाब्दविधानात् तदुक्तं॥ कृतलक्षणे ईक्षणसंभाषणादि वर्जयेत्। दर्शने ज्योतिषां
दर्शनं स्पर्शने त्वद्यालंभनं। संभाषणे ब्राह्मणसंभाषणं पुनरपस्पर्शनं चेति। कृतलक्षणैः श्वपदादिनांकितैः। पतितैरिति
यावत्॥ स्नानं च परंपरयाविवक्षितं॥ साक्षात्पतितस्पर्शने स्नानविधानात्॥ यथा मनुः। दिवाकीर्तिमुदक्यां च पतितं सूतिकां
तथा। शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्यति॥ संभाषणं द्विचतुरघात्तृत्तं॥ सकृत्संभाषणे॥ पतितानां च संभाषे दक्षि
णं श्रवणं स्पृशेदिति लघुप्रायश्चित्तश्रवणात्। बृहस्पतिः। पतितानां गृहे गत्वा भुक्त्वा च प्रतिगृह्य च॥ मासोपवासं कुर्वी
त चांद्रायणमथापि वा। अत्र चांद्रायणं ज्ञानान्मासोपवासस्त्वज्ञानान्मात्ते॥ भोजने तदन्नस्येति केचित्। एकपंक्त्य
वित्यपरे। भोजने वर्षस्य पातित्यापादकत्वाद्गृहगमनप्रतिग्रहयोरपि वर्षमेवाद्य इत्यमेव शूलपाणिः। शंखः। अभे
ध्यपतितचंडालपुल्कसरजस्वलावधूतकुणिकुष्ठिकुनखिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्। इदं च सकृद्ज्ञानतः।

Indira Gandhi National
Centre for the Arts

प्रा·मा· ८२ स्नानं तत्कृच्छ्रद्वयं॥ पतितस्वामिकान्नभोजने त्वाह प्रचेताः। पतितान्नं तु यो भुंक्ते सप्ताहमुदके वसेत्। पानीययानतश्चैव कु
शवारि पिबेदहं॥ इदं च सकृद्भोजनविषयं। पतितामात्रभक्षणे तत्सिद्धान्नभक्षणस्य चतुर्थो भागः। चाण्डालान्नभक्षणे तथा
दर्शनात्। तथा च वसिष्ठः। चांडालान्नं तु भुक्त्वा त्रिदिनमुपवसेत् सिद्धान्नं भुक्त्वा पराक इति पतितोच्छिष्टभक्षणे गिरिः। चंडाल
पतितादीनामुच्छिष्टस्य च भक्षणे। द्विजः शुध्येत् पराकेण शूद्रः कृच्छ्रेण शुध्यतीति॥ एतदपि सकृद्भोजनविषयमेव॥ मार्कंडेयः॥
अपांक्तेयस्य यः कश्चित् पंक्तौ भुंक्ते द्विजोत्तमः॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यतीति। अत्र ब्रह्महादिचतुष्टय
संसर्गेस्तं पूर्णमेव व्रतमतिदिश्यते॥ इतरपापिसंसर्गे तु चतुर्थांशोनं॥ यो येन संपिबेद्वर्षं सोपि तत्तुल्यतामियात् पादन्यू
नं चरेत्सोपि तस्य तस्य व्रतं द्विज इति व्यासोक्तेः॥ इतरपापेषु यो येन पापिना संसृज्यते। स तदीयमेव प्रायश्चित्तं पादोनं
कुर्यात् तेनाद्यसंसर्गी न वाच्यः॥ द्वितीयः पादोनं सप्ताब्दमित्यादि। पंचमहापातकविषये विज्ञानेश्वरः। द्वितीयसंसर्गी पा
दोनं तृतीयोर्द्धं। चतुर्थः पादमित्याह॥ पंचशूलपाणिः। आद्यः पादोनं द्वितीयोर्द्धं तृतीयः पादं चतुर्थो न किंचिदिति॥ प्रा·मा·
एतदन्नाशिनो विप्रा कृच्छ्रं तेषां विधीयते॥ तद्भोजिनोर्द्धकृच्छ्रेण तदन्नाशाः कृच्छ्रपादत इति चांडालान्नसंकरव्यासोक्तेः। ८२

भुक्तं येस्तत्र पक्वान्नं कृच्छ्रं तेषां विधीयते। तेषामपि च यैर्भुक्तं अर्द्धं तेषां विधीयते। तेषामपि च यैर्भुक्तं कृच्छ्रपादो विधीयत इति। तत्रै
वापंक्तिवोक्तेश्च॥ तत्र एतयोर्वाक्ययोश्चांडालान्नसंसर्गविषयत्वेन साक्षात्पापिसंसर्गाविषयत्वेन तत्र लिंगदर्शनता वाच्या। सा तु प्र
त्यक्षव्यासवाक्येन बाध्यते॥ अथ निषिद्धस्पर्शे याज्ञवल्क्यः॥ चंडालपुल्कसम्लेच्छभिल्लपारसिकादिकान्॥ महापातकि
नश्चैव स्पृष्ट्वा स्नायात् सचैलकः। षट्त्रिंशन्मते॥ बौद्धान् पाशुपतांश्चैव लोकायतिकनास्तिकान्॥ विकर्मस्थान् द्विजान् स्पृष्ट्वा स
चैलो जलमाविशेत्। मनुः। दिवाकीर्तिमुदक्यां च पतितं सूतिकां तथा॥ शवं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानं समाचरेत्॥ दिवाकीर्ति
श्चंडालः। एतदकामतः तथा च बृहस्पतिः॥ दिवाकीर्तिं चितिं यूपं पतितं च रजस्वलां॥ स्पृष्ट्वा प्रमादतो विप्रः स्नानं कृत्वा विशुध्य
ति॥ कामतोपि स एव॥ पतितं सूतिकामन्त्यं शवं स्पृष्ट्वा च कामतः॥ स्नात्वा सचैलं स्पृष्ट्वाग्निं घृतं प्राश्य विशुध्यति॥ होमो
व्याहृतिभिः स्नाने विशेषमाह शातातपः। चांडालं पतितं व्यंगं उन्मत्तं शवमन्त्यजं॥ सूतिकां सूतिकां नारीं रजसा च परिप्लु
तं॥ श्वकुक्कुटवराहांश्च ग्राम्यान् संस्पृश्य मानवः। सचैलं सशिरः स्नात्वा तत एनामेव शुध्यति॥ छागलेयोपि॥ चांडालं पति
तं स्पृष्ट्वा सचैलो जलमाविशेत्॥ शवं तत्स्पृष्टिनं चैव चैत्यं यूपं रजस्वलां॥ अत्र श्वादिस्पर्शे स्नानं न त्वशिरोदेशास्पर्शे

Indira Gandhi National
Centre for the Arts

प्रा·मा: अत्यत्राचमनं॥तदाह॥शातातपः॥रजकश्चर्मकारश्चव्याधजालोपजीविनौ॥निर्णेजकःसौचिकश्चनटकःशैलूषकस्तथा॥
८३ मुखेभगस्तथाश्वाचवनितासर्ववर्णगा॥चक्रीध्वजीवध्यघातीग्राम्यसूकरकुक्कुटौ॥एभिर्यदंगंसंस्पृष्टंशिरोवर्जंद्विजातिषु।
तोयेनक्षालनंकृत्वाआचांतःशुचितामियात्।कामतःशिरस्स्पर्शेतुवापुपुराणे॥उदक्यांसूतिकांचैवश्वानमंत्यावसायिनं॥
ननग्नादीन्मृतहारांश्चस्पृष्ट्वास्नानंविधीयते।स्नात्वासचैवंसद्भिश्चशुध्येद्दादशभिर्नरः।नग्नाःबौद्धादयः।तथाचविष्णु
पुराणे॥सर्वेषामेववर्णानांत्रयीसंवरणंनृप।तांसमुत्सृज्यतियोमोहात्सनग्नःपापकृन्नरइति॥गार्ग्यः।क्रव्यादश्चखरेष्ट्रं
श्वस्पर्शेप्रवहितेद्विजः।अचैलंवासचैलंवास्नानंकृत्वाविशुध्यति॥मतिपूर्वेसचैलंअन्यदचैलं॥तथा॥स्रुद्धंस्पृष्ट्वाविण्
दंचशुध्येदाचमनात्द्विजः॥तद्धीनस्पर्शनाघत्वाप्राणायामैस्तपोबलात्॥अत्राचमनंस्नानासमर्थस्यसद्भूद्रस्पर्शेवा॥
अतएवापराह्णेस्मृत्यंतरं।एडकंकुक्कुटंकाकंश्वशूद्रांत्यावसायिनः।दृष्ट्वैतानाचमेत्कर्मस्पृष्ट्वैतान्स्नानमाचरेत्।कर्म
इतिकर्मकालइत्यर्थः।वृद्धयाज्ञवल्क्यः।चंडालपुल्कसंम्लेछमल्लिकापालिपारदान्।उपपातकिनांचैवस्पृष्ट्वास्नानं रम·
समाचरेत्॥संवर्तः।केवर्त्तमृगयुव्याधःशौनताकुनिकानपिरजकंचतथास्पृष्ट्वास्नात्वैवाशनमाचरेत्।यत्वापस्तंबः॥ ८३

चर्मकारंचरजकंधीवरंनटमेवच॥एतान्स्पृष्ट्वाद्विजोमोहादाचामेत्प्रयतोपिसन्॥एतैस्पृष्टश्चउच्छिष्टएकरात्रंपयःपिबत्।तैरु
च्छिष्टैस्त्रिरात्रंपयःपिबेत्।तैरुच्छिष्टैस्त्रिरात्रंस्याद्घृतंप्राश्यविशुध्यतीति।तत्राचमनशक्तस्य॥अकामतोवाशाघायतिः॥काया
लिकानांसंस्पर्शेस्नानंकृत्वाविशुध्यति॥प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यति।शातातपः।यस्तुछायांश्वपाकस्यब्राह्मणो
त्यधिगच्छति।तत्रस्नानंतुतस्यैवघृतप्राशोविशोधनं॥एतच्चिरकालाधिष्ठानइतिभवदेवः॥सर्वांगीणेतच्चंडालस्पर्शेप्रचेताः
श्वकायेनचंडालकापाभिस्पर्शनेत्रिरात्रंशुद्धिरितियत्वापस्तंबः।सर्वेषामंत्यजादीनांस्पर्शेनाचमनंविदुरिति॥तदातुरस्य॥
मदिरास्पर्शेतुमनुः।जान्वधःस्नानमात्रंस्यादानाभेरेकरात्रकं॥नाभेरूर्ध्वंत्रिरात्रंस्यान्मदिरास्पर्शनेविधि॥यत्तुभवदेवी
यंस्मृत्यंतरं।मद्येनस्पृशतेयस्तुब्राह्मणःशांतितव्रतः।उपोष्यरजनीमेकांपंचगव्येनशुध्यतीति।तद्धतस्यस्पर्शजान्वध
स्पर्शे॥मार्कंडेयपुराणे॥अभोज्यसूतिकाषंडमार्जारखुश्वकुक्कुटान्।पतितापविद्धचांडालमृतहारांश्चधर्मवित्।सं
स्पृश्यशुध्यति।स्नानादुदक्याग्रामसूकरौ॥अभोज्याःरजकादयः।अपविद्धोबहिष्कृतः॥मृतहारोमूल्येनशवहारकः।
अंगिरः।भासवायसमार्जारखरोष्ट्रंचश्वशूकरान्॥अमेध्यानिचसंस्पृश्यसचैलोजलमाविशेदिति।अत्रमार्जारेवनमा

Indira Gandhi National
Centre for the Arts

प्रा॰प्रा॰ ८४

र्जारः॥ गृहमार्जारस्याशुचित्वात्। यथाह सुमंतुः। स्त्रीबालमशकमक्षिकामार्जारमूषिकाछायासनशयनासु विप्रुषो नित्यं मेध्याः॥ बृ
हस्पतिरपि॥ स्त्रियो वृद्धाश्च बालाश्च न दुष्यंति कथंचन॥ मार्जारश्चैव दर्वी च मारुतश्च सदाशुचिः। मशकमक्षिकासाहचर्यान्मा
र्जारोऽत्र गृहस्थ एवेति शूलपाणिः। मिताक्षरायां तु मार्जारस्पर्शे स्नानमुच्छिष्टसमये अनुष्ठानसमये वेति। आपस्तंबः। एकशा
खां समारूढश्चांडालो वा रजस्वला। ब्राह्मणस्तत्र निवसन् सवासा जलमाविशेत्॥ शाखाग्रहणमेकावयवसुपलक्षणार्थं ते
नैकपाषाणादेरपि ग्रहणं॥ एतदकामतः कामतस्तद्द्विगुणं॥ अभ्यासे तु स एव॥ एकवृक्षसमारूढश्चांडालो रजस्वला॥
अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति। एतच्च स्नानानंतरं कार्यं॥ यमः। चांडालैः श्वपचैः स्पृष्टे निशि स्नानं विधीयते॥ न
वसेच्चैव यो रात्रौ सद्यः स्नानेन शुध्यति। अथ तत्र वसेद्रात्रावज्ञानाद्विचक्षणः। तदा तस्य तु तत्पापं शतधा परिवर्तते। प
राशरः। अस्तंगते यदा सूर्ये चांडालं पतितं स्त्रियं॥ सूतिकां स्पृशतश्चैव कथं शुद्धिर्विधीयते॥ जातवेदः सुवर्णं च सोममार्गं तथैव
च॥ ब्राह्मणानुगतश्चैव स्नानं कृत्वा विशुध्यतीति। रात्रौ स्नाने विशेषमाह देवलः। दिवाहृतैर्जलैः स्नानं निशि कुर्यान्निमित्ततः। प्र एम॰ ८४
ह्निप्य च सुवर्णं च संनिधाप्य च पावकं॥ शातातपः॥ आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि॥ भगवन्मे न शुद्धिः स्यात्तन्मे ब्रू

हि स्नानं निश्चितं॥ अनस्तमिते आदित्ये संगृहीतं तु यज्जलं॥ तेन सर्वात्मनः शुद्धिः शावस्पृष्टं तु वर्जयेत्॥ पराशरः। स्नानमाचरणं प्रो
क्तं दिवोद्धृतजलेन तु॥ शिशोर्विशेषमाह वृद्धशातातपः। शिशोरभ्युक्षणं प्रोक्तं बालस्याचमनं स्मृतं॥ रजस्वलादिसंस्पर्शे स्नात
व्यं तु कुमारकैः॥ स एव। प्राक् चूडाकरणाद्बालः प्रागन्नप्राशनाच्छिशुः॥ कुमारस्तु स विज्ञेयो यावन्मौंजीनिबंधनं॥ चांडालशवशव
संस्पर्शे कृच्छ्रं कुर्यात् पानशय्यासने तु त्रिरात्रं। जीवतश्चांडालेन सहपानादिषु त्रिरात्रं। तथा। व्रणबंधनाभ्यंजनरुधिरत्यादनेषु कृ
च्छ्रं द्वादशरात्रं चरेत्॥ व्रणबंधनादीनां चांडालप्रतिकरणे। चंडालेन वात्मनि तत्करणे। आपस्तंबः। येन केनचिदभ्यक्तश्चंडालं
पतितं स्पृशेत्। उपवासेन चैकेन पंचगव्येन शुध्यति। एतच्चाभ्यासे अनभ्यासे त्वपराह्णे प्रचेताः। चंडालीपदिकापस्परक्तमुन्या
दयेत्कचित्। त्रिरात्रेण च शुद्धिः स्यादेकाक्ताशेन चोत्तरे उत्तरे तु त्रिपादो त्रिरात्रादेकैकस्याह्नः। क्रतुः। चंडालस्योच्छिष्टदा
ने चंडालक्रतुदर्शने गीतवादित्रश्रवणे षडुपक्रियायां च द्विरात्राभोजनेन शुद्धिः। अशुचिं दृष्ट्वादित्यमीक्षेत। प्राणायामं कृ
त्वा पंचदशमात्रकं॥ सुमंतुः चंडालदर्शने सूर्यदर्शनं॥ आपस्तंबो ब्रह्माभिव्याहारः। स्पर्शने सचैलं स्नानमिति। ब्रह्मगायत्री। क्व
चिदशुचिदर्शनेऽपि गायत्रीरुपलभ्याचक्षांते बलिलिखितौ। अशुचिदर्शने गायत्रीमेकं जपेदिति गौतमः॥ नम्लेच्छाशुचधार्मि

Indira Gandhi National
Centre for the Arts

केः सह संभाषेत संभाष्य पुण्यकृतो मनसा ध्यायेत्। ब्राह्मणेन वा सह संभाषेत। तस्मान्न धनलाभवधे पृथग्वर्णानीति तत्स्यं भा
प्रा·मा: र्या॥ पृथक् प्रत्येकं हृद्यपराशरः। दारान्न धनलाभानां बुध्वा विध्वंसमाचरेत् प्रत्येकं प्राकृतं कुर्यात् ब्रह्मचर्यं तु वार्षिकमिति। म
८५ नुः। आचम्य प्रयतो नित्यं जपेदशुचिदर्शने॥ सौराण्मंत्रान्सयोत्साह पावमानीश्च शक्तितः। देवलः। चंडालधर्मसंयोगे प्राजा
पत्यं समाचरेत्॥ चरेत् त्रिरात्रं चंडालकूपतीर्थनिषेवणात्॥ धर्मसंयोग उपदेशः। पराशरः। चंडालैः सह सुप्त्वा तु त्रिरात्रमु
पवसेत्। चंडालैकपथं गत्वा गायत्रीस्मरणाच्छुचिः। एतत्त्वल्पकालसाध्ये। अन्यत्र प्रायश्चित्ताधिक्यस्य वक्ष्यमाणत्वात्।
अपरार्के वसिष्ठः। चंडालेन तु संस्पृष्टं कांस्यभांडं समन्नयं अज्ञानात्कांस्यभोजी तु मन्नयेज्जलपानकृत्। कांसे भुक्त्वा च
रेत्कृच्छ्रं रुजलपाने तु कृच्छ्रकं॥ कृच्छ्रक ४ पाद कृच्छ्रः। अथ चांडालसंकरे॥ पराशरः। अविज्ञातस्य चंडालो यत्र वेश्मनि ति
ष्ठति दत्त्वोपक्रम्य दध्ना सर्पिः पयो मां चयुक्तं गोमूत्रयावकं॥ भुंजीत सह भृत्यैश्च त्रिसंध्यमवगाहनं॥ त्र्यहं भुंजीत द
ध्ना च त्र्यहं भुंजीत सर्पिषा॥ त्र्यहं क्षीरेण भुंजीत एकैकेन दिनत्रयं॥ भावदुष्टं न भुंजीत नोच्छिष्टं कृमिदूषितं॥ त्रिपलं एम·
क्षीरदध्नोश्च पलमेकं तु सर्पिषः॥ आकरेषु भवेच्छुद्धिरारकूटे सकांस्यके॥ जलशौचे। नवस्त्राणां परित्यागस्तु मन्मये॥ ८५

कुसुंभगुडकार्पासलवणं तैलसर्पिषी॥ द्वारे कृत्वा च धान्यानि दद्याद्वेश्मनि यावकं॥ एवं शुद्धस्ततः पश्चात्कुर्याद्ब्राह्मणतर्पणं।
त्रिंशतं गा वृषं चैकं दद्याद्विप्रेषु दक्षिणां। पुनर्लेपनखातेन होमजप्येन शुध्यति। आधारेणान्वविप्राणां भूमिदोषो न विद्य
त इति। स्वल्पकालसंपर्क एतत्। यत्तु संवर्त्तः अंत्यजः पतितो वापि निगूढो यत्र तिष्ठति। सम्यक् ज्ञात्वा तु काले च ततः कु
र्याद्विशोधनं। चांद्रायणं पराको वा द्विजातीनां विशोधनं। प्राजापत्यं तु शूद्राणां शेषाणामिदमुच्यते॥ ये स्तत्र भुक्तं पक्का
न्नं तेषामुक्तो विधिक्रमः। शेषाणां प्राजापत्यं तु शूद्राणां शेषाणामिदमुच्यते॥ ये स्तत्र भुक्तं पक्कान्नं तेषामुक्तो विधिक्र
मः। शेषाणां प्राजापत्यस्य स्पर्शः। तेषामपि तु यैर्भुक्तं कृच्छ्रपादो विधीयते कूपैकपानदुष्टा ये तथा संसर्गदूषिताः॥ सर्वा
ने वोपवासेन पंचगव्येन शोधयेत्॥ बालापत्या तथा या गीमर्भिणी हृद्यदवा। तेषां नक्तं प्रदातव्यं बालांप्रहरद्वयं॥ बहुका
लाभ्यास एतत्। अत्र विशोधनप्रकारं प्रौढिश्चांतरं चाह च्यवनः। चंडालसंकरे भवनदहनं सर्वमृद्भांडभेदनं दारवाणां तु
य तक्षणं शांखशुक्तिसुवर्णरजतचेलानां अद्भिः प्रक्षालनं कांस्यतांम्राणामाकरे शुद्धिः। सौवीरदधितक्राणां परित्यागः
शेषरसद्रव्यरक्षणं शांखशुक्तिसुवर्णरजतचेलानां अद्भिः प्रक्षालनं कांस्यतांम्राणामाकरे शुद्धिः। सौवीरदधितक्रा

Indira Gandhi National Centre for the Arts

॥गोमूत्रयावकाहारो मासं भक्षयेत्॥ बालवृद्धस्त्रीणामर्द्धप्रायश्चित्तं॥ आषोडशात् बालाः सप्तत्यूर्ध्वं वृद्धाः चार्णप्रायश्चित्ते॥ प्रा० मा०
ब्राह्मणभोजनं गोशतं दद्याद्भावे सर्वस्वमिति। एतदिति चिरकालसंकरे॥ पराशरः॥ चंडालैः सह संपर्कं मासं मासार्द्धमेव वा॥ ८६
गोमूत्रयावकाहारो मासार्द्धेन विशुध्यतीति। कृत्वेति शेषः। मासार्द्धेन मासस्यार्धं च मासार्धे मासं पक्षे मासेन तदूर्ध्वं संपर्के त्वर्धे
न॥ चंडालशाब्देन तत्समाः पुल्कसादयोप्युपलक्ष्यंते॥ अत एव संवर्त्तः॥ चंडालैः संकरे विप्रः श्वपाकैः पुल्कसैरपि॥ गोमू
त्रयावकाहारो मासार्धेन विशुध्यति। मासादधिकं किंचित्कालसंकरे तु हारीतः। चांडालैः सह संयोगे प्राजापत्येन शुध्यति।
विप्रान् दृष्ट्वा वर्णं कृत्वा तैरनुज्ञाप्य शासनात्॥ आकंठसप्रमाणं तु कुर्याद्गोमयकर्दमं॥ तत्र स्थित्वा त्वहोरात्रं वायुभक्षः
समाहितः। बालवृत्छं तत्र कुर्यात् गोष्ठे वसति सर्वथा॥ सकेशं पेयनं कुर्यात् परमां शुद्धिमाप्नुतीति। बालकृच्छ्रलक्षणमु
क्तं। यत्तु हारीतः। चंडालश्वपचानां च संकरे समुपस्थिते॥ अहोरात्रं द्विरात्रं वा त्रिरात्रं षडहं स्मृतं॥ अविज्ञानकचंडालः रम०
सप्ताहं निवसेद्यदि तस्य ज्ञात्वोपपन्नस्य विप्राः कुर्युरनुग्रहं॥ दधिक्षीरघृतैर्युक्तं कृच्छ्रं गोमूत्रयावकं॥ मात्रायेत्सहमासो ८६
सप्ताहं निवसेद्यदि तस्य ज्ञात्वोपपन्नस्य विप्राः कुर्युरनुग्रहं॥ दधिक्षीरघृतैर्युक्तं कृच्छ्रं गोमूत्रयावकं॥ ... चातुर्वर्णस्य गे
ह्यमासमेकं निरंतरमिति। तदहोरात्राद्यतिसंकरे॥ पराशरः। रजकी चर्मकारी च लुब्धकी वेणुजीविनी। चातुर्वर्णस्य गे

हे तु अज्ञाता त्वधितिष्ठति। ज्ञात्वा तु निष्कृतिं कुर्यात् पूर्वोक्तस्यार्द्धमेव तु। गृहदाहं न कुर्वीत शेषं सर्वं च कारयेदिति। अत्र पादत्राचां
डालसंसर्गे यत्तु रजकादिना दत्रासंसर्गे तदर्धं॥ रजकादिषु लिंगमविवित्तं॥ बृहस्पतिः। अकामतश्चापदि वा यदा जायेत संकरः
। तदा कार्यं सलिले होमो गायत्र्याजपनं तथा॥ स्नात्वाघमर्षणं कुर्यात् प्राणायामांश्च संकरी। गायत्रीसूक्तजपनं तिलैर्होमं च शक्ति
तः। अकामतः कृते त्वस्य शुद्धिरेषा प्रचोदितेति॥ ॥अथोच्छिष्टादिसंस्पर्शे प्रायश्चित्तं वः। येन केन चिदुच्छिष्टः संस्पृश्य यः परैः सह
गच्छेत् सद्यः समाप्लुत्य प्रायश्चित्तेन युज्यत इति॥ शातातपः। चंडालैः श्वपचैः स्पृष्टो विण्मूत्रे कुरुते द्विजः। त्रिरात्रं तत्र कुर्वीत
भुक्त्वोच्छिष्टः षडाचरेत्॥ अत्र षडुपवासे प्राजापत्यतुल्यता। अत्रानुच्छिष्टस्य यः स्पर्शे स्नानं तस्योर्ध्वोच्छिष्टस्य कामतस्तस्य
र्शे षडुपवासतुल्यः प्राजापत्यः तथा च हारीतः। अनुच्छिष्टस्य संस्पर्शे स्नानं येन विधीयते॥ उच्छिष्टस्तेन संस्पृष्टः प्राजाप
त्यं समाचरेदिति तथा सुमंतुः। चंडालं पतितं वापि तथा नारीं रजस्वलां। उच्छिष्टस्य द्विजः स्पृष्ट्वा प्राजापत्येन शुध्यति। ए
तत्कामतः। यत्वापस्तंबः। भुक्त्वोच्छिष्टोंत्यजैः स्पृष्टः प्राजापत्यं समाचरेत्। अर्द्धोच्छिष्टे स्नातः पादः पादः प्राप्रा माशने तथेति। अ
त्र अर्द्धोच्छिष्टमुखे ग्रासप्रक्षेपमात्रं कृतं न तु निगीर्णः। अकामतः स एव॥ भुक्त्वोच्छिष्टस्त्वनाचांतश्चांडालैः श्वपचेन वा। प्र

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰ ८७ मारास्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनं॥ गापत्र्यष्टसहस्रं तु द्रुपदां वा शतं तथा॥ त्रिरात्रोपोषितो भूत्वा पंचगव्येन शुध्यतीति॥
पत्तु स एव। चंडालेन तु संस्पृष्टो विप्रो चक्रद्विजोत्तमः। उपोष्य रजनीमेकां पंचगव्येन शुध्यतीति। तदापद्यकामतः। काश्यपः।
श्वसूकरं त्वचांडालमद्यभांडरजस्वलाः। यद्युच्छिष्टः स्पृशेत्तत्र कृच्छ्रं सांतपनं चरेत्। एतत्कामतोभ्यासे॥ मद्यं सुरा॥ अत्र
त्वल्पप्रायश्चित्तस्योक्तत्वात्। तथा च। वृद्धशातातपः। उच्छिष्टः संस्पृशेद्विप्रो मद्यं शूद्रं स्तुतो शुचीन्। अहोरात्रोषितो भूत्वा
पंचगव्येन शुधतीति। यत्तूच्छिष्टादेः श्वादिस्पर्शे जपेद्देव्याः सहस्रं स्नानपूर्वकमिति। तदकामतः। यत्तु पराशरः। आपस्तंबः।
उदक्यास्पृष्टमुच्छिष्टो विडूराहैश्च कुक्कुटैः॥ काकमार्जारकव्याद्भिरुपवासेन शुध्यतीति। तदापद्यकामतः। यत्तु व्याघ्रः।
चंडालोदकं संस्पृष्टः स्नानं कृत्वा विशुध्यति। उच्छिष्टस्तेन संस्पृष्टस्त्रिरात्रेण विशुध्यतीति तदप्यकामत एव। यत्तु दक्षः। प
निमेषु न संसर्गेन यामूत्रपुरीषयोः। संस्पृशं यदि गच्छेत्तु शावोदक्यांत्यजैः सह॥ दिनमेकं चरेन्मूत्रे पुरीषे तु दिनद्वयं॥ दि
नत्रयं मैथुने स्नात्या नेतु स्नाच्चतुष्टयमिति। तत्कामतः सवर्णतः। चर्मारं रजकं वेणं धीवरं नटमेव च॥ एतैः स्पृष्टस्तथोच्छि राम. ८७
ष्ट एकरात्रं पयः पिबेत्॥ तैरुच्छिष्टे त्रिरात्रं स्याद्घृतं प्राश्य विशुध्यतीति। अधोच्छिष्टविषयं चेदं। ऊर्ध्वोच्छिष्टो यदा स

स्यात्तदा प्रायश्चित्तं भवेदिदं॥ उपवासस्त्रिरात्रं स्याद्घृतं प्राश्य विशुध्यतीति। अतश्च। ऊर्ध्वोच्छिष्टस्य तेरुच्छिष्टैः स्पर्शे षड्रात्रं। एव
मेव यत्रोर्ध्वोच्छिष्टस्य चांडालादिस्पर्शे षड्रात्रं। ततोधोच्छिष्टस्य तदर्धं त्रिरात्रं॥ अत एव शातातपः। उच्छिष्टः संस्पृशेद्वि
प्रचंडालं कथंचन॥ ऊर्ध्वोच्छिष्टस्य संस्पृश्य द्विजः सांतपनं चरेत्। अधोच्छिष्टस्त्रिरात्रांते पंचगव्येन शुध्यतीति। सांतपन
मिति। सांतपनमिति सप्ताहसाध्यं॥ यत्तु चांडालादीनुपक्रम्य वृद्धशातातपः। अशुद्धान्स्वयमप्येतानशुद्धश्च यदा स्पृशे
त्॥ विशुध्यत्युपवासेन त्रिरात्रेणांततः शुचिः। तथा एतानेव प्रकृत्याह देवलः। अशुद्धान्स्वयमप्येतानशुद्धश्च यदा स्पृ
शेत्। विशुध्यत्युपवासेन पुनः कृच्छ्रेण वा पुनरिति। अत्राशुद्धातितिस्वरूपकीर्त्तनं। मूत्रादिकरणेन वा॥ स्वपमशुद्धंदत्य
धोच्छिष्टादिना॥ एकरात्रमापद्यज्ञानतः। त्रिरात्रं ज्ञानतः। कृच्छ्रस्त्वभ्यासे॥ मिताक्षरायां तु कृच्छ्रः। श्वपाकादिविषयः॥
श्वादिषु तूपवास इति। यत्तु शातातपः। अंत्यजेहस्तकाष्ठेन वा समास्पृष्ट एव वा। प्रक्षाल्यांगं तदाचामेत्। उच्छिष्टस्तु ति
शांद्विपेदिति॥ तदाप्युक्त एव विषये। उच्छिष्टस्य पुरीषसंसर्गे लघुहारीतः। श्वविट्कांकाकविट्कांवाकं कादृधनरस्य च। अ
धोच्छिष्टस्य संस्पृष्टः सचेलो जलमाविशेत्॥ ऊर्ध्वोच्छिष्टस्य संस्पृष्टे प्रायश्चित्तमिदं चरेत्॥ उपोष्य रजनीमेकां पंचगव्ये

Indira Gandhi National
Centre for the Arts

नशुध्यतीति। उच्छिष्टस्य चांडालांत्यस्पर्शे विशेषमाह॥ हारीतः। उच्छिष्टस्तु स्पृष्टो द्विजश्चांडालांत्यकैः कथंचन॥ ऊर्ध्वोच्छिष्टस्य
संस्पृष्टो द्विजश्चांद्रायणं चरेत्। अधोच्छिष्टो यदा स्यात्तदा प्रायश्चित्तं भवेदिदं॥ त्रिरात्रमुपवासः स्यात् पंचगव्येन शुध्यतीति॥
पराशरः। उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा पुनः। उपोष्य रजनीमेकां पंचगव्येन शुध्यति। उच्छिष्टश्चासावुच्छिष्ट
संस्पृष्टश्चेति विग्रहः। सवर्णविषयमेतत्। अत्रिः। उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन तु। द्रुपदां तु जपेत्पश्चाज्जा
यस्याशोधनं भवेत्। ब्रह्मपुराणे॥ उच्छिष्टेन तु विप्रेण द्विजस्पृष्टस्तदा द्विजः। उभौ स्नानं प्रकुर्वीत ततः स्यादेवं समाहितावि
ति। उच्छिष्टं विप्रं प्रकृत्याह पराशरः॥ अनुच्छिष्टेन शूद्रेण स्पर्शे स्नानं विधीयते॥ तेनोच्छिष्टेन संस्पृष्टः प्राजापत्यं समा
चरेत्तु इति॥ यत्तु ब्राह्मे॥ उच्छिष्टेनाथ शूद्रेण विप्रः स्पृष्टः कदाचन॥ उपवासेन शुद्धः स्याच्छुनासंस्पृष्ट एव चेदिति। त
दापद्यशक्तस्य। देवलोपि। उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं वापि समाहितः। तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुध्यतीति॥
द्रव्यहस्तस्योच्छिष्टस्पर्शे मनुः। उच्छिष्टेन तु संस्पृष्टो द्रव्यहस्तः कथंचन॥ अनिधायैव तद्द्रव्यमाचांतः शुचितामि 
यात्॥ एतदपेयविषयं॥ भोज्यविषये तु वसिष्ठः। प्रचरन्नन्नपानेषु उच्छिष्टमुपस्पृशेत्॥ भूमौ निधाय तद्द्रव्यमा 

चांतः प्रचरेत्ततः॥ तद्द्रव्यस्य त्वभ्युक्षणं कार्यमित्याह तु शंखलिखितौ॥ द्रव्यहस्त उच्छिष्टो निधायाभ्युक्षयेद्द्रव्यमिति। उच्छिष्टः।
उच्छिष्टस्पृष्टः। एतच्चानुच्छिष्टहस्तादिना स्पर्शे॥ साक्षादुच्छिष्टहस्तादिस्पर्शे त्वभोज्यमेव॥ यथाह वसिष्ठः। उच्छिष्टमगुरोर
भोज्यं स्वमुच्छिष्टमुच्छिष्टोपहतं चेति। उच्छिष्टस्य तैलाभ्यक्तस्य च मूत्रादिकरणे आपस्तंबः। तैलाभ्यक्तस्त्वनाचांतः श्मश्रुक
र्मणि मैथुने। मूत्रोच्चारं यदा कुर्यादहोरात्रेण शुध्यति। उच्छिष्टस्य सूर्यादिदर्शने दोष उक्तो मार्कंडेयपुराणे॥ सूर्येंदुतार
काद्द्रष्टा ये ह्युच्छिष्टैः कदाचन। तेषां पाप्मेन रैरेहिन्यस्तो वह्निः समिध्यते॥ अत्र च स्नातकव्रतलोपे च प्रायश्चित्तमभो
जनमिति मनूक्तं द्रष्टव्यं॥ तस्यैव चांडालादिस्पर्शे बौधायनः॥ चांडालादिदर्शने ज्योतिषां दर्शनं। संभाषणे॥ ब्राह्मण
संभाषणं॥ उच्छिष्टस्य दर्शने त्वेकरात्रमुपवासः। संभाषणे द्विरात्रं। संस्पर्शने त्रिरात्रं॥ सहगमने सचैलं स्नानमिति॥ चांडा
लदर्शन इत्यनुच्छिष्टस्य। उच्छिष्टदर्शन इति। उच्छिष्टस्य चांडालदर्शने इत्यर्थः। एवमग्रेपि। उच्छिष्टस्य पलांड्वादिस्पर्शे॥
बृहस्पतिः॥ शुनः पलांडुलशुनस्पर्शं कामकृते द्विजः। अहः पिबेत्कुशजलं सावित्रीं च जपेत्तथा॥ इदमूर्ध्वोच्छिष्टस्येति
मूलपाणिः। पत्तु स एव। पलांडुलशुनस्पर्शे स्नात्वा नक्तं समाचरेत्॥ कृतोच्चारस्त्वहोरात्रं उच्छिष्टो ग्रहमाचरेदिति॥ तद

Indira Gandhi National Centre for the Arts

प्रा॰मा॰
८९

धोच्छिष्टविषयं॥ ऊर्ध्वोच्छिष्टे अकामविषयं वा॥ अथानुच्छिष्टस्य नीलावस्त्रपरिधाने॥ भविष्यत्पुराणे॥ स्तणष्ठेतिमहावा
होनीलीवस्त्रस्यधारणात्॥ वाससोगणाच्छूलगदत्तोममहत्तलशः पालनादिक्रियाश्चैव तदृत्तेरुपजीवनात्॥ पतितस्तभ
वेद्विप्रस्त्रिभिर्वर्षैर्विशुध्यति॥ लीलावस्त्रं यदा रक्तं कश्चिद्विप्रस्य धारयेत्॥ अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति॥ ऐम
कूपेयदा गच्छेदस्रोनील्यादिकः क्वचित्॥ त्रिवर्षेषु च सामान्येतत्तत्कृच्छ्रं विशोधनं॥ नीलीदारुमयदाभिधाब्राह्मणस्यशरी
रतः॥ शोणितं दृश्यते यत्र द्विजश्चांद्रायणं चरेत्॥ इदमज्ञाने॥ ज्ञाने तु द्विगुणं॥ अत्रापवादः। नीलीमनुहृत्तावापलं
बः॥ स्त्रीणां क्रीडार्थसंयोगे शयनीये न दुष्यतीति॥ एवमेव केशनिर्मितवस्त्रधारणे चोपवासः। पंचगव्यं घृतं हिरण्यो
दकं चापिकमिति स्मृत्यर्थसारे॥ ॥अथ रुद्रनिर्माल्यस्पर्शे॥ कालिकापुराणे॥ स्पृष्ट्वा रुद्रस्य निर्माल्यं सवासा आप्लुतः
शुचिः॥ अथ रजस्वलायाः अस्पृश्यस्पर्शे॥ तत्र रजस्वलयोः सपत्न्योरेकगोत्रयोः स्पर्शे मार्कंडेयः। उदक्यानुसवर्णा या स्पृष्ट्वा
चेत्स्यादुदक्यया। तस्मिन्नेवाहनि स्नाता शुद्धिमाप्नोत्यसंशयं॥ इदं चाकामतः। कामतस्तु कात्यायनः। रजस्वलां तु संस्पृष्ट्वा राम॰
ब्राह्मण्या ब्राह्मणी यदि। एकरात्रं निराहारा पंचगव्येन शुध्यति। यत्तु पराशरः॥ स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी ब्राह्मणी ८९

तथा॥ तावत्तिष्ठेन्निराहारा त्रिरात्रेणैव शुध्यतीति॥ तत्कामतोऽभ्यासे॥ सहशयनादिचिरस्पर्शे वा॥ असवर्णास्पर्शे पुनःसर
एव॥ रजस्वलानुसंस्पृष्टा राजन्या ब्राह्मणी च या॥ त्रिरात्रेण विशुद्धिः स्याद्व्याघ्रस्य वचनं तथा॥ रजस्वलानुसंस्पृष्टा वैश्य
या ब्राह्मणी च या॥ पंचरात्रं निराहारा पंचगव्येन शुध्यति॥ रजस्वलानुसंस्पृष्टा शूद्रया ब्राह्मणी तया षड्रात्रेण विशुद्धिः स्या
द्ब्राह्मण्या कामकारतः। अज्ञानतश्चरेदर्धं ब्राह्मणी सर्वजातिषु। अत्र यथा ब्राह्मणी रजस्वलयोः स्पर्शे उपवासः पंचगव्या
शनं च॥ तथान्यासामपि सवर्णा रजस्वलास्पर्शे तद्देव। यथा ब्राह्मण्याः क्षत्रियास्पर्शे त्रिरात्रं तथा॥ क्षत्रियाया वैश्या
स्पर्शे वैश्यायाः शूद्रास्पर्शेऽपि तद्देव॥ तथा च भवदेवनिबंधे स्मृतिः। र—स्वलानुया नारी अन्योन्यमुपसंस्पृशेत्॥ सव
र्णे पंचगव्येन उपवासः सहितेनेति भवदेवः। तथा शातातपः॥ रजस्वले उभे नार्यौ अन्योन्यं संस्पृशेते यदि॥ सवर्णे पंचगव्यं च
ब्रह्मकूर्चमतः परमिति॥ यत्तु बृहद्वसिष्ठः। स्पृष्ट्वा रजस्वलान्योन्यं ब्राह्मणी शूद्रजापि वा॥ कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन
शुध्यति। स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया वैश्यजापि वा। पादहीनं चरेत्पूर्वा कृच्छ्रपादं तथोत्तरा॥ स्पृष्ट्वा रजस्वलान्यो
न्यं ब्राह्मणी क्षत्रिया तथा॥ कृच्छ्रार्धाच्छुध्यते पूर्वा उत्तरा तु तदर्धतः॥ स्पृष्ट्वा रजस्वलान्योन्यं क्षत्रिया शूद्रजापि वा॥ उ

Indira Gandhi National
Centre for the Arts

पवासेस्त्रिभिः शूर्वात्वहोरात्रेण चोत्तरा॥ स्पृष्ट्वा रजस्वलान्योन्यं वैश्या शूद्रा तथैव च॥ त्रिरात्राच्छुध्यते पूर्वा उत्तरा तु दिनद्वया
त्। वर्णानां कामसंस्पर्शे शुद्धिरेषा पुरातनीति॥ एतच्चकामतोभ्यासे ह्यनेन पादकृच्छ्रमत्याम्नायेन॥ पतितचांडालादिस्पर्शे हि बृ
वमिह बृहस्पती॥ पतितांत्यश्वपाकेन संस्पृष्टा चेद्रजस्वला॥ तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥ प्रथमेह्नि त्रिरात्रं स्या
द्द्वितीये त्र्यहमेव तु॥ अहोरात्रं तृतीयेह्नि चतुर्थे नक्तमेव च॥ शूद्रयोच्छिष्टया स्पृष्टा शुना च त्र्यहमाचरेत्॥ तान्यवशिष्टानि
दिनानि व्यतिक्रम्य अनाशकेन नीत्वेत्यर्थः॥ अत्र सर्वत्र पंचगव्यप्राशनमपि कर्त्तव्यमिति मदनदेवः॥ यत्तु बौधायनः॥ रज
स्वला तु संस्पृष्टा चंडालांत्यश्ववायसैः॥ तावत्तिष्ठेन्निराहारा यावत्कालेन शुध्यतीति॥ एतत्तदशक्तायाः। अकामे वा॥ यत्तु शाता
तपः। उदक्यां सूतिकां वापि शावां त्यं संस्पृशेद्यदि॥ त्रिरात्रोपोषिता भूत्वा पंचगव्येन शुध्यति॥ कश्यपः। चांडालेन तु संस्पृष्टा
कदाचित्स्त्री रजस्वला॥ तान्यहानि व्यतिक्रम्य प्रायश्चित्तं समाचरेत्॥ त्रिरात्रमुपवासः स्यात् पंचगव्येन शोधनं॥ तानि शा
कुव्यतिक्रम्य अन्नाद्यातं तु कारयेदिति॥ तदेतत्प्रथमदिनविषयं। शूलपाणिस्तु कश्यपवाक्ये प्रथमादिदिनअवस्थाना
ल्लि॥ त्रिरात्रेणैवेति हृदरशानातपवाक्यात्मित्याह॥ तत्र बार्हस्पत्येन प्रथमदिन एव त्रिरात्रस्यावस्थितत्वात्। तद्विषयत्व



मेव न्याय्यमिति॥ उपवासासमर्थायां तु गिराः। चंडालः श्वपचो वापि यद्यात्रेयीं स्पृशेद्यदि॥ अलकृच्छ्रे वर्तेत पंचगव्येन शु
ध्यति। पंचगव्ययानं तु स्नानानंतरं कार्यं चांडालेन सहैकवृक्षाधारोहणे पराशरः॥ एकवृक्षं समारूढश्चांडालो यः रजस्वला
। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति। श्वादिस्पर्शे विशेषमाह यमः॥ रजस्वला तु संस्पृष्टा शुना जंबुकवायसैः॥ निराहा
रा भवेत्तावद्यावत्कालेन शुध्यति। एतदकामतः। कामतस्तु रजस्वला तु वृत्ती बृहस्पतिः॥ शुना चोच्छिष्टया शूद्रा संस्पृष्टा
त्र्यहमाचरेत्॥ अहोरात्रं तृतीयेह्नि परतो नक्तमाचरेदिति॥ प्रथमद्वितीयदिने श्वादिस्पर्शे त्र्यहं तृतीयेऽहोरात्रं॥ परतश्च
तुर्थे॥ अत्रापि तान्यहानि व्यतिक्रम्येति पोऽसं॥ यत्तु बौधायनः॥ रजस्वला तु संस्पृष्टा ग्राम्यकुक्कुटसूकरैः। श्वभिस्नात्वापि
वेत्तावद्यावच्चंद्रस्य दर्शनमिति॥ चंद्रदर्शनं नक्तमित्यर्थः॥ एतदशक्तायाः चतुर्थदिनविषयं वा॥ रजकादिस्पर्शे तु श्व
स्पर्शसमानमेव॥ तयोः समानत्वादिति शूलपाणिः। यत्तु प्रचेताः। रजस्वला तु संस्पृष्टा शुना चांडालरासभैः॥ पंचरात्रं
निराहारा पंचगव्येन शुध्यतीति तत्कामतोभ्यासे॥ भोजनकाले श्वांत्यजादिस्पर्शे बौधायनः। रजस्वला तु भुंजाना श्वांत्यजा
दिस्पृशेद्यदि॥ गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति। अशक्तौ कांचनं दद्याद्विप्रेभ्यो वापि भोजनं इति। उच्छिष्टयोः प

Indira Gandhi National
Centre for the Arts

मा॰मा॰ रस्परं स्पर्शे त्वत्रिः। उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला। कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन पोषितेति॥ अत्र पूर्वा त्रिष्वे
७१ न ब्राह्मणक्षत्रियवैश्यस्त्रियोऽभिधीयंते। तेन रजस्वलयोः समानजातीययोरुच्छिष्टयोः ब्राह्मणीक्षत्रियावैश्यानां परस्प
रं स्पर्शे प्राजापत्यः। स्नानं त्वस्पर्शे त्वेकैकवृद्धिर्हनीया॥ नादृशाशूद्रयोः स्पर्शे परस्परं तूपवाससहितप्राजापत्यमत्या
म्नायदानेन शुद्धिः। एतच्चकामतः। अकामतस्तदर्धं। शूलपाणिस्तु॥ उच्छिष्टेन चांडालादिना॥ दानेन कृच्छ्रमत्याम्नायेन
एष रजस्वलात्वमेव निमित्तमतो न क्षत्रियवैश्ययोर्ब्राह्मण्यादिभ्यो विशेष इति आह॥ उच्छिष्टद्विजसंस्पर्शे तु मार्कंडेयः
॥ द्विजान्नकथंचिदुच्छिष्टान् रजस्त्री यदि संस्पृशेत्॥ अधोच्छिष्टे त्वहोरात्रं ऊर्ध्वोच्छिष्टे त्र्यहं क्षिपेदिति॥ अत्र यद्यप्यविशे
षः श्रूयते तथापि ब्राह्मण्येवृपाउच्छिष्टक्षत्रियादिस्पर्शे ब्राह्मण्या अधिकं कल्प्यं॥ एवं हीनाया उच्छिष्टोत्तमस्पर्शे न्यूनं॥
भोजनकाले रजस्वलां नरं दृष्ट्वा पुनर्भोजेत्वापस्तंबः॥ उदक्याय दिवा भुंक्ते दृष्ट्वा मां तु रजस्वलां॥ आस्नानकालं नाश्नी
यात्। ब्रह्मकूर्चं ततः पिबेत्॥ एतच्चकामतः। चांडालदर्शने त्वत्रिः॥ रजस्वला तु भुंजाना चांडालं यदि पश्यति उपवासत्रयं एम॰
कुर्यात्प्राजापत्यं तु कामत इति। रजस्वलायाः श्वादिदर्शने व्यासः। रजस्वला यदा दृष्टा शुनाजंबुकरासभैः॥ पंचरात्रं निरा ७१

रं पंचगव्येन शुध्यतीति। रजस्वलाया आशौचिस्पर्शे शातातपः॥ आर्तवाभिप्लुता नारी स्पृशेच्चेच्छवसूतकं ऊर्ध्वं त्रिरात्रं स्ना
तां तां त्रिरात्रमुपवासयेत्॥ स्पृष्टा भोजनादौ त्वत्रिः। आर्तवा — प्लुता नारी॥ मृतसूतकयोः स्पृशेत्। भुक्त्वा पीत्वा चरेत्कृच्छ्रं स्पृष्ट्वा
तु अहमेव वत्विति। आशौचस्पर्शे हारीतः अग्रजो दर्शने मार्कंडेयः। मृतसूतकसंस्पर्शे भुक्तं दृष्ट्वा कथं भवेत्॥ नास्नानकाल
मश्नीयाद्भुक्त्वा चांद्रायणं चरेदिति॥ आस्नानकालपर्यंतं चतुर्थदिनपर्यंतं। मदनरत्ने स्मृत्यंतरे। अमयत्येसमुत्पन्ने मल
वद्वासस्तापदि अभिषेकेण शुद्धिः स्यात् दिनत्रयमभोजनं। अभिषेके शुद्धिः सद्यः स्नानेन भोजनं इदं मरणकायाः॥ बालाप
त्यविषयं वा॥ अन्यस्यास्त्रिरात्रोपवासः। बंधुमरणश्रवणादौ व्यासः। मलवद्वसनापात्र अमायत्यं भवेद्यदि अभिषे
केण शुद्धिः स्यान्नाशनं वा दिनत्रयमिति॥ अत्रापि पूर्ववद्व्यवस्था॥ दिनत्रयमित्यवशिष्टकालोपलक्षणं॥ अमापत्यं
बंधुमरणादिः स एव। आर्तवाभिप्लुता नारी नावगाहेत्कदाचन। उद्धृतेन जलेनैव स्नात्वा शेषं समापयेत्। स्वकं गात्रं भ
वेद्वृद्धिः सांगोपांगमलेर्युतं॥ नवपीडनं कुर्यात् अन्यथा ताम्भवेत्पुनरिति। तथा पराशरः॥ स्नाने नैमित्तिके प्राप्ते नारी य
दि रजस्वलाः॥ पात्रांतरिततोयेन स्नानं कृत्वा व्रतं चरेत्॥ सिक्तगात्रा भवेद्वृद्धिः सांगोपांगा कथंचन॥ नवस्त्रपीडनं कु

Indira Gandhi National
Centre for the Arts

प्रा॰प्रा॰ ९२ र्णात्मद्धात्मश्च धारयेदिति॥ अथ परंपरस्पर्शे तत्राचेतनदंडादिनाव्यवधाने याज्ञवल्क्यः॥ उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुप
स्पृशेत्॥ अब्लिंगानि जपेच्चैव गायत्रीं मनसा सकृदिति। चेतनव्यवधाने तु मानवं। शावं तत्स्पृष्टिनं चैव स्पृष्ट्वा स्नानेन शुध्य
तीति। अशुचिलशुनादिस्पृष्टिस्पर्शेनेन तु शातातपः॥ अशुचिं संस्पृशेद्यस्तु एक एव स दुष्यति। तत्स्पृष्ट्वान्यो न दुष्ये
त सर्वद्रव्येष्वयं विधिरिति। तथा॥ संहतानां पात्राणां यद्येकमुपहन्यते। तस्य तच्छोधनं प्रोक्तं न तु तत्स्पर्शिनामपि। क्वा
चिद्चेतनव्यधानेपि वचनात्प्रायश्चित्ताधिक्यं॥ यथाह। पल्लवः। एकशाखां समारूढश्चांडालादिर्यदा भवेत्। ब्राह्मणस्तत्र
निवसन् स्नानेन शुचितामियात्। आदिशब्दादुदक्यादीनां ग्रहणं॥ शाखाग्रहणमवयवमुपलक्षणमिति प्राग्व्याख्यातं। तथा
स एव। एकवृक्षं समारूढौ चांडालब्राह्मणौ यदि फलं भक्षयतस्तत्र प्रायश्चित्तं कथं भवेत्। ब्राह्मणानामनुज्ञाप्य सवासा जल
माविशेत्। अहोरात्रोषितो भूत्वा पंचगव्येन शुध्यति। तथा स एव॥ एकशाखां समारूढः फलान्यश्नाति यो यदि। प्रायश्चि
त्तं त्रिरात्रं स्यात्पंचगव्यं विशोधनमिति। अत्र व्यवधानसंनिधानाभ्यामेकरात्रत्रिरात्रे। मतिपूर्वे चैतत्॥ अमतिपूर्वे तु एम॰
ब्रह्मपुराणे॥ विप्रश्चंडालसहितो यत्रैकस्मिन्वनस्पतौ॥ अज्ञानात्तु फलं भुक्ते चरेत्तत्राघमर्षणं॥ अत्रापवादमाह प ९२

राशरः॥ रथ्याकर्दमतोयानि नावः पंथास्तृणानि च। स्पर्शनान्न प्रदुष्येत पक्वेष्टकचितानि च॥ अत्र परंपरस्पर्शेपि स्पर्शदोषो
गौणः। तत्र च वचनात्प्रायश्चित्तं॥ स्पर्शप्रायश्चित्तापवादमाह बृहस्पतिः। तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे॥ नगर
ग्रामदाहे च स्पृष्टास्पृष्टिर्न दुष्यतीति। एवमन्यान्यपि उच्चावचनानि व्यवस्थापनीयानि॥ ब्राह्मणस्य चैत्यवृक्षादिस्पर्शेपि परा
शरः॥ चैत्यवृक्षश्चितिर्यूपः श्वंडालः सोमविक्रयी। एतांस्तु ब्राह्मणः स्पृष्ट्वा सवासा जलमाविशेदिति। क्षत्रियादीनां न्यूनं
कल्पनीयं॥ इत्यस्पृश्यस्पर्शप्रायश्चित्तानि॥ अथ श्वादिदंशे। तत्र मनुः। श्वसृगालखरैर्दष्टो ग्राम्यैः क्रव्याद्भिरेव च॥ न
राश्वोष्ट्रवराहैश्च प्राणायामं जले कृत्वा घृतं प्राश्य विशुध्यतीति॥ एतच्च नाभेरधस्ताद्दंशे द्रष्टव्यं॥ यत्तु स मनुः। श्वसृगा
लमृगाजमहिषाजाविखरकरभनकुलमार्जारमूषिकाप्लवककाकपुरुषदष्टानां आपोहिष्ठाभिः स्नानं प्राणायाम
त्रयं चेति एतच्च पादयोः किंचिदधिकदंशे॥ यत्तु गर्गदेवलः। विषाणिदंष्ट्रिश्वसृगालविड्वराहखरनरवानरवायसदष्ट
स्त्रीभिर्दष्टः स्रवंतीमासाद्य षोडश प्राणायामान्कुर्यादिति। एतदपि ततोधिकदंशे नाभेरूर्ध्वदंशे तु बौधायनः॥ शुनाद
ष्टस्तु यो विप्रो नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति॥ नाभेरधस्तादितिगाढदंशविषयं वा॥

Indira Gandhi National Centre for the Arts

एतस्मिन्नेव विषये देवलः। श्वदष्टस्तागरणायां नद्यां स्नातो निराहारः प्राणायामशतमावर्त्तयं त्रिरात्रादपगतया प्याभवतीति॥
प्रा॰मा॰ तन्नाभेरूर्ध्वगाढदंशे। अत्रैव शंखः॥ नीलीकाष्ठहतो विप्रः शुनादष्टस्तथैव च॥ त्रिरात्रं तु व्रतं कुर्यात् पुंश्चलीदशनक्षत
९३ इति। यमोपि। श्वशृगालशूकरखरोष्ट्रश्ववानरकुंजरैः॥ एतैस्तु ब्राह्मणो दष्टस्त्रिरक्तः समुपस्पृशेत्। हविष्यं भोजयेदन्नं
ब्राह्मणान्सप्त पंच चेति ब्रह्मचार्यधिकारे हारीतः। शुनादष्टश्चाहमकाहारः समुद्रगां नदीं गत्वा प्राणायामशतं कृत्वा घृतं
म प्राश्य ततः शुचिरेवमेव गोमायुमार्जारनकुलमूषकैर्दष्टानां॥ ब्रह्मचार्यधिकारे पैठीनसिरपि। शुनादष्टस्त्रिरात्रमुप
वासो विप्रगृहे वा सम्यक्॥ यत्तु शातातपः। गवां शृंगोदकस्नातः शुनादष्टस्तु ब्राह्मणः। समुद्रदर्शनाद्वापि शुनादष्टः शुचिर्भ
वेत्। वेदविद्याव्रतस्नातः शुनादष्टस्तु वै द्विजः॥ हिरण्योदकमिश्रं च घृतं प्राश्य विशुध्यति। तन्नाभेरधस्ताद्विषदष्टविष
यं॥ वचनाद्विशिष्टब्राह्मणमात्रविषयं वा। समुद्रदर्शनं तत्तीरवासिनां॥ व्रतस्थस्य विशेषमाह बौधायनः। व्रतस्थस्तु शु
नादष्टस्त्रिरात्रमुपवासयेत्। सघृतं पावकं पीत्वा व्रतशेषं समापयेत्। यत्तु शातातपः। अव्रतः सव्रतो वापि शुनाद ला॰
ष्टो भवेद्विजः॥ हिरण्योदकमिश्रं तु घृतं प्राश्य विशुध्यतीति। तदल्पं ताशक्तविषयं॥ ब्राह्मणरहितग्रामे तु पराशरः। अ ९३

सब्राह्मणके ग्रामे शुनादष्टो द्विजोत्तमः। वृषं प्रदक्षिणीकृत्य सद्यः स्नात्वा शुचिर्भवेत्। स्त्रीणां विशेषमाह पराशरः। ब्राह्म
णी तु शुनादष्टा जंबूकेन वृकेण वा। उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत्। बौधायनोपि। ब्राह्मणी तु शुनादष्टा सोमे
दृष्टिं निपातयेत्। नक्षत्रदर्शनाद्वापि शुनादष्टा शुचिर्भवेत्। कृष्णपक्षे यदा सोमो न दृश्येत कदाचन॥ यां दिशं व्रज
ते सोमस्तां दिशं त्ववलोकयेदिति। अंगिरसा त्वत्र पंचगव्यप्राशनमप्युक्तं॥ ब्राह्मणी तु शुनादष्टा सोमे दृष्टिं निपातयेत्। य
दा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत्। यां दिशं तु गतः सोमस्तां दिशं चावलोकयेत्॥ सोममार्गेण सा याता पंचगव्येन शु
ध्यतीति॥ ब्राह्मणीग्रहणमुपलक्षणं॥ व्रतस्थस्त्रीविषये पराशरः॥ त्रिरात्रं चोपवसेच्छुनादष्टा तु सव्रता। सघृतं पावकं
पीत्वा व्रतशेषं समाचरेत्॥ रजस्वलायां विशेषमाह पुलस्त्यः। रजस्वला यदा दष्टा शुना जंबूकरासभैः। पंचरात्रं निरा
हारा पंचगव्येन शुध्यति। ऊर्ध्वं तु द्विगुणं नाभेर्वक्त्रे तु त्रिगुणं तथा॥ चतुर्गुणं स्मृतं मूर्ध्नि दृष्टेऽन्यत्राशुचिर्भवेदिति। अ
सत्र रजस्वलावस्थाया इति शेषः। शुनाघ्रातादिषु शातातपः। शुनाघ्रातावलीढस्य नखैर्विलिखितस्य च॥ अद्भिः प्रक्षाल
नं शौचमग्निना चोपचूलनमिति। उपचूलनं तापनं॥ व्रणे कृमिमुत्पत्तौ तु बौधायनः॥ ब्राह्मणस्य व्रणद्वारे पूयशोणि

Indira Gandhi National Centre for the Arts

प्रा॰मा॰ ९४

तसंभवे॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥ अहं स्नात्वा च पीत्वा
च कृमिदष्टः शुचिर्भवेत्॥ इति। एतच्चानाभेरधस्ताज्ज्ञेयं। मनुरपि। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे॥ कृमिरुत्प
द्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत्॥ त्रिरात्रं पंचगव्याशी त्वधो नाभेर्विशुध्यति॥
नाभिकंठांतरोद्भूते व्रणे चोत्पद्यते कृमि। षड्रात्रं तु तदा प्रोक्तं प्राजापत्यं शिरोव्रणे इति। यत्तु शातातपः॥ ब्राह्मणस्य
व्रणद्वारे यदा संपद्यते कृमिः॥ प्रायश्चित्तं तदा कार्यमिति शातातपोऽब्रवीत्। गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकं॥
स्नात्वा पीत्वा च कृत्वा च कृमिदुष्टः शुचिर्भवेदिति॥ तदीषद्दुष्टविषयं॥ पराशरेण तु वर्णभेदेन प्रायश्चित्तविशेष उक्तः
। ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे॥ कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत्॥ गवां मूत्रपुरीषेण दधिक्षीरे
ण सर्पिषा॥ अहं स्नात्वा च पीत्वा च कृमिदष्टः शुचिर्भवेत्॥ क्षत्रियोपि सुवर्णस्य पंचमाषान् प्रदापयेत्॥ गोदक्षि
णां तु वैश्यस्याप्युपवासं विनिर्दिशेत्॥ शूद्राणां नोपवासः स्याच्छूद्रो दानेन शुध्यतीति॥ स्नानं पानं च पंचगव्येनैव॥ दा एम॰
नं गोदानं॥ एतदपि नाभेरधस्ताज्ज्ञेयं॥ नाभेरुपरि विशेष उक्तो भविष्यत्पुराणे॥ ब्राह्मणस्य व्रणद्वारे पूयशोणि ९४

तसंभवे॥ कृमिरुत्पद्यते यस्य निष्कृतिं वद विप्र सत्तु॥ गवां मूत्रपुरीषेण त्रिसंध्यं स्नानमाचरेत् दधि क्षीरं घृतं प्राश्य त्रि
रात्रेण विशुध्यति॥ अधो नाभेः प्रदिष्टस्य आ पादाद्विनतात्मज॥ एतद्विनिर्दिष्टो त्वाद्यः प्रायश्चित्तं खगाधिप। नाभिकंठां
तरे वीर यदा चोत्पद्यते कृमिः। षड्रात्रं तु तदा प्रोक्तं प्रायश्चित्तं मनीषिभिः॥ ॥इति संसर्गप्रायश्चित्तं॥ अथोपपातकेषु प्रा
यश्चित्तानि। तान्याह याज्ञवल्क्यः। गोवधो व्रात्यता स्तेयमृणानां चानपक्रिया॥ अनाहिताग्निता पण्यविक्रयः परि
वेदनं॥ भृताद्ध्ययनादानं भृतकाध्यापनं तथा॥ पारदार्यं पारिवित्यं वार्धुष्यं लवणक्रिया॥ स्त्रीशूद्रविट्क्षत्रवधो
निंदितार्थोपजीवनं॥ नास्तिक्यं व्रतलोपश्च सुतानां चैव विक्रयः। धान्यकुप्यपशुस्तेयमयाज्यानां च याजनं॥ पितृमातृ
सुतत्यागस्तडागारामविक्रयः॥ कन्यासंदूषणं चैव परिविंदकयाजनं॥ कन्याप्रदानं तस्यैव कौटिल्यं व्रतलोपनं॥ आ
त्मनोर्थे क्रियारंभो मद्यपस्त्रीनिषेवणं। स्वाध्यायाग्निसुतत्यागो बांधवत्याग एव च। इंधनार्थं द्रुमच्छेदः स्त्रीहिंसौ
षधिजीवनं। हिंस्रयंत्रविधानं च व्यसनान्यात्मविक्रयः। शूद्रप्रेष्यं हीनसख्यं हीनयोनिनिषेवणं॥ तथैवानाश्रमे
वासः परान्नपरिपुष्टता। असच्छास्त्राधिगमनमाकरेष्वधिकारिता॥ भार्याया विक्रयश्चैषामेकैकमुपपातकमिति

Indira Gandhi National Centre for the Arts

प्रा॰मा॰ तत्रगोवधेउक्तंवधप्रायश्चित्तप्रसंगेन॥तत्रत्यान्येमानवानित्रैमासिकादीनियाज्ञवल्कीयानि।चंचांद्रायणादिनिचवर्त्तमानेषु
९५ व्रात्यतादिष्वपिविशेषविहितैःप्रायश्चित्तैःसहतुल्यविकल्पतयाव्यवस्थयावायोज्यानि।नचविशेषविहितैःसामान्यविहि
तानांबाधः।उपपातकसंज्ञानर्थक्यापत्तेः।सामान्यप्रायश्चित्तप्रवृत्तेर्बहिःसार्थवतीनान्यथा॥प्रयोजनांतराभावात्॥अ
तएवयाज्ञवल्क्यः।उपपातकशुद्धिःस्यादेवंचांद्रायणेनवा॥पयसावापिमासेनपराकेणाथवापुनरिति॥मनुश्च॥एतदे
वव्रतंकुर्युरुपपातकिनोद्विजाः अवकीर्णिवर्ज्यंशुध्यर्थंचांद्रायणमथापिवेति।एतदेवत्रैमासिकं॥अवकीर्णिपर्युदा
सादेवोक्तानुक्तप्रायश्चित्तेष्वेतत्प्राप्निर्गम्यते॥अथव्रात्यतायाः।याज्ञवल्क्यः।आषोडशाद्द्वाविंशाच्चतुर्विंशाच्चवत्सरा
त्॥ब्रह्मक्षत्रविशांकालऔपनायनिकःपरइति॥अत्रसावित्रीपतितापस्तद्दशवर्षाणिपिचच॥सशिखंवपनंकृत्वा
व्रतंकुर्यात्समाहितः।एकविंशतिरात्रंचपिबेत्प्रसृतिपावकं॥हविषाभोजयेच्चैवब्राह्मणान्सप्तपंच च॥ततोयावकमु
द्धृत्यतस्योपनयनंस्मृतमितिव्यासोक्तेःषोडशादिसाङ्मर्यादायां।नातिव्याप्तेः॥द्वाविंशाच्चतुर्विंशाच्चेत्यत्रापितद एम॰
र्थकएवानुषज्यते॥तेनपंचदशैकविंशतित्रयोविंशतिवर्षसमाप्त्युत्तरमेवविप्रक्षत्रियविशांक्रमात्पातित्यमिति॥ ९५

याज्ञवल्क्यः॥अतऊर्ध्वंपतंत्येतेसर्वधर्मबहिष्कृताः॥सावित्रीपतिताव्रात्याव्रात्यस्तोमादृतेक्रतोरिति।अशक्तस्यमनुः॥
येषांद्विजानांसावित्रीनानूच्येतयथाविधि॥तांश्चारयित्वात्रीन्कृच्छ्रान्यथाविध्युपनाययेदिति।उपनेत्रभावकृतव्रात्यता
यांतुपूर्वोक्तमेकविंशतिरात्रंउपनेतृसत्त्वेकामतःपंचदशावर्षातिक्रमेवसिष्ठआह॥पतितसावित्रीकउद्दालकव्रतंच
रेत्।द्वौमासौयावकेनवर्त्तयेन्मासंपयसार्द्धमासमामिक्षयाष्टरात्रंघृतेनषड्रात्रमयाचितंत्रिरात्रमब्भ
क्षः॥अहोरात्रमुपवसेदिति।यत्त्वापस्तंबः॥अतिक्रांतेसावित्र्याःकालऋतुंत्रैविद्यकंब्रह्मचर्यंचरेदथोपनय
नंततःसंवत्सरमुदकोपस्पर्शनमथाध्याप्यइति॥ऋतुंमासद्वयंत्रैविद्यकंब्रह्मवेदत्रयाचार्यभैक्ष्याशनगुरुशुश्रूष
णादिकं॥तदुद्दालकव्रताशक्तस्य।सएव।यस्यपितापितामहइत्यनुपनीतौस्यातांतेब्रह्महसंस्तुतास्तेषांगमनंभोजनं
विवाहमितिवर्जयेत्तेषामिच्छतांप्रायश्चित्तंयथाप्रथमेतिक्रमेणऋतुमेवसंवत्सरमथोपनयनंततउदकोपस्पर्शनेप्रति
पुरुषंसंख्यायसंवत्सरान्यावंतोनुपनीतास्युःसप्तभिःपावमानीभिर्यदंतिपच्चदूरकइत्येताभिर्यजुःपवित्रेणसामपवित्रे
णांगिरसेनेत्यपिवाव्याहृतिभिरेववासोध्याप्योथयस्यप्रपितामहादीनांनस्मर्यतउपनयनंश्मशानसंस्तुतास्तेषांगम्या

Indira Gandhi National
Centre for the Arts

गमनं भोजनं विवाहमिति वर्जयेत्तेषामिष्टं तां प्रायश्चित्तं द्वादशवर्षाणि चैव विधकं॥ ब्रह्मचर्यं चरेदथोपनयनं ततउदको

प्रा॰ मा॰ पस्पर्शनं पावनमान्यादिभिरथा गृहमेधोपदेशनं नाध्यापनं तयोर्निवर्तते तस्य संस्कारो यथा प्रथमेतिक्रमे तत ऊर्ध्वं प्रकृ

९६ तिवद्ब्रह्महसंस्कृताः ब्रह्महनाष्ट्र वाच्याः॥ यथा प्रथमेतिक्रमं क्रतुमेवं संवत्सरमिति॥ प्रथमातिक्रमवद्दनुस्थाने

संवत्सरस्थाने प्रतिपुरुषमष्टं ब्रह्मचर्यं॥ उपनयनानन्तरं यावंतोनुपनीताः पुरुषास्तावत्संख्याकवर्षपर्यंतं प्रत्यहमेभि

र्मंत्रैः प्रायश्चित्तार्थं स्नानं कार्यं॥ मंत्रास्तु॥ पदंतियच्चेतिसप्त॥ पावनान्योयेनदेवाः पवित्रेणेति। यत्तपवित्रं। कपानइ

तिसामपवित्रं॥ हंसः शुचिषदित्यंगिरसं॥ श्मशानसंस्कृताः श्मशानवन्निरसनीयाः द्वादशाष्टं ब्रह्मचर्यं कार्यं। उद

कोपस्पर्शनं तु पुरुषसंख्याघ्नमियावत्॥ मंत्रास्त एव। गृहमेधोगार्हस्थ्यं तेषामध्यापनं नास्ति। ततउत्पन्नस्य प्रकृति

वत्॥ यथाकालोपनयनमिति॥ ॥ इति व्रात्यता॥ अव्रणानरणकरणे। तच्च चतुर्विधं॥ परद्वयं ऋणत्वेन गृहीत्वा

तस्याप्रदानं॥ तथा जायमानो वै ब्राह्मणस्त्रिभिरृणवाजायतेयज्ञेन देवेभ्यः प्रजया पितृभ्यो ब्रह्मचर्येणऋषिभ्य एम॰ ९६

इति। यज्ञेनेतिमत्यधिकारे। मनुः। इष्टिं वैश्वानरीं चैव निर्वपेदष्टपर्यये॥ क्लृप्तानां पशुयज्ञानां निष्कृत्यर्थमसंभव

---

इति॥ अष्टपर्ययेसंवत्सरान्ते। क्लृप्तानां प्रारब्धानामिति केचित्॥ नित्यतया क्लृप्तानामिति तु युक्तं॥ प्रजापतिः समांते

सोमयज्ञानां हानौ चांद्रायणं चरेत् इति। तथा चाधिकारोत्तरं॥ वर्षाणानयाकामाकामयो हैमासिकचांद्रायणादीनि

पोन्यानि अतश्च प्रतिसंवत्सरं सोमः पशुमत्स्यनं तथा॥ कर्त्तव्याग्रयणेष्टिश्च चातुर्मास्यानि चैव हि। एषामसंभवे कु

र्यादिष्टिं वैश्वानरीं द्विज इति याज्ञवल्कीयमपि सोमादेर्द्वितीयादिवर्षेष्वननुष्ठाने वेदितव्यं॥ अथानाहिताग्निता यां॥

तच्चसत्यधिकारे आधानाभावे वेदितव्यं॥ तत्रानाहिताग्नेः संवत्सरादूर्ध्वमापदियाज्ञवल्क्यायमुपयातकसामान्ये व्र

तचतुष्टयं वर्णानुक्रम्यापि पेत्रयायोज्यं॥ अनापदि तु तत्रैव मानवं त्रैमासिकं॥ अर्वाक् तु संवत्सरात्॥ काम्यज्ञिनिरहं॥

कालेत्वाधायकर्माणि कुर्याद्विष्णोर्विधानतः॥ तदकुर्वस्त्रिरात्रेण मासिमासि विशुध्यति। कालइत्यधिकारोपलक्षणं॥

तदाधानं॥ स एव॥ अनाहिताग्नौ पित्रादेयस्य माणः स्तोयदि॥ सहिव्रात्येन पशुनायजेतं त्रिस्त्रयायतु। पह

माण आधाता यष्टा वेति स्मृत्यर्थसारे॥ वात्येन क्षिपमाणो व्रात्येन निमित्तेन वा विहितः पशुरिति। वैय्यधिकरणे प

नान्वयः॥ अत्र व्रात्यो यथाकालानुपनीतो नगृह्यते तत्र व्रात्यस्तोमाख्यसोमयागविशेषस्यैव विधानात्॥ किं

Indira Gandhi National
Centre for the Arts

प्रा॰प्राः तुयस्यपितापितामहोवासोमंनपिबेत्सब्रात्यइतिवाक्योक्तोग्न्यत्येते॥तस्यैवब्रात्यपत्रोर्विधानात्॥तथाचश्रुतिः॥
९७ यस्यपितापितामहःसोमंनपिबेद्व्यपिपासेत्सऐन्द्राग्नंपुनरुत्सृष्टमालभेतेति॥आवसथ्याधानेपिविशेषमाह॥
कार्ष्णाजिनिः॥कृतदारोगृहेज्येष्ठेयोनादध्यात्तुपासनंचान्द्रायणंचरेद्वर्षप्रतिमासमहोपिवेति॥ज्येष्ठेग्रहणात्त
स्मिन्नकृतावसथ्याधानेकनिष्ठस्यानधिकारः॥ज्येष्ठेपिपितर्यकृतावस—ध्यानेसतिनादध्यात्॥पितुःसत्त्वप्य
नुज्ञानेनादधीतकथंचनेत्यस्यस्मार्ताधानेपिप्रवृत्त्यविशेषात्॥तथाज्येष्ठग्रहणात्कनिष्ठःकृतदारोपिगृह
पत्निमहरणाद्विभागाद्वाप्रागनधिकारित्वात्प्रायश्चित्तीयतइतिसिद्धं॥इदंचप्रायश्चित्तंआवसथ्याधानंदारका
लेदायाद्यकालेप्रेतेवागृहपतावितिकात्यायनाद्युक्तकालत्रयातिक्रमेद्रष्टव्यं॥ ॥अथाविक्रेयविक्रयेप्रायश्चि
त्तानि॥ ॥शंखलिखितौ॥ ॥नविक्रीणीयाद्विक्रेयाणितिलतैलदधिक्षौद्रलवणलाक्षामद्यमांसकृतान्नस्त्रीपुरुषह ला३
स्त्यश्ववृषगंधरसक्षौमकृष्णाजिनसोमोदकनीलीविक्रयात्सद्यःपतति॥ब्राह्मणइत्युपक्रम्यसंवत्सरंतप्तकृच्छ्र एम॰
माचरेदिति॥हारीतः॥गुडतिलपुष्पमूलफलपक्वान्नविक्रयेसोमापनं॥लाक्षालवणमधुमांसतैलक्षीरदधिघृ ९७

तगंधचर्मदाससामन्यतमविक्रयेचान्द्रायणं॥तथोर्णाकेशिकेसरिश्मधेनुवेत्रमाश्मत्रास्त्रविक्रयेच॥मत्स्यमांसस्नाय
स्थिशृंगनखशुक्तिविक्रयेतप्तकृच्छ्रं॥हिंगुगुग्गुलुहरितालमनःशिलांजनगैरिकक्षारलवणमणिमुक्ताप्रवालवेणव
वेणमन्यथेषुच॥आरामतडागोदपानपुष्करिणीकृतविक्रयेत्रिषवणस्नाय्यधःशायीचतुर्थकालाहारोद्वा
सहस्रंजपन्गायत्रीसंवत्सरेणशुद्धोभवति॥हीनमानोन्मानसंकरव्याजद्रव्यसंकीर्णविक्रयेचेति॥पराशरः॥वि
क्रीयकन्यकांगांचकृच्छ्रंसांतपनंचरेदितिचतुर्विंशतिमते॥गुणयाविक्रयंकृत्वाचरेत्सौम्यचतुष्टयं॥लाक्षालवण
मांसानांचरेच्चान्द्रायणत्रयं॥मध्वाज्यतैलसोमानांचरेच्चान्द्रायणद्वयं॥पयःपायसपूपानांचरेच्चान्द्रायणव्रतं॥दध्नश्चे
क्षुरसस्यैवगुडखंडादिविक्रये॥सर्वेषांस्नेहपक्वानांपराकंतुसमाचरेत्॥कदलीनारिकेरंचनारिंगंबीजपूरकं॥एतेषां
पादकृच्छ्रंस्यात्कुंबीरादेस्तथैवच॥कस्तूरिकादिगंधानांविक्रयेकृच्छ्रमाचरेत्॥कर्पूरादेस्तदर्धस्याद्दिनंहिंग्वादिविक्रये॥
तिलानांविक्रयंकृत्वाप्राजापत्यंसमाचरेत्॥धर्मार्थंक्रिमिजातानांयज्ञार्थंविक्रयंनयेत्॥एकपीतादिवस्त्राणिकृत्वा
जिनमथापिच॥विक्रयेस्महमेतेषांगार्ग्यस्यवचनंयथा॥गोविक्रयंनरःकृत्वालोभार्थंधनमोहितः॥प्राजापत्यंप्रकुर्वीत

Indira Gandhi National
Centre for the Arts

प्रा॰प्रा॰ ९८ गन्धानामेवं द्रव्यस्य तं॥ लवणस्याश्वतरणां च करभाणां च विक्रये॥ पराकं तत्र कुर्वीत सुतानां द्विगुणं चरेत्। नारीणां विक्रयं कृ
त्वा चरेच्चांद्रायणव्रतं॥ द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिणः॥ चांद्रायणं प्रकुर्वीत एकाहाद्देर्विक्रये॥ अंगानां तु पराकः
स्यात्स्मृतीनां कृच्छ्रमाचरेत्॥ इतिहासपुराणानां चरेत्सांतपनं द्विजः। रहस्यपंचरात्राणां कृच्छ्रमेव समाचरेत्॥ अंगानां नी
तिशास्त्राणां प्राकृतानां तथैव च। सर्वेषामेव विद्यानां पादकृच्छ्रं समाचरेदिति। यवनः। दधिमधुपिष्टसर्पिःपक्वान्नतैलत
क्रक्षीररसविषशस्त्रतिलाश्वनीलीकौशेयवासोलाक्षारक्तलवणविक्रये॥ प्राजापत्यं चरेत् शातातपः॥ आममांससुरासो
मलाक्षालवणसर्पिषां॥ विक्रये सर्वपण्यानां द्विजश्चांद्रायणं चरेत्॥ विष्णुः। रक्तवस्त्ररंगरत्नगुडगंधमधुरसोर्णाविक्र
यी त्रिरात्रमुपवसेत्॥ प्राणिभूःपण्यसोमविक्रयी तप्तकृच्छ्रं कुर्यात्॥ तं च भूपश्चोपनयेत्॥ शंखः। धारयित्वा तुलां च
क्षां विषमां कारयन्वणिक्॥ एतांल्लवणमद्यानां कृत्वा क्षारस्य विक्रयं। लाक्षायाश्चैव मांसस्य कुर्यादेवमहाव्रतं॥
विक्रीतानां प्राणिनामष्टं हिलस्य च तथा चरेदिति। महाव्रतं द्वादशाब्दं भूयोभ्यासविषयमेतत्॥ पैठीनसिः॥ अथा प्र॰
विक्रेयाणि॥ ब्राह्मणस्य लवणं पक्वान्नं मधु क्षीरं दधि घृतं मुद्रकं सर्वगंधास्तिला रक्तं वासो गुडं तैलं ग्राम्यपशूनामे ९८

९९
कशफकेशानिश्च सर्वे चारण्याः पशवोऽपि विद्यां गावः शंखश्चोर्णा चेति विक्रयणे नैकेकेषामेकैकस्मिन् प्राजापत्यं चरे
दिति॥ स एव॥ आरामतडागोदपानं पुष्करिणीस्कृत सोमविक्रये त्रिषवणस्नाय्यधःशायी चतुर्थकालाहारः संवत्स
रेण पूतो भवतीति॥ सुमंतुः॥ देवर्षिसोमचैत्यान्यापत्सु कूपोदपादनात्मनां विक्रये कृच्छ्रत्रयं चरेदिति। देवषीति प्रतिमा
भिप्रायेण भविष्यपुराणे॥ गुडं तिलान्सत्यान्नीलीकेशागोधूमशाल्यकाः विक्रयी ब्राह्मणो गां च कृच्छ्रं सांतपनं चरेदिति
गोविक्रये निर्दार्य वा रमाह यमः॥ गवां विक्रयकारी तु गविरोमाणि यानि तु॥ तावद्वर्षसहस्राणि गवां गोष्ठे क्रिमिर्भवे
दिति। एतानि चलघुगुरुप्रायश्चित्तानि कामाकामसकृदसकृत्त्वाद्यपेक्षया योजनीयानि॥ इदं च सर्वं प्रायश्चित्तजातं स्वापद्वि
षयं हत्वा जीवतो ब्राह्मणस्यैव॥ इतरेषां त्वापदि न दोषः॥ वैश्यवृत्त्यानविक्रेयं ब्राह्मणस्य पयो दधीति नारदोक्तेरिति मिता
क्षरया। यद्यत्र च निषेधस्तत्रैव प्रायश्चित्तविधयः। अत एव क्वचित् क्वचित् प्रायश्चित्तविधौ ब्राह्मणग्रहणं कृतं॥ शू
लपाणिस्त्वापदि शूद्रस्यैव दोषाभावमाह॥ तथा च पराशरः। लवणं मधु मद्यं वा दधि तक्रं घृतं पयः। न दुष्येच्छूद्रजाती
नां कुर्यात्सर्वेषु विक्रयं॥ कालिकापुराणेऽपि। विक्रयं सर्ववस्तूनां कुर्वन् शूद्रो न दोषभाक्। मधुचर्मसुरालाक्षामांसक्षा

Indira Gandhi National Centre for the Arts

प्रा॰ मा॰ ९९

मांसं च पंचममिति। तन्न॥ अनयोर्वाक्ययोरापद्विषयत्वे प्रमाणाभावात्। न च निषेधानामापदि ब्राह्मणमात्रविषयत्वात् शूद्रे
प्रतिप्रसवानुपपत्तिरिति वाच्यं॥ शूद्रस्य द्विजशुश्रूषेति नियमेनोपायांतराणां व्यावर्तितत्वात्। अत एव शूद्रस्यानापद्य
पि मद्यादिपंचमव्यतिरिक्तानि विक्रेयाणि॥ क्षत्रियवैश्ययोस्तु नापदि शूद्रवत्प्रतिप्रसवाभावात् सर्वाण्यविक्रेयाणि। आ
पदि तु न दोषः॥ निषेधानां प्रायश्चित्तानां च ब्राह्मणमात्रविषयत्वोक्तेः। ब्राह्मणानामेव त्वापदि वैश्यवृत्त्यावस्थानां दोष
इति निष्कर्षः॥ इदं च प्रायश्चित्तजातं॥ अपण्यविक्रयार्जितधनपरित्यागपूर्वकं कार्यमित्याह मनुः। यद्गर्हितेनार्जयंति
कर्मणा ब्राह्मणा धनं॥ तस्योत्सर्गेण शुध्यंति जप्येन तपसैव चेति॥ अत्र जपतपसोर्विकल्पः। उत्सर्गस्य तूभयत्र समुच्चय
इति। मनुः। काममुत्पाद्य कृष्यां तु स्वयमेव कृषीवलः॥ विक्रीणीत तिलान् शुद्धान् धर्मार्थमचिरस्थितान्। कृष्यादिग्र
हणं नियमार्थं। तेन क्रीतानां तिलानां विक्रये दोष एव॥ इत्यपण्यविक्रये॥ भृतकाध्यापकभृतकाध्यापितयोश्च प्र
वैतत्व्रतानि देशकालशक्त्यपेक्षया योज्यानि॥ अशक्तस्य विष्णुरह॥ भृतकाध्यापनं कृत्वा भृतकाध्यापितस्तथा॥ प्रा॰
ब्राह्मीं सुवर्चलामिति शेषः॥ अधीयानस्य विप्रादेर्लिरस्कारेणानु ९९
अनुयोगप्रदानेन त्रीन् पक्षान् नियतः पिबेदिति॥

पोग इति मिताक्षरायां। सुतानां विक्रये षष्ठीनसिः। सुतविक्रये त्रिषवणस्नाप्यधःशायी चतुर्थकालाहारः संवत्सरेण प्र
तो भवति॥ इदमेकपुत्रस्य कामतो नापदि॥ इदमेकपुत्रस्य कामतो नापदि॥ सुतविक्रयं कृत्वा तप्तकृच्छ्रं चरेदिति शंखो
क्तं त्वापद्यनेकपुत्रस्याकामतो ज्ञेयं॥ अत्रैवाकामतो देवर्षिसोमचैत्यात्राप त्यकूपोदपानदारत्मनां विक्रये कृच्छ्रद्वयमि
ति सोमं तवं॥ कामतोऽनेकपुत्रस्यानापदि कन्यापुत्रादिविक्रये तु चतुर्विंशतिमते॥ नारीणां विक्रयं कृत्वा चरेच्चांद्रायण
व्रतं॥ द्विगुणं पुरुषस्यैव व्रतमाहुर्मनीषिण इति॥ आपद्यकामतः कन्याविक्रये तु। विक्रीय कन्यकां गां च कृच्छ्रं सांतपनं
चरेदिति॥ हृद्रूपरशरोक्तं॥ ॥इत्यपत्यविक्रये॥ अथापाङ्क्त्यपाजने॥ मनु। व्रात्यानां याजनं कृत्वा परेषामंत्यकर्म च॥
अभिचारमहीनं च त्रिभिः कृच्छ्रैर्व्यपोहति॥ परेषां शूद्रादीनां अंत्यकर्मौर्ध्वदेहिकं॥ यद्वा परेषामसपिंडानां स्वजातीयानामे
वास्मिन्पक्षे आहत्वावेतस्प्रायश्चित्तं॥ अत्र चैनैकस्यैव कृच्छ्रस्याभ्यासः संख्यायाः पृथक्त्वनिवेशित्वात्॥ तेन भिन्नास्त्रयः
कृच्छ्राः कार्याः॥ तेन प्राजापत्यसांतपनातिकृच्छ्राख्या इति शूलपाणिः। तेषां च गुरुलघुभूतानां त्रित्वं निमित्तगौरवलाघ
वापेक्षया योज्यं। अहीनो द्विरात्रादिद्वादशाहपर्यंतोऽहर्गणयागः। एतच्चाकामतः उपपातकसामान्यप्रायश्चित्तापवाद

Indira Gandhi National
Centre for the Arts

र्थे॥ व्रात्यस्य कामतो याजने तु शातातपः। पतितवित्री कान्नोपनयेन्नाध्यापयेद्य एतानुपनयेद्याजयेद्वा स उद्दालकव्रतं च
रेदिति। उद्दालकव्रतं तु व्रात्यताप्रायश्चित्ते उक्तं॥ यत्तु पैठीनसिः। शूद्रयाजकः सर्वद्रव्यत्यागात्पूतो भवति॥ माषण्यामस
हस्रेषु दशाकृत्वोऽभ्यस्तेष्विति तदकामतोऽभ्यासविषयं॥ अत्रैव कामतोऽभ्यासे तु शूद्रयाजकादीन पठित्वोशना आह॥ ए
ते पंच तपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः॥ क्रमेण ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नीयुरिति॥ यत्तु यमः।
पुरोधाः शूद्रवर्णस्य ब्राह्मणो यः प्रवर्त्तते। लोभादर्थप्रसंगाद्वा तस्य कृच्छ्रो विशोधनमिति। तदकामतोऽशक्तविषयं॥ चं
डालादिसंनिधौ श्रुत्यादीनामकामतः। पाठे तु षट्॥ त्रिंशन्मते। चंडालश्रोत्रावकाशे श्रुतिस्मृतिपठित्वैकरात्रमिति॥
यत्तु वासिष्ठः॥ पतितचंडालशावश्रवणे त्रिरात्रं वाग्यता अनश्नंत आसीरन् सहस्रपरमं वा तदभ्यसंतः॥ पूता भवंतीति
विज्ञापत इत्यनेनैव गर्हितं॥ ध्यापकयाजकाभ्याख्यानादक्षिणात्यागाद्वा पूता भवंतीति तद्बुद्धिपूर्वविषयमिति विज्ञाने
श्वरः॥ ॥इत्ययाज्ययाजनं॥ ॥पितृमातृसुताचार्यभार्यात्यागस्य॥ अकारणे परित्यक्ता मातापित्रोर्गुरोस्तथेत्यपांक्ते प्रा०
यमध्ये पाठः। तत्र प्रायश्चित्तमाह मनुः॥ षष्ठान्नकालतामासं संहिताजपएहि॥ होमश्च शाकलो नित्यमपाङ्क्तानां विशो १००
व

धनमिति॥ शाकलोपदेवादेवहेलनमि-दिमंत्रकरणकः॥ अथ कन्यादूषणे शंख आह॥ कन्यादूषी सोमविक्रयी च कृच्छ्रमब्दं च
रेयातामिति। हारीतोपि। कन्यादूषीत्याद्युपक्रम्य एते पंच तपोऽभ्रावकाशजलशयनान्यनुतिष्ठेयुः ग्रीष्मवर्षाहेमंतेषु मासं गोमू
त्रयावकमश्नीयुरिति॥ शूद्रस्य तु प्रातिलोम्येन कन्यादूषणे वध एव॥ दूषणे तु करच्छेद उत्तमायां वधस्तथेति वचनात्॥ ॥इति
कन्यादूषणं॥ ॥अथाग्नित्यागे॥ ॥मनुः॥ अग्निहोत्र्यपविध्याग्नीन्ब्राह्मणः कामकारतः। चांद्रायणं चरेन्मासं वीरहत्यासमं
हि यत्॥ अपविध्य त्यक्त्वा। वीरो यजमानः॥ मासमपविध्येत्यन्वयः। इदं च कामतः। यत्तु हारीतः॥ संवत्सरोत्सन्नेऽग्निहोत्रे चांद्राय
णं कृत्वा पुनराद्ध्यात् द्विवर्षोत्सन्ने सोमायनं चांद्रायणं कुर्यात्। त्रिवर्षोत्सन्ने संवत्सरं कृच्छ्रमभ्यस्य पुनराद्ध्यादिति तदका
मेन्हेयं॥ शंखस्तु त्रिवर्षोत्सादे गोदानमप्यधिकमाह। अग्न्युत्सादी संवत्सरं प्राजापत्यं चरेद्गां च दद्यादिति॥ विहक्ररपि। वेतान्ता
दाग्निषवणस्नानप्यधः शायी संवत्सरं भैक्ष्येण वर्त्तयेदिति कामतस्त्वेतान्येव स्वस्वविषये द्विगुणानि॥ वसिष्ठः। योऽग्नीनपविध्ये
त्स कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेदिति व्याघ्रः॥ मासद्वयं तु यो वह्निं त्यजेदेवं समाचरेत्॥ नास्तिक्यात्कृच्छ्रमेकं तु
होमद्रव्यं ददाति च॥ होमद्रव्यं यावत्कालं होमो न कृतस्तावद्धोमपर्याप्तं॥ तथा च भरद्वाजगृह्ये॥ यावत्कालमहोमास्तान्

Indira Gandhi National
Centre for the Arts

वद्व्यमशेषतः। न दानं चैव विप्रेभ्यो यथा होमस्तथैव चेति। जातूकर्ण्योपि। अनातकालं तु कुर्यादग्नौ विप्राय वा स्वयं॥ दद्या
प्रा॰मा॰ द्देद्विदे सम्यक्कृच्छ्राधानं पुनर्द्विज इति। इदं च होमद्रव्यं दानं। स्मार्त्ताग्नित्यागमिति माधवः। उभयत्यागेपि युक्तमिति तु प्र
१०१ तिभाति। मासचतुष्टयत्यागेपि स एव। चतुष्टये तु संपूर्णे मासानां तु कृताशनं॥ त्यक्त्वाग्निं कृच्छ्रं कुर्वीत ततः पापात्प्रमुच्यते॥
षण्मासत्यागे पराकः। अत ऊर्ध्वमिष्टपर्यंतं पयोव्रतं॥ यथाहोशना॥ षण्मासांस्त्यजते यो वै पराकं तु समाचरेत्॥ ऊ
र्ध्वं पयोव्रतं कुर्यान्मासमेकं समाहितः॥ वर्षपर्यंतमेवाहुर्मुनयः संशितव्रताः॥ मासषट्कादूर्ध्वं संवत्सरं यावद्घाह्नव
ल्कोक्तानि उपपातकसामान्यप्रायश्चित्तानि जातिशक्तिगुणाद्यपेक्षया योजनीयानि। संवत्सरादूर्ध्वं तु मनूक्तं त्रैमासिक
त्रैमासिके कालात्ययत्वमहत्वापेक्षया योज्यं॥ एतानि च सर्वाणि प्रायश्चित्तानि नास्तिक्यादग्नित्यागे॥ यदा तु प्रमादात्त्यजति
तदा भरद्वाजगृह्ये विशेष उक्तः। प्राणायामशतमात्रिरात्रादुपवासः स्याद्विंशतिरात्रात्। अत ऊर्ध्वं मासं षष्टिरात्रा
न्तिस्रो रात्रीरुपवसेत्। अत ऊर्ध्वं मासं संवत्सरात्प्राजापत्यं चरेत्। अत ऊर्ध्वं कालबहुत्वे दोषबहुत्वमिति। इदमेव चा प्रा॰
कामतोग्न्यग्नित्याग इत्यपरार्के॥ अत्रैव विषये लौगाक्षिः॥ कृताशनं तु यो विप्रः प्रमादात्त्यजति प्रभो॥ प्राणायामशतं १०१

कुर्यादुपवासमथापि वेति॥ कामतस्त्यागे तु तत्रैव॥ द्वादशाहातिक्रमे त्र्यहमुपवासः। मासातिक्रमे द्वादशाहमुपवासः। संव
त्सरातिक्रमे मासोपवासः पयोभक्षणं वा। कूष्मांडीभिर्होमः॥ क्रमेणोभयं चेति। उपवासाशक्तौ यावत्संपयोभक्षणं॥ संवत्स
रानंतरमधिककालातिक्रम उभयमिति मदनपारिजाते। इदमेव चालस्येन श्रौताग्नित्यागेपि तथा च स्मृत्यंतरे। आलस्ये
न यदा वह्निं द्वादशाहं त्यजेत्प्रभो। त्रिरात्रमुपवासं च चरेत्पापविशुद्धय इति॥ इत्यग्नित्यागे॥ कौमारदारत्यागे तु विशेष
माह शातातपः॥ कौमारदारत्यागान्मासं पयोभक्षः शुध्यति। इदं चाल्पकालत्यागे। बहुकालत्यागे तु कौमारदारत्यागं प्र
क्रम्य हारीतः॥ पंच तपोभ्यावकाशजशायनान्यनुतिष्ठेयुं ग्रीष्मवर्षाहेमंतेषु मासं गोमूत्रयावकमश्नीयुरिति॥ ॥अथ
द्रुमच्छेदे॥ ॥मनुविष्णू॥ फलदानां च वृक्षाणां छेदने जप्यमृक्शतं॥ गुल्मवल्लीलतानां च पुष्पितानां च वीरुधां॥ गा
यत्र्यादीनां ऋचां शतं गायत्र्या जपो वेति स्मृत्यर्थसारे। यत्तु यमः। वृक्षलतागुल्मतृणच्छेदने ब्रह्मकूर्चं। फलवतां प्राजा
पत्यमिति॥ प्रायश्चित्तविवेके परार्के च वृक्षगुल्मलतावीरुच्छेदने ह्यद्भक्षस्त्र्यहमिति पाठ उक्तः। वृक्षच्छेदो हि न साध्यः
प्रागुक्तः। यत्तु हारीतः। स्थावरसरीसृपादिवधे यस्सेदं प्राणमित्येतया ज्यं कृत्वा तिलपात्रं ब्राह्मणाय दद्यादिति। तद

Indira Gandhi National Centre for the Arts

श्वत्थादिपुष्पवृक्षविषयमितिकेचित्। युक्तं तु चैत्यश्मशानादिस्थलवृक्षाणां कामतश्छेदनविषयं। तत्र दंडद्वैगुण्यादिदर्शना
प्रा॰ मा॰ त्। यथाह याज्ञवल्क्यः। चैत्यश्मशानसीमासु पुण्यस्थाने सुरालये॥ जातद्रुमाणां द्विगुणो दमो वृक्षे च विश्रुते॥ गुल्मगुच्छक्षु
१०२ पलतानौषधिवीरुधां। पूर्वस्मृतादर्धदंडः स्थानेषूक्तेषु कर्त्तन इति॥ गुल्मा मालत्यादयः। गुच्छाः कुरंटकादयः। क्षुपाः
करवीरादयः। लता द्राक्षाद्याः। प्रतानाः सारिवाद्याः। ओषधः शाल्याद्याः। वीरुधो गुडूच्याद्या इति॥ विज्ञानेश्वरः। पसेद
मितिमंत्रस्य तैत्तिरीये॥ यस्य हृप्राणां निमेषघरे ज्ञति यस्य ज्ञातं जनमानं च केवलं। सौम्याग्निनार्थितो ज्ञो हवीपि स नो मुंच
त्वऽहसः इति। यत्तु संवत्सरं व्रतं कुर्याच्छित्वा वृक्षं फलप्रदमिति शंखोक्तं तन्महाफलप्रदनारिकेरादिवृक्षाणां कामतश्छेद
नात्यंताभ्यासविषयं॥ वृक्षमित्येकवचनं त्वनुवादविशेषणत्वादविवक्षितं॥ यत्तु विष्णुपुराणे॥ भिनत्ति वीरुधो यस्य
वीरुत्संछेदे निराकरे॥ पत्रं वा शातयत्येकं ब्रह्महत्यां स विंदतीति। तदर्थवादमात्रं॥ शूलपाणिरप्येवमेव॥ ॥इति द्रु
मच्छेदे॥ ॥स्मसनेषु बौधायनः। अन्नजवाकूतस्करो राजभृत्यो वृक्षारोपकवृत्तिर्गरदोऽग्निदोऽश्वरथगजारोहणवृत्तीरं एम॰
गोपजीवी श्वागणिकः शूद्रोपाध्यायो वृषलीपतिर्मांडिको नक्षत्रोपजीवी श्ववृत्तिर्ब्रह्मजीवी चिकित्सको देवलकः पुरोहि १०२

तः कितवो मद्यपः कूटकारकोपपत्यतिक्रयी मनुष्यविक्रेता चेति तानुहरेत्समेत्यस्यापनो ब्राह्मण्यवस्थापा सर्वद्रव्यत्यागेन
चतुर्थकालाहाराः॥ संवत्सरं त्रिषवणमनुतिष्ठेयुस्तस्यांते दैवपितृतर्पणं गवाह्निकं चैतेभ्यः अवहार्या इति दमत्याभ्यासश्वा
गणिको यः श्वगणेन जीवति। श्वगणाद्वृत्ते चेति हस्र॥ मांडिकस्त्वपादिस्वनैरणः प्रबोधयिता। श्ववृत्तिः सेवकः ब्रह्मजीवी
मूल्येन वैदिककार्यकर्त्ता गवाह्निकं गोवधप्रायश्चित्तमुक्तं॥ यदपि बौधायनः। अथाशुचिकराणि द्यूतमभिचारोनाहि
ताग्नेरुंछवृत्तिः समावृत्तस्य भैक्षचर्या तस्य च गुरुकुले वासः कुर्ध्वं चतुर्भ्यो मासेभ्यो यस्य तमध्यापयति नक्षत्रनिर्देशनं चे
ति द्वादशमासान्द्वादशार्द्धमासान्द्वादशाहान्द्वादशषडहान्द्वादशत्र्यहान्त्र्यहमेकाहं चेति॥ द्यूते संवत्सरमाह तदप्य
त्यंताभ्यासविषयमेव॥ यत्तु शूद्रसेवायां बौधायनः। समुद्रयानं ब्राह्मस्वन्यासापहरणं सर्वापण्येष्ववहरणं भूम्यनृतं
शूद्रसेवया शूद्रायामभिजायते तदपत्यं च भवति तेषां तु निर्देशश्चतुर्थकालमितभोजिनः स्युरपोभ्युपेयुः। सवनानु
कल्पस्थानासनाभ्यां विहरंत एते त्रिभिर्वर्षैरपघ्नंति पापमिति तद्बहुकालं शूद्रसेवाविषयं॥ ॥अथानाश्रमे॥ ॥हारीतः।
अनाश्रमी संवत्सरं प्राजापत्यं कृच्छ्रं चरित्वाश्रममुपेयात्। द्वितीये तिकृच्छ्रं तृतीये कृच्छ्रातिकृच्छ्रं अत ऊर्ध्वं चांद्रायणमिति॥

Indira Gandhi National Centre for the Arts

प्रा॰प्रा॰ १०३ इतियाज्ञवल्क्यो॥उक्तोपपातकप्रायश्चित्तानि॥अथमनूक्तोपपातकेषु॥अहीनोद्विरात्रादिः।अहीनोधार्मिकस्तद्विषप
मभिचारमितिसामानाधिकरण्यमितिशूलपाणिः।केचित्तेनहाकोक्तकर्मयाजनएवेतत्प्रायश्चित्तंनतुयजनइत्याहुः
॥त्रिभिःकृच्छ्रैःप्राजापत्यसांतपनातिकृच्छ्रैरित्यर्थः॥एतच्चसकृत्करणेअत्राभ्यासेमूलकर्मणिचसाधारणप्रायश्चित्तानि
ज्ञातिशक्तिगुणाद्यपेक्षयायोज्यानि॥अथासत्प्रतिग्रहे॥तत्रदुष्टप्रतिग्रहनिषेधः॥मनुः॥असत्प्रतिग्रहीतारस्तथैवाया
ज्ययाजकाः।नरकेजीवतेयश्चसोंधकारंप्रपद्यते॥मात्स्ये।तस्मात्तीर्थेनगृह्णीयात्तीर्थेष्वायतनेनच॥निमित्तेषुचसर्वेषुन
प्रमत्तोभवेद्द्विजः।मनुः।हिरण्यंभूमिमश्वंगामन्नंवासस्तिलान्घृतं॥अविद्वान्प्रतिगृह्णानोभस्मीभवतिदारुवत्।अत्र
मंत्राविदुषएतत्प्रतिग्रहोनिषिध्यतेनतुहिरण्यादीनांकृष्णाजिनादिवत्प्रतिग्राह्यत्वं॥स्कांदे॥अजिनेमत्तशय्यांचमे
षीचोभयतोमुखीं।कुरुक्षेत्रेचगृह्णानोनभूयःपुरुषोभवेत्।पाद्मे॥महादानानियेविप्रागृह्णंतिज्ञानदुर्मदाःको
हिनार्हति।वसिष्ठः।शस्त्रंविषंचाप्रतिग्राह्याणिब्राह्मणस्य॥पाद्मे॥ब्रह्मांडंभूमिदानंचग्राह्यंनैकेनतद्भवेत्।गृह्णन् एम॰ १०३
न्दोषमवाप्नोतिब्रह्महत्यांनसंशयः॥भूमिदानंषोडशमहादानांतर्गतंकांचनमेदिनीदानमितिधर्मप्रकाशेहेमाद्रौ॥ब्रा

ह्मणःप्रतिगृह्णीयाद्वृत्त्यर्थंसाधुतःसदा॥अश्वंचमणिमातंगतिललोहानिवर्जयेत्॥कृष्णाजिनतिलग्राहीनभूयःपुरुषोभवेत्
॥शय्यालंकारवस्त्राणिप्रतिगृह्यमृतस्यच॥नरकान्ननिवर्तंतेधेनुंतिलमयींतथा॥वह्निपुराणे॥हस्त्यश्वरथयानानिमृतशय्या
सनादयः।कृष्णाजिनंचगृह्णातिअनापत्सुगतोद्विजः।तथोभयमुखींघोरांसशैलांमेदिनींद्विजः।कुरुक्षेत्रेचयद्दानंचंडाल
त्पतितात्तथा॥मासिकेचनवश्राद्धेभुंजन्प्रेतत्वमाप्नुयात्॥हेमाद्रौस्मृत्यंतरे॥कृष्णाजिनप्रतिग्राहीविक्रयीचैवरेतसः।गज
च्छायाश्रितोभुक्त्वानभूयःपुरुषोभवेत्।पाद्मे।नतीर्थेप्रतिगृह्णीयात्प्राणैःकंठगतैरपिः।अपिकामातुरोजंतुरेकांरक्षतिमातरं॥
तीर्थेप्रतिग्रहोयस्मात्तीर्थविक्रयएवसः।विक्रीतायांतुगंगायांविक्रीतस्याज्जनार्दनः।जनार्दनेतुविक्रीतेविक्रीतंभुवनत्रयं॥यस्तु
लोभाद्द्विजःक्षेत्रेप्रतिग्रहरुचिर्भवेत्॥नैवतस्यपरोलोकोनायंलोकोदुरात्मनः।ब्राह्मेप्रवाहमवधिंकृत्वायाचद्धस्तचतुष्टयं॥
तत्रनारायणःस्वामीनान्यस्वामीकदाचन॥तत्रनप्रतिगृह्णीयात्प्राणैःकंठगतैरपि॥दानधर्मे॥भाद्रशुक्लचतुर्दश्यांयावदाक्र
मतेजलं॥तावद्गर्भंविजानीयात्तदूर्ध्वंतीर्थमुच्यते॥ब्राह्मे॥सार्द्धहस्तशतंयावद्गर्भतस्तीरमुच्यते॥स्कांदे।तीराद्गव्यूतिमात्रं
तुपरतःक्षेत्रमुच्यते॥अत्रदानंजपोहोमोगंगायांनात्रसंशयः।तटेपोःप्रत्येकंक्रोशद्वयंगव्यूतिमात्रंगंगायांक्षेत्रमन्यत्र

Indira Gandhi National
Centre for the Arts

संनद्यादावनुक्तेनेतिधर्मप्रकाशेयाज्ञवल्क्यः॥विद्यातपोभ्यांहीनेननग्राह्यप्रतिग्रहः॥गृह्णन्प्रदातारमधोनयत्यात्मानमे
वचेति।एतेचनिषेधाअनेकविधाःकालदेशद्रव्यकर्तृपात्रादिभेदात्।तत्रकालतउपरागादौदेशतःकुरुक्षेत्रादौद्रव्यतोमेष्या
देःकर्तृतःपात्रविद्यातपोहीनसदातृतस्तद्द्वेधा॥जातितःकर्मतश्च।तथाचंडालादेःपतितादेश्चप्रायश्चित्तमाहयोगीश्वरः॥गोष्ठे
वसन्ब्रह्मचारीमासमेकंपयोव्रतः।गायत्रीजप्यनिरतःशुध्यतेऽसत्प्रतिग्रहात्।मनुः॥जपित्वा।त्रीणिसावित्र्याःसहस्राणि
समाहितः।मासंगोष्ठेपयःपीत्वामुच्यतेसत्प्रतिग्रहात्।मासमित्यंतसंयोगवाचित्वाद्द्वितीयपात्रिसहस्रजपस्यप्रतिदि
नव्याप्तिर्लभ्यते॥इदंचगुरुत्वान्निमित्तद्वयसमुच्चये॥यत्तुषडुंशस्मते॥पवित्रेष्ट्याविशुध्यंतिसर्वेघोराःप्रतिग्रहाःऐं
द्रवेनमृगारेष्टाकदाचिन्मित्रविंदया॥देव्यालक्षजपेनैवशुध्यंतेदुःप्रतिग्रहाइति।तद्देशकालकर्तृद्रव्याणामन्यतरदुष्ट
त्वेज्ञेयं॥अनयेवद्विशास्त्रिचतुःसंन्निपातेप्रायश्चित्तगौरवंकल्प्यं।पूर्वोक्तगायत्रीलक्षजपोवेतिकेचित्॥षडुंशस्मते॥
भिक्षामात्रेगृहतितुपुण्यंमंत्रमुदारयेत्॥हारीतः॥मणिवासोगवादीनांप्रतिग्रहेसावित्र्यष्टसहस्रंजपेत्॥पंचमध्यमे॥दशो स्म॰
त्तमे॥द्वादशरात्रंपयोव्रतंशतसहस्रमसत्प्रतिग्रहेष्विति।उत्तमत्वादिकंचमरणपादीनांमूल्यतोवचनाच्च॥तत्रवचनानि।ना १०४

रदः।देवब्राह्मणराज्ञांचविज्ञेयंद्रव्यमुत्तमं॥छांदोग्ये।त्रीण्यादुरतिदानानिगावःपृथ्वीसरस्वतीति।देवलः।नवोत्तमानिच
त्वारिमध्यमानिविधानतः।अधमानीतिशेषाणित्रिधात्वमिदंविदुः।अन्नंदधिमधुत्राणंगोभूरुक्माश्वहस्तिनः॥दानान्युत्तम
दानानिउत्तमद्रव्यदानतः॥विद्याशाच्छादनैवासःपरिभोगोपधानकंदानानिमध्यमानीतिमध्यमद्रव्यदानतः।उपानत्प्रेंखदाना
निछत्रपात्रासनानिच॥दीपकाष्ठफलादीनिचमरंबहुवार्षिकं॥बहुत्वादर्थजातानांसंख्यादेशोषुनेष्यते॥अधमान्यवशि
ष्टानिसर्वदानान्यनेकशइति॥आदेशोषुगणानामुत्पन्नापरिच्छेदइतियावत्॥नारदः।वासःकौशेयवर्जंचगोवर्जंपशवस्तथा
॥हिरण्यवर्जंलोहंचमध्यंव्रीहियवाअपि॥देवलः॥रत्नक्षेत्रवेश्महेमकुप्याभरणान्युत्तमानि॥चतुष्पदद्विपदधान्यफलोद
कवस्त्रकार्पासादानिमध्यमानि।स्मृत्यर्थसारे॥सर्वत्रानुक्तौदानदेशकालद्रव्येष्वदुष्टेषुद्वादशनिष्कप्रमाद्रव्यप्रतिग्रहेका
र्यं।एवंसर्वत्रद्रव्यानुसारात्प्रायश्चित्तवृद्धिह्रासाविति हेमाद्रौपाद्मे॥अतिदुष्टापेनशाप्यानग्राह्याद्विजसत्तमैः।गृहीतायांतुत
स्यांचपुनःसंस्कारमर्हति॥एतानिचप्रायश्चित्तानिप्रतिग्रहानंद्रव्यमुत्सृज्यैवकार्याणि॥तथाचमनुः॥यद्गर्हितेनार्जयंतिक
र्मणाब्राह्मणाधनं॥तस्योत्सर्गेणशुध्यंतिदानेनतपसैववा॥इदंतुदेशकालदात्राद्यनेकनिषेधसत्त्वे॥एकतरनिषेधसत्त्वे

Indira Gandhi National
Centre for the Arts

तुउत्सर्गप्रायश्चित्तयोर्विकल्पः।तथाचकल्पतरौयमः॥कर्मणागर्हितेनैवयद्वित्तंसमुपार्जितं॥तस्यत्यागेनशुध्यंतिधर्मस्या
प्रा॰प्रा॰ न्वेषणेनवा॥उत्सर्गप्रकारमाहसएव॥अप्सुप्रास्येत्तुतद्द्रव्यमन्यायेनयदागतं॥प्रतिग्रहोवादातव्यःश्रेष्ठानांब्रह्मचारि
१०५ णां॥पञ्चचतुर्विंशान्ते॥प्रतिग्रहेषुसर्वेषुषष्ठांशंपरिकल्पयेत्।जपहोमादिकंकुर्यात्कृत्वायत्नप्रतिग्रहं॥यच्चपाप्ने॥अ
थवेत्प्रतिगृह्णातिब्राह्मणोवृत्तिकर्षितः।दशांशमर्जितंदद्यादेवंतत्रप्रहीयत इति॥तत्सुदुष्टद्रव्यप्रतिग्रहविषयं।उप
पातकसामान्यप्रायश्चित्तान्यपिजातिशक्त्याद्यपेक्षयायोज्यानि॥ ॥इतिदुष्टप्रतिग्रहप्रायश्चित्तं॥ ॥अकोशीलत्वेयमः॥
नटनर्त्तकतक्षाणश्चर्मकारःसुवर्णकृत्।स्याणकार्षटगणिकाअभोज्यान्नाःप्रकीर्त्तिताः।गांधर्वेलोहकारश्चसौचिक
स्तंतुवायकः॥चक्रोपजीवीरजकःकितवस्तस्करस्तथा॥ध्वजामालोपजीवीचशूद्राध्यापकयाजकौ।कुलालश्चित्रकर्माच
वार्धुषिश्चर्मविक्रयी॥समर्घंत्यंम्प्रमाहत्यमहर्घंयःप्रयच्छति॥सवैवार्धुषिकोनामयश्चवृध्याप्रयोजयेत्॥वृथाश्र
मीवृथादाताआश्रमाणांचभेदकः॥पुण्यस्यविक्रयीयश्चयोनिसंकरकस्तथा।रंगोपजीवीकुंडाशीवीरहागुरुतल्पगः प्र०
।भिषक्चगरदश्चैवरूपाजीवीचसूचकः॥सौतिकःपार्श्विकश्चैवनिषादेनसमाःस्मृताः।कर्मस्वेतेषुयोमोहाद्ब्राह्मणोव १०५

र्त्तितेसदा॥प्रायश्चित्तेपिचरितेपरिहार्योभवेत्सदा।एतेब्राह्मणचांडालाःसर्वेब्रह्महणाःकिल।तस्माद्दैवेचपित्र्येचवर्जितास्तत्वदर्शि
भिः।एतेषामेवसर्वेषांप्रत्यापत्तिंतुमार्गतांभैक्षान्नमुपभुंजानोद्विजश्चांद्रायणंचरेत्॥स्याणकोश्रान्तप्रतीइतिमदनः।वृ
थाश्रमीवेदबाह्यजटाधारणादिना॥आश्रमाणांतुभेदकः॥तद्विरुद्धकारित्वात्आश्रमधर्महिंसकइतिकल्पतरौ॥योनिसं
करिकोव्यभिचारी॥कुंडाशीचतुःषष्टिपलान्नभक्षकइतिशूलपाणिः।युक्तस्त्वपत्योजावतिकुंडस्तस्मृतेभर्त्तरिगोलकः।य
स्तयोरन्नमश्नातिसकुंडाशपुचयतेबुधैरितिमनूक्तएव॥वीरहाग्नित्यागी॥गुरुतल्पगोदंडादिनागुरोःशासेतिमस्त्याः।गुरुनि
ष्ठवकारीतुमदनः।रूपजीवीवेश्याकरः।ताम्रादीनीस्वर्णादिसदृशरूपकारीवा॥सूचकःपिशुनः।सूनाघातस्थानंतेनजीवत्य
सौसौनिकः॥अत्रापिकोशीलत्वाद्यर्जितधनत्यागः॥ ॥अथविप्रदिष्टेषु॥विष्णुः।समुत्कर्षानृतेगुरोश्चालीकनिर्बंधेनदाह
रणेचमासंपयसावर्त्तेति॥इदंचमतिपूर्वे।आहारणंव्यभिचाराभिशापः।शंखः।त्रिस्नाग्नावशुचिद्वयंनदेवांभसिमानवः।मास
मेकंव्रतंकुर्यादुपाक्रम्यतथागुरुं।सुमंतुः।देवर्षिब्राह्मणाचार्यमातापितृनरेन्द्राणांप्रतिष्ठीवने।आक्रोशनेचोल्मुकेनजिह्वादा
हेद्विपणंदद्यात्॥अमतिपूर्वेगुरोर्निर्बंधेतु॥वसिष्ठः।गुरोरलीकनिर्बंधेकृच्छ्रंद्वादशरात्रकं॥चरित्वासचैलस्नातोगुरुम

Indira Gandhi National
Centre for the Arts

प्रा·मा· १०६ साक्षात्पूतो भवति॥ याज्ञवल्क्यः। गुरुं त्वंकृत्य हुंकृत्य विप्रं निर्जित्य वादतः। बध्वा वा वाससा क्षिप्रं स्नात्वा चोपवसेद्दिनं॥ बृहस्पति
ना तूक्तं दंडताडयित्वा तृणेनापि प्रसाद्यैव विशुध्यतीति पठितं। इदमकामतः। कामतस्तु शंखलिखितौ। आक्रोशानृतवादेषु
कणं त्रिरात्रं चोपवास इति। यत्तु वसिष्ठः। आचार्यमातृपितृहंतारस्तत्प्रसादाद्पपा इति। तदप्यज्ञानतः॥ हंतारोऽल्पतरदुःखत
ए। यत्त्वापस्तंबः। अनाक्रोश्यमाक्रोश्य त्रिरात्रमक्षारलवणभोजनं शूद्रस्य सप्तरात्रमभोजनं स्त्रीणां च॥ तदपि ज्ञानतः। अत्रानु
क्तविशेषप्रायश्चित्तेषु वार्धुष्यलवणक्रियादिषूक्तविशेषप्रायश्चित्तेषु च गोवधादिषूपपातकसामान्यप्रायश्चित्तानि ज्ञा
तिशास्त्राद्यपेक्षया पापोऽल्पानि। तत्रोक्तं मंमानवं वृषभैकादशापुतं त्रैमासिकं। ततो न्यूनं मासं यवागूपानमिति। एतानि कामतः।
अकामतस्तु। उपपातकशुद्धिः स्यादेवं चांद्रायणेन वा॥ पयसा वापि मासेन पराकेणाथवा पुनरिति याज्ञवल्क्योक्तानि॥॥
इत्युपपातकप्रायश्चित्तानि समाप्तानि। अथ जातिभ्रंशकरणमाह मनुः। ब्राह्मणस्य रुजः कृत्वा घ्रातिरघ्रेयमद्ययोः जैह्म्यं
पुंसि च मैथुनं जातिभ्रंशकरं स्मृतमिति। विष्णुस्तु पशुमैथुनमपि पपाठ। तेषु प्रायश्चित्तमाह मनुः। जातिभ्रंशकरं कर्म एम·
कृत्वान्यतममिच्छया॥ चरेत्सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया॥ एतच्चाभ्यास इति शूलपाणिः। संकरीकरणमाह मनुः। ख १०६

राश्वोष्ट्रमृगेभानामजाविकवधस्तथा॥ संकरीकरणं ज्ञेयं मीनाहिमहिषस्य चेति॥ विष्णुः ग्राम्यारण्यपशूनां हिंसनं संकरीकर
णमिति॥ अपात्रीकरणमाह मनुः॥ निंदितेभ्यो धनादानं वाणिज्यं शूद्रसेवनं॥ अपात्रीकरणं ज्ञेयं असत्यस्य च भाषणमिति। उ
पपातकेषु शूद्रसेवानापदि। इह तु सतत शूद्रस्य परिसेवनमिति भेदः। एवमन्यत्र। मलिनीकरणमाह मनुः। कृमिकीटवयोहत्या
मद्यानुगतभोजनं॥ फलैधःकुसुमस्तेयमधैर्यं च मलावहमिति॥ विष्णुः। पक्षिणां जलजानां स्थलजानां च घातनं मलावहमिति।
अत्र जातिभ्रंशकरत्वादिसंज्ञा रूढी न यौगिक्यः। अघ्रेयाघ्राणेपि जातिभ्रंशापत्तेः। क्षत्रियादीनां पात्रत्वाभावात्तान्प्रत्यपात्रीक
रणासंबाधाद्य। तेषु प्रायश्चित्तमाह मनुः। संकरापात्रकृत्यासु मासः शोधनमैंदवः। मलिनीकरणीयेषु तप्तः स्याद्यावकस्त्र्यहमि
ति॥ विष्णुः। संकरीकरणं कृत्वा मासमश्नीत यावकं॥ कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं तु कारयेत्॥ अत्राज्ञानात्संकरीकरणानुष्ठा
ने मासीयावकाशनं॥ ज्ञानात्कृच्छ्रातिकृच्छ्रं॥ अज्ञानाभ्यासे चांद्रायणं॥ ज्ञानाभ्यासे तु चांद्रायणद्वयं कल्प्यं॥ विष्णुः॥ अपात्रीकर
णं कृत्वा तप्तकृच्छ्रेण शुध्यति शीतकृच्छ्रेण वा भूयो महासांतपनेन वा॥ अज्ञानादपात्रीकरणे तप्तकृच्छ्रं शीतकृच्छ्रं वा॥ ज्ञाना
त्तु महासांतपनं॥ चांद्रायणं पूर्ववत्॥ विष्णुः। मलिनीकरणीयेतु तप्तकृच्छ्रं विशोधनं॥ कृच्छ्रातिकृच्छ्रमथवा प्रायश्चित्तं विशो

Indira Gandhi National
Centre for the Arts

प्रा॰ प्रा॰ १०७ धनं॥अज्ञानान्मलिनीकरणानुष्ठानेत्र्यहं यावकं॥ज्ञानात्तप्तकृच्छ्रः॥अज्ञानतोभ्यासे कृच्छ्रातिकृच्छ्रं॥एतानि च जातिभ्रंशकरादिषु सा
मान्यप्रायश्चित्तानि ब्राह्मणाहननः करणादिमध्ये यत्र प्रातिस्विकं प्रायश्चित्तं नोक्तं तत्र यत्र चोक्तं तत्रापि जातिशक्तिगुणाद्यपेक्षया यो
ज्यानि॥विशेषतश्च प्रायश्चित्तमुक्तं प्राक्॥ ॥इति जातिभ्रंशकरादिप्रायश्चित्तं॥ ॥अथ प्रकीर्णकप्रायश्चित्तानि॥ तत्स्वरूपमाह
विष्णुः।यदनुक्तं तत्प्रकीर्णकमिति महापातकादिमलिनाकरणांतेषु यन्न परिगणितं तत्प्रकीर्णकमित्यर्थः। मनुः शरणागतं
परित्यज्य वेदं विप्लाव्य च द्विजः।संवत्सरं यवाहारस्तत्पापमपसेधतीति॥वेदविप्लावनं चांडालादिश्रुतिपथे अनध्यायेषु च पाठः
।वसिष्ठः।पतितचांडालशवश्रावणे त्रिरात्रं वाग्यतश्चानश्नंतश्चासीरन्॥यावन्भागश्चंडालादिभिः श्रुतः तावंतं भागं सहस्रकृ
त्वः जपेदित्यर्थः॥यत्तु षड्विंशन्मते॥चंडालश्रोत्रावकाशे श्रुतिस्मृतिपाठ एकरात्रमभोजनमिति तदबुद्धिपूर्वकं॥सकृच्छ्र
वणे॥नित्याकरणे सामान्यप्रायश्चित्तं मनुराह॥वेदोदितानां नित्यानां कर्मणां समतिक्रमे।स्नातकव्रतलोपे दित्यर्थः।यत्तु
षड्विंशन्मते॥चंडालश्रोत्रावकाशे श्रुतिस्मृतिपाठ एकरात्रमभोजनमिति तदबुद्धिपूर्वकं॥सकृच्छ्रवणे॥नित्याकरणे सा प्राय॰
मान्यप्रायश्चित्तं मनुराह॥वेदोदितानां नित्यानां कर्मणां समतिक्रमे॥स्नातकव्रतलोपे च प्रायश्चित्तमभोजनमिति॥नित्य १०७

यज्ञाद्यकरणे तु आवारमाधवीये॥प्रजापतिः।दर्शं च पूर्णमासं च लुप्त्वा यो न यजेत वा॥एकस्मिन्कृच्छ्रपादेन द्वयोरर्धे
न शोधनं॥हविर्यज्ञेष्वसक्तस्य लुप्तमप्येकमादितः।प्राजापत्येन शुध्येत पाकसंस्थासु चैव हि॥संध्योपासनहानौ तु नित्य
स्नानं तु लोप्य च॥होमं च नैत्यकं शुध्येगायत्र्यष्टसहस्रकृत्॥समांते सोमयज्ञानां हानौ चांद्रायणं चरेत्॥अकृत्वाग्न्यन्तमं यज्ञं यज्ञा
नामधिकारतः॥उपवासेन शुध्येत पाकसंस्थासु चैव हीति॥कात्यायनः।पित्र्यज्ञात्यये चैव वैश्वदेवात्ययेपि च॥अनिष्ट्वा नवयज्ञे
न नवान्नप्राशने तथा॥भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत्॥इति॥विहितदक्षिणापर्याप्तद्रव्यालाभे नित्यं न लोपयेत्॥तदा
ह बौधायनः॥यस्मिन्नित्यानि लुप्तानि तथैवागंतुकानि च॥विपद्यपि न स स्वर्गं गच्छेत्पतितो हि सः॥तस्मात्कंदैः फलैः मूलैर्मधुना
रसेन वा॥नित्यं नित्यानि लोपयेदिति।पंचमहायज्ञाकरणे तु बृहस्पतिः॥अनिर्वर्त्य महायज्ञान्यो भुंक्ते प्रत्यहं गृही अनातुरः
सति धने कृच्छ्रार्धेन स शुध्यति॥एतच्च त्रिदिनातिपातक इति केचित्॥तथा॥आहिताग्निरुपस्थानं न कुर्याद्यस्तु पर्वणि॥ऋ
तौ न गच्छेद्भार्यां वा सोपि कृच्छ्रार्धमाचरेत्॥विष्णुरपि॥पर्वानारण्यवर्जं ऋतावगच्छन्पत्नीं त्रिरात्रमुपवसेत्ऋतुरत्र स्ना
नदिनादारभ्य द्वादशादिनानि॥यत्तु संवर्तः॥ऋतौ नोपैति यो भार्यां नियतां व्रतचारिणीं॥नियमातिक्रमात्तस्य प्राणाया

Indira Gandhi National
Centre for the Arts

प्रा॰मा॰ मत्रातं स्मृतं॥ इति नरकामतः। एतच्च समानदेशविषयं॥ ऋऋतुरत्रस्नातां तु यो भार्यां संनिधौ नोपगच्छति घोरायां भ्रूणहत्याया
१०८ पितृभिः सह मज्जतीति मिताक्षरावचनात्। एतदेव च प्रायश्चित्तं॥ स्त्रिया अपि ऋतौ भर्तुरनुपसर्पणे भवति॥ तस्मा अपि ना
रदीये दोषदर्शनात्॥ आहूताया तु वै भर्त्रा नोपपातित्वलक्षणान्विता॥ साध्वी ह्याजायते पुत्रि दृश्यावर्षाणि पंच चेति। तामृतुस्त्रीत्वाद्
र्धं॥ हारीतः। वहत्कमंडलुं रिक्तमस्नातोऽश्नंश्च भोजनं॥ अहोरात्रेण शुद्ध्यस्याद्दिनजप्येन चैव हि॥ अत्र चकारेणोपवासदि
नजपयोः समुच्चयः। ऋष्यशृंगः। इद्दचापीपलाशाग्निं यघ्नस्समप्रदर्शयेत्॥ प्रायश्चित्तमहोरात्रं धनुर्दंडश्च दक्षिणेति॥
धनुषो दंडस्य च क्रमेण दानं ज्ञातव्यं॥ अंगिराः॥ अनापदि नापदि च्चरेद्घस्कमिश्रोभिर्गृहे वसन्॥ दशरात्रं पिबेदुक्तं
आपत्काले त्वहं द्विज इति॥ वज्रं। वज्रकृच्छ्रं संबंधिद्रव्यं॥ एकस्मिन्पंक्तौ विषमदाने तु यमः। न पंक्त्यां विषमं दद्यान्नया
चेन्न दापयेत्॥ याचको दापको दाता न वै स्वर्गस्य गामिनः। प्राजापत्येन कृच्छ्रेण मुच्यंते कर्मणस्ततः। स एव॥ नदीसंक्रम राम॰
हंतुश्च कन्याविघ्नकरस्य च समे विषमकर्तुश्च निष्कृतिर्नोपपद्यते॥ त्रयाणामपि चैतेषां प्रत्यायतिं तु मार्गतां॥ मेहल १०८
श्वैन चान्नेन द्विजः श्चांद्रायणं चरेत्॥ संक्रम उदकावतरणमार्गः। समे विषमकर्ता पदादे॥ गौतमः। एकपंक्त्युपविष्टानां

विषमं यः प्रयच्छति॥ यश्च याचत्यसौ पंक्तं कुर्याद्ब्रह्महणि व्रतं॥ वसिष्ठः॥ दंड्योत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रं पुरोहितः। कृ
च्छ्रमदंड्यदंडने पुरोहितः॥ क्षत्रियाद्यभिवादने होरात्रमुपवसेद्वैश्यस्य शूद्रस्याभिवप्रने त्रिरात्रमुपवास इति। समित्पुष्प
हस्ताभिवादनेप्येवमिति केचित्॥ तथा॥ शय्यारूढपादुकोपानद्दारोपितपादोच्छिष्टांधकारस्थश्राद्धकृज्जपदेवपूजाभि
रताभिवादने त्रिरात्रमुपवासः। स्यादत्र निमंत्रितेनान्यत्र भोजने पित्रिरात्रमिति देवादीनामाभिमुख्येनष्ठीवनादौ तु सुमं
तुः। देवर्षिगोब्राह्मणाचार्यमातृपितृनरेंद्राणां प्रतिष्ठीवनआक्रोशने जिह्वोद्देहेद्धिरण्यं दद्यादिति॥ दाहोत्थापनाविरो
धेन मंडपोद्यानदेवतागारादिभेदे॥ काश्यपः। वापीकूपारामसेतुलतातडागवप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्म
णभोजनं निवेद्य च तत्र आज्याहुतीर्जुहुयादिदं विष्णुरिति प्रथमामानस्तोक इति द्वितीयां विष्णोःकर्माणीति तृतीयां॥ पा
दोऽस्यांत्यामिति चतुर्थीयां देवतामुद्दिश्य इति तस्मै देवतायै ब्राह्मणान्भोजयेदिति। एतच्चाल्पोपघाते॥ महतोपघाते भ्या
से प्राजापत्यादिकल्पनीयं॥ देवता चात्र मृन्मयी पूजितोडिता च ग्राह्या॥ प्रायश्चित्तस्याल्पत्वादन्यत्र तु दंडो गौरव दर्शनेन तु
प्रायश्चित्तं कल्प्यं॥ दंडवत्प्रायश्चित्तं भवतीति वचनात्॥ तथात्र दंडगौरवमाह कात्यायनः। हरेच्छिंद्याद्दहेद्वापि देवानां

Indira Gandhi National Centre for the Arts

प्रतिमांयदि॥तद्वत्तंचैवयोभिंद्यात्सानुपातंसर्वसाहसं॥विष्णुरपि।अभक्ष्यस्याविक्रेयस्यविक्रयीप्रतिमाभेदकश्च॥उत्र
प्रा.मा. १०९ महासाहसंदंडनीयः॥अत्रभग्नोद्धारादिकमप्याहतुः।शंखलिखितौ॥प्रतिमारामकूपसंक्रमणध्वजसेतुनिपातनभंगेषु
तदुत्थापनंप्रतिसंस्कारोष्टशतंचेति।मनुः।संक्रमध्वजयष्टीनांप्रतिमानांचभेदकः।प्रतिकुर्याच्चतत्सर्वंपंचदद्याच्छता
निवेति।अत्रचप्रतिमातारतम्येनतद्भेदतारतम्येनदंडप्रायश्चित्तयोर्व्यवस्थोन्नेया॥दारिद्र्यदिनाभर्तुरतिक्रमेआ
पस्तंबः।भर्तुरतिक्रमेकृच्छ्रइति।अतिक्रमोदारिद्र्यक्रोधमात्सर्यादिनावमाननं।पर्वणिमैथुने॥विष्णुपुराणे॥निं
द्याश्रवणं।चतुर्दश्यष्टमीचैवअमावास्याथपूर्णिमा।पर्वाण्येतानिराजेंद्ररविसंक्रांतिरेवच॥स्त्रीतैलमांससंभोगीपर्व
स्वेतेषुयोनरः।विण्मूत्रभोजनंनामप्रयातिनरकंमृतः।मिताक्षरायांस्मृत्यंतरे॥अष्टम्यांचचतुर्दश्यांदिवापर्वणिमैथु
नं॥कृत्वासचैलंस्नात्वाचवारुणीभिश्चमार्जयेदिति।श्राद्धदिनेमैथुनेस्नातकव्रतलोपेचेत्यनेनोपवासएव॥वमने प्रा. १०९
शातातपः।विच्छर्दनेद्विजातीनांभिन्नभांडेचभोजनं।पंचगव्येनशुद्धिःस्यादितिशातातपोब्रवीत्॥

षनिर्हरणार्थंब्रह्मचारीकृच्छ्रत्रयंचरेत्॥महाव्याहृतिहोमंचकुर्यात्।प्रथमव्यस्तसमस्ताभिराज्याहुतीर्हुत्वा
भूरग्नयेचपृथिव्यैचमहतेचस्वाहा।ॐभुवोवायवेचांतरिक्षायचमहतेचस्वाहा।सुवरादित्यायचदिवेचमहतेचस्वाहा॥भू
र्भुवःसुवश्चंद्रमसेचनक्षत्रेभ्यश्चदिग्भ्यश्चमहतेचस्वाहा।ॐपाहिनोअग्नएनसेस्वाहा।ॐपाहिनोअग्नेविश्ववेदसेस्वाहा
॥ॐयज्ञंपाहिविभावसोस्वाहा।सहरय्यानिवर्त्तस्वाग्नेपिन्वस्वधारया॥विश्वप्स्न्याविश्वतस्परिस्वाहा।पुनर्व्याहृतिभिर्जुहुया
दिति।एतदल्पधर्मलोपे।बाहुल्येप्रायश्चित्तविशेषमाहसविधानेशौनकः।तंवोधियाजपेन्मंत्रंलक्षंचेत्यशिवालये।ब्र
ह्मचारिणोधर्मेचशून्यंचेत्पूर्णमेवहीति।इतिब्रह्मचारिधर्मलोपप्रायश्चित्तं॥ ॥व्रतिपसरणेषष्ठदर्शनेशंखः।व्रतिपस
रणेषष्ठरात्रप्राणायामपरायणः।संवत्सरंव्रतंकुर्याच्छित्वावृत्तफलप्रदं॥एतच्चकामतोभ्यासे।अन्यत्रत्वर्धादिपोह्यं॥गृही
तव्रतभंगे॥वायुपुराणे॥लोभान्मोहात्प्रमादाद्वाव्रतभंगोयदाभवेत्।उपवासत्रयंकुर्यात्कर्याद्वाकेशमुंडनं॥प्रायश्चि
त्तमिदंकृत्वापुनरेवव्रतीभवेत्।वाक्यादुःसमुच्यते।मिथ्याशपथेयमः॥विप्रस्यवधसंयुक्तंकृत्वानुशपथंमृषा।ब्रह्म
हापावकाग्नेनव्रतंचांद्रायणंचरेत्।एतच्चशपथांतरस्याप्युपलक्षणं॥सुकृतंयेप्रयच्छंतिपावकजीवकृतंन्नराः।तेपिषंत

Indira Gandhi National
Centre for the Arts

१

११०

प्रा॰ मा॰

शिलापेषेयद्येतेपापकारिणइतिमार्कंडेयपुराणवाक्यात्॥यत्रोक्तंयत्रवानोक्तमत्योशनसवाक्यात्तत्रप्राजापत्यः कल्पनी
यः।ब्राह्मणस्यक्षत्रियादिवृत्त्याधनार्जनेप्रचेताः ब्राह्मणस्यापत्कालेपितृमातृवद्भृत्यस्यानंस्मृत्तस्योपनिवेशः।तत्रसंवत्सर
मर्धमात्रंचांद्रायणंचरेदितिवेतयवृत्तिजीवनेतत्रवर्षाभ्यंतरेमासद्विमासादौचांद्रायणभागहारः।कल्पनीयः।संवत्सराद्
र्ध्वंद्विगुणंत्रिगुणादिकल्पनीयं॥शूद्रवृत्त्यार्जनेमनुः।नकथंचनकुर्वीतब्राह्मणःकर्मवार्षलं॥वृषलःकर्मवाब्रह्मंपत
द्विगुणंत्रैगुणादिकल्पनीयं॥शूद्रवृत्त्यार्जनेमनुः।नकथंचनकुर्वीतब्राह्मणःकर्मवार्षलं॥वृषलःकर्मवाब्रह्मंपत
नीयेहितेतयोः।वार्षलंकर्मसेवा॥एवमुपक्रमपुनरुपनयनसहितकृच्छ्राद्यानुवृत्तौसएव।प्रायश्चित्तंप्रकुर्वतिविक
र्मस्थास्तुयेद्विजाः।ब्राह्मणाश्चपरित्यक्तास्तेषामप्येतमादिशेत्॥एवंशूद्रस्यापिद्विजकर्मकरणेप्येतद्देव।तस्यापित
द्विजकर्मत्वात्।अर्जितधनत्यागपूर्वकंचैतत्॥पद्भ्यांकितेतिनार्जयंती।मनूक्तेः।स्त्रीधनोपजीवनेतुचांद्रायणेनचे
केनसर्वपापक्षयोभवेत्।इत्यापस्तंबोक्तंचांद्रायणंत्रिपेतद्धनंदत्वाकार्यं॥भार्यायामुखमैथुनेतूशनाशयस्त॥ब्रा
ह्मणोधर्मपत्नीमुखेमैथुनंसेवेतनसशुध्यतीतिवैवस्वतः।प्राजापत्येनशुध्यतीतिहारीतइति।गोपुक्तयानस्थस्यमै
थुनेयमः।यदिगोभिःसमायुक्तंयानमारुह्यवैद्विजः।मैथुनंसेवतेचैवमनुःस्वायंभुवोब्रवीत्।त्रिरात्रंक्षपणंकृत्वा एम॰

सचैलंस्नानमाचरेत्॥गोभ्योयवाढकंदद्याद्यंतमात्रपविशुध्यतीति।यत्तुस्मरणं॥मैथुनंतुसमासाद्यपुंस्त्रियोषितिवाद्वि
जःगोपानेषुदिवाचैवसवासाःस्नानमाचरेत्इतितदकामतःमहत्करणेज्ञेयं।क्रोधाद्भार्यायास्त्वंमेमाताअसदृशीअगमेत्यु
क्तापुनरुपभोगेप्रायश्चित्तमाहपराशरः।यस्तुक्रुद्धःपुमान्ब्रूयात्जायायास्तुअगमतां॥पुनरिच्छतिभार्यांचविप्रमध्येतु
वाचयेत्।आर्तःकुद्धस्तमोंधोवाक्षुत्पिपासाभयार्दितः।दानंपुण्यमकृत्वावाप्रायश्चित्तंदिनत्रयी।उपस्थशौत्रिषवणंमहा
नद्युपसंगमं॥चीर्णांतेचैवगांदद्यात्ब्राह्मणान्भोजयेद्दशेति।वाचयेत्तस्यप्रायश्चित्तोपदेशंकारयेत्।पुण्यंपापादिसंक
ल्पितदानपापाद्यकृत्वेत्यर्थः।वस्तिकर्मणिपमः॥वस्त्रिकर्मणिकृष्टेश्चप्रछर्दनविरेचने–शिशुकृच्छ्रेणशुध्येच्चतस्मात्पा
पान्नसंशयः।प्रछर्दनविरेचनयोरभ्यासएवशिशुकृच्छ्रः।अन्यत्रतुस्नानमात्रं।तथाचसएव॥अजीर्णेभ्युदितेवांतेश्म
श्रुकर्मणिमैथुने।दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयतइति।देवागारशिलादिमास्त्वगृहकरणंनिंदतियमः।इष्ट
काकाष्टाश्मलोहान्देवालयसमन्वितान्।गृहीत्वास्वगृहेयेतुलोभाद्वैयोजयंतिच।एकाकिनस्तथोद्विग्ना॥क्षुत्तृषाप
रिपीडिताः।बंधनेनेतुतिष्ठंतियावत्पापस्यसंक्षयः॥अत्रप्राजापत्यचांद्रायणादिकल्प्यं॥वानप्रस्थयत्योर्व्रतभंगे॥

Indira Gandhi National
Centre for the Arts

२
१११
प्रा॰मा॰

वानप्रस्थोदीक्षाभेदेकृच्छ्रंद्वादशरात्रंचरित्वामहाकक्षंवर्धयन्। भिक्षुर्वानप्रस्थवत्सोमवृद्धिवर्जंस्वशास्त्रसंस्कारश्चे
ति। दीक्षाभेदोयमनियमातिक्रमः। महाकक्षमौषधवनंप्ररोहोदकसेचनादिनावर्द्धयेत्। सोमशब्देनौषधिसा
मान्यंलक्ष्यते॥ नवृद्धिःपरंभिक्षोर्निवर्तते। परंतुसर्वंसममित्यर्थः स्वशास्त्रसंस्कारः। प्राणायामाभ्यासः। हारीतः। अ
नृतपिशुनवचनेभिक्षूणांतप्तकृच्छ्रःक्रोधाहंकारपिशुनेषुच॥ छागलेयः। व्रतानियानिभिक्षूणांतथैवोपव्रतानि
च॥ एकैकातिक्रमेतेषांप्रायश्चित्तंविधीयते। अहोरात्रोषितोभूत्वाकृच्छ्रंचान्द्रायणंचरेत्। कृच्छ्रपदंचान्द्रायणविशे
षणं॥ व्रतोपव्रतान्याहबौधायनः॥ अथमौनिव्रतानि। अहिंसासत्यवचनमस्तेयंमैथुनस्यचवर्जनं॥ अथोपव्रतानि
॥ अक्रोधोगुरुशुश्रूषाप्रमादःशौचमाहारशुद्धिश्चेति। जलेप्रतिबिंबदर्शनादौयाज्ञवल्क्यः॥ मयितेजइतिछायां
स्वांदृष्ट्वाम्बुनिवैजपेत्। सावित्रीमशुचौदृष्टेचापलेवानृतेपिच। मयितेजइतिमंत्रोवाजसनेयिप्रसिद्धः। अशुचौ
मूत्रपुरीषादौ। चापलेहस्तचेष्टायां॥ प्रतिज्ञात्यागानृतोक्तौहारीतः। प्रतिश्रुत्याभूतंब्रूयान्मिथ्यासत्यमथापिवास ल्म॰
तप्तकृच्छ्रसहितंचरेच्चान्द्रायणव्रतमिति। गुरुवत्स्वविषयकप्रतिज्ञाकरणपरमेतत्॥ प्रायश्चित्तस्यगुरुत्वात्

भोजनकालीनमौनत्यागेपराशरः॥ मौनव्रतंसमाश्रित्यआसीनोनवदेद्द्विजः। भुंजानोहिवदेद्यस्तुतदन्नंपरिवर्जयेदितिअ
र्धभुक्तान्नपात्रेणजलपानेसएव॥ अर्धभुक्तेतुयोविप्रस्तस्मिन्पात्रेजलंपिबेत्। हतंदैवंचपित्र्यंचआत्मानंचोपघातयेत्।
पशुवन्मुखेनजलपानेपुनःसएव॥ विद्यमानेषुहस्तेषुब्राह्मणोज्ञानदुर्बलः। तोयंपिबतिवक्त्रेणश्वयोनौजायतेध्रुवमि
ति। अत्रोपवासःप्रायश्चित्तं॥ असपिंडैःसहशवहनेपारस्करः। मृतस्यबांधवैःसार्धंकृत्वातुपरिदेवनं। वर्जयेत्तदहोरात्रं
दानंश्राद्धादिकर्मचेत्यनेनैकाहः॥ एतच्चकामतः। अकामतस्तुस्नानमेव॥ प्रेतालंकरणेशंखः। कृच्छ्रपादोऽसपिंडस्यप्रे
तालंकरणेकृते। अज्ञानादुपवासस्स्यादशक्तौस्नानमिष्यतइतिकामतोद्विगुणं॥ यत्तुतप्तकृच्छ्रानुवृत्तावंगिराः। आत्मत्या
गिनांचसंस्पृष्टौतदृक्षपातकारीचेति॥ तदभ्यासेसमानोत्कृष्टजातिप्रेतानुगमनेमनुः॥ अनुगम्येच्छयाप्रेतंज्ञातिमज्ञाति
मेवच॥ स्नात्वासचैलस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीति। अत्रेच्छयेतिग्रहणादेतत्कामतः। अकामतस्तुस्नानमेव॥ यत्तु
याज्ञवल्क्यः॥ ब्राह्मणेनानुगंतव्योनशूद्रोनद्विजःक्वचित्॥ अनुगम्यांभसिस्नात्वास्पृष्ट्वाग्निंघृतभुक्शुचिरिति॥ ब्राह्म
णेनासपिंडेनद्विजोविप्रादिः। अस्यचघृतप्राशनस्यभोजनकार्येविधानेप्रमाणाभावान्नभोजननिवृत्तिरितिमिताक्षरा

११२ २

प्रा॰ मा॰

पां॥ तन्मानवसमानविषयं॥ वस्तुतो घृतप्राशनस्य भोजनकार्ये विधाने प्रमाणाभावान्न भोजननिवृत्तिरिमितो हारण्यां॥
तन्मानवसमानविषयं॥ वस्तुतो घृतप्राशनस्य प्रायश्चित्तार्थत्वात्। अभोजनमेव युक्तं। अत एव वसिष्ठेन मानुषास्थि स्नि
ग्धं स्पृष्ट्वा त्रिरात्रमस्निग्धे त्वहोरात्रं॥ शवानुगमने चैवमिति अनुगमने एकाहस्योक्तत्वात्। क्षत्रियवैश्यानुगमने त्वधि
कं कल्प्यं॥ ब्राह्मणस्य शूद्रानुगमने पराशरः॥ प्रेतीभूतं तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः। अनुगच्छेन्नीयमानं स त्रिरा
त्रेण शुध्यति॥ त्रिरात्रे ततश्चीर्णे नदीं गत्वा समुद्रगां। प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यतीति। अत्र घृतप्राशनस्य
शुध्यर्थत्वाभिधानान्न भोजननिवृत्तिः। एतच्च कामतः। अकामतस्त्वर्धं॥ एवं क्षत्रियस्य वैश्यस्य शूद्रानुगमने वैश्यस्य
च शूद्रानुगमने कल्प्यं। इष्टापूर्ते शुभाशुभमहाकर्मस्वनुपहतानामपि विज्ञानेश्वराचार्यादीनां कृच्छ्रातिकृच्छ्रं चांद्रा
यणाख्यं सर्वप्रायश्चित्तं॥ तत्स्थाने द्वादशप्राजापत्यान्वा तदर्धं वा वदंतीति स्मृत्यर्थसारे। कन्याया विवाहात्पू
र्वरजोदर्शने प्रायश्चित्तमाह। प्रयोगपारिजाते आचार्यः। कन्यामृतुमतीं शुद्धां कृत्वा निष्कृतिमात्मवान्। तथा च एम॰
कारयित्वा तामुद्वहेतान्नतां सुधीः। पितान्वनूतनस्य पुत्र्या लग्नगणपे दर्शितः सुधीः। दानावधि गृहे यत्नात्पालयेद्दर्शितः

सुधीः। दद्यात्तदनुसंख्यायाः शक्तः क्रः कन्यापिता यदि। दातव्यैकापि निस्वेन दाने तस्या यथाविधि॥ दद्याद्वा ब्राह्मणे श्रेष्ठे वस्त्रेति निःस्वः
सदक्षिणां। तस्यास्तो नर्तुसंख्येषु वर्णाय प्रतिपादयेत्। उपोष्य त्रिदिनं कन्या रात्रौ पीत्वा गवां पयः। अदृष्टरजसे दद्यात्कन्यायै तत्र भू
षणं॥ तामुद्वहन् वरश्चापि कूष्मांडैर्जुहुयाद्घृतमिति। श्राद्धोपवासदिने दंतधावने विष्णुरहस्ये॥ श्राद्धोपवासदिवसे खादित्वा
दंतधावनं। गायत्र्या शतसंपूतमंबु प्राश्य विशुध्यतीति॥ ॥इति प्रकीर्णप्रायश्चित्तानि॥ ॥अथ पतितत्यागविधिः॥ ॥स च महा
पातकिन एवेति केचित्। युक्तं तु पतितस्य बहिः कुर्युरित्यादौ पतितमात्रोपादानात्संकोचे मानाभावात्। उपपातकादिना पतितस्या
पि भवतीति प्रतीपः। तथा यदि बंधुभिः प्रेर्यमाणोऽपि प्रायश्चित्तं न करोति तदा कार्यः। शंखः। तस्य तु गुरोर्बांधवानां राज्ञश्च समक्षं
दोषानभिख्याप्य पुनः पुनराचारं लभस्वेति स यद्येवमप्यनवस्थितमतिः स्यात्ततोऽस्य पात्रं विपर्यस्येत्। अत्र कालमाह मनुः। पतितस्योद
कं कार्यं सपिंडैर्बांधवैः सह। निंदितेऽहनि सायाह्ने ज्ञात्यृत्विग्गुरुसंनिधौ॥ निंदितेऽहनि रिक्तादितिथौ। देशमाह योगीश्वरः। प
तितस्य बहिः कुर्युः सर्वकार्येषु चैव तं॥ दासीकुंभं बहिर्ग्रामान्निनयेरन्स्वबांधवाः। निनयनविधिमाह गौतमः। तस्य विद्या
गुरुयोनिसंबंधाः सर्वाण्युदकादीनि प्रेतकर्माणि कुर्युः॥ पात्रं चास्य विपर्यस्येयुर्दासः कर्मकरो वावकरात्पात्रमानीय दा

Indira Gandhi National
Centre for the Arts

प्रा॰ प्रा॰ सीद्वया त्पूरयित्वा विपर्यस्येदमुमनुदकं करोमीति नामग्राहं ते सर्वेन्वालभेरन् प्राचीनावीतिनो मुक्तशिखा विद्यागुरवो यो-
निसंबधाश्च वीक्षेरन्॥ अप उपस्पृश्य ग्रामं प्रविशेयुः॥ योनिसंबधाः पित्रादयः॥ उदककरणादीनीत्यत्र जलिप्राआदिदा-
हादिनिवृत्तिः। प्रेतकर्माणीति सपिंडीकरणांतानां प्रेतप्राप्त्यर्थं॥ दासो गर्भदासः। कर्मकरो वेतनसंपादितः॥ दासीघटाद्दा-
साहृतघटजलेन॥ नामग्राहममुमित्यस्य स्थाने पतितनामगृहीत्वा॥ स्मृत्यर्थसारे त्वस्माकं त्वमतः इत्युक्ता निनयेत्पु-
त्रैः॥ दासेव वा निनयेत्॥ यथा मनुः। दासी घटमपां पूर्णं पर्यस्येत्प्रेतवत्पदा॥ अहोरात्रमुपासीरन्नाशौचं बांधवैः स-
ह॥ प्रेतवदित्यपसव्यदक्षिणामुखत्वाद्यतिदेशार्थं॥ ततः सन व्यवहार्यः। यथा मनुः॥ निवर्तेरंश्च तस्मात्संभाषणास-
हासने॥ दायाद्यस्य प्रदानं च यात्रामेव च लौकिकीं॥ स्त्री त्यागे विशेषमाह योगीश्वरः। पतितानामेष एव विधिः। स्त्रीणां
प्रकीर्तितः। वासो गृहांतिके देयमन्नं वासः सरक्षणं॥ अन्नं जीवनमात्रं समं॥ वस्त्रं मलिनं॥ यत्तु वसिष्ठः॥ चतस्रस्तु प-
रित्याज्याः शिष्यगा गुरुगा च या॥ पतिघ्नी च विशेषेण जुंगितोपगता च येति॥ तत्पूर्ववदेवासामन्नवस्त्राद्याच्छादनादि एम॰
त्यागार्थं॥ अन्यासां तु पतितानामन्नवस्त्रादि देयमिति विज्ञानेश्वरः। जुंगितः प्रतिलोमजः। संभाषणे प्रायश्चित्तं मिताक्ष-

एयां॥ अत ऊर्ध्वं तेन संभाष्य तिष्ठेदेकरात्रं जपन्सावित्रीमज्ञानपूर्वं ज्ञानपूर्वं च त्रिरात्रमिति त्यागोत्तरमनुतापादिना प्रायश्चि-
त्तं कृत्वा समायाते विशेषमाह मनुः॥ प्रायश्चित्ते तु चरिते पूर्णकुंभमपां नवं॥ तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये॥
गोतमोपि॥ यस्तु प्रायश्चित्तेन शुध्येत्। तस्मिञ्छुद्धे शातकुंभमपां नवं॥ तेनैव सार्धं प्रास्येयुः स्नात्वा पुण्ये जलाशये॥ गोत-
मोपि। यस्तु प्रायश्चित्तेन शुध्येत्। तस्मिञ्छुद्धे शातकुंभमयं पात्रं पुण्यतमाद्ध्रदात्पूरयित्वा स्रवंतीभ्यो वा तत एनम-
प उपस्पर्शयेयुरथास्मै तत्पात्रं दद्युस्तत्प्रतिगृह्य जपेच्छांता द्यौः शांता पृथिवी शांतं शिवमंतरिक्षं यो रोचनस्तमिह गृह्णा-
मीत्येतैर्यजुर्भिः पावमानीभिस्तरत्समंदीभिः कू- डैश्चाज्येन जुहुयात्॥ हिरण्यं ब्राह्मणाय दद्यात् गां वाचार्याय॥ यस्य तु
प्राणांतिकं प्रायश्चित्तं स मृतः शुध्येत्। एतदेव शांत्युदकं सर्वेषूपपातकेषु॥ तत एनं कृतप्रायश्चित्तं नैव कुत्सयेयुः। त-
या सर्वकार्येषु क्रयविक्रयादिषु तेन सह संव्यवहरेयुरिति उपस्पर्शयेयुराचमनं कारयेयुः। उपपातकेष्वभ्यासेन
महापापतुल्येन पातित्यापादकेषु॥ अत्र विशेषमाह हारीतः। त्वचिरस्थापूर्ववत्समादाय गोभ्यो दद्याद्यदिताः प्रतिगृ-
ह्णीयुरथैनं प्रवर्तयेयुरितरथा नेत्यभिप्रेतं॥ प्रतिग्रहो भक्षणं॥ इतरथा भक्षणाभावप्रसंगात्॥ पुत्रजन्मना त्वा

Indira Gandhi National
Centre for the Arts

मा·मा: तदिति अभिषिक्तस्य पूर्वोक्तरीत्या स्नातस्य। प्रत्युद्धारः संग्रहः। स च पुत्रजन्मना व्याख्यातः। संग्रहोत्तरं जातकर्मादिना सं
स्कुर्यादित्यर्थः। क्वचित्प्रायश्चित्तोत्तरमपि संव्यवहारे यवादमाह योगीश्वरः। शरणागतबालस्त्रीहिंसकान्संविशेन्न
तु। चीर्णव्रतानपि सतः कृतघ्नसहितानिमान्। संविशेद्व्यवहरेत्॥ ॥इति पतितत्यागविधिः॥ ॥अथ रहस्यप्रायश्चित्तं॥
॥रहस्यं कर्त्रतिरिक्तेनाज्ञातं॥ अगम्यागमने च द्वयोऽकर्तृत्वाभावमतस्तत्र तदतिरिक्तेनाज्ञाते रहस्यत्वं एतेन पाप
मात्रे तृतीयेनाज्ञाते रहस्यत्वमिति वदंतः प्रत्युक्ताः परास्ताः। अत्र प्रायश्चित्तमपि रहस्यमेव कुर्यात्। तथा च हारीतः। रह
स्ये रहस्यं प्रकाशे प्रकाशमिति॥ अत्र पर्षदुपस्थानमपि नास्ति। तथा याज्ञवल्क्यः। विख्यातदोषः कुर्वीत पर्षदोनुम
तं व्रतं॥ अनभिख्यातदोषस्तु रहस्यं व्रतमाचरेत्। तत्र यद्यनभिज्ञः कर्त्ता तदा अमुकस्मिन्रहस्यपापे किं प्रायश्चि
त्तमिति॥ व्याजांतरेण पृष्ट्वा कुर्यात्॥ ॥तत्र साधारणप्रायश्चित्तानि॥ मनुः। एतैर्द्विजातयः शोध्या व्रतैराविष्कृतैनसः
॥अनाविष्कृतपापांस्तु मंत्रैर्होमैश्च शोधयेत्॥ संवर्त्तः। दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजातयः॥ पातकेभ्यः प्रमुच्यं एम·
ते वेदाभ्यासान्न संशयः। वसिष्ठः। जपिनां होमिनां चैव ध्यायिनां तीर्थसेविनां॥ निवसंति न पापानि ये च स्नाताः शिरोव्र

तैः। मनुः। वेदाभ्यासोन्वहं शक्त्या महायज्ञक्रिया क्षमा॥ नाशयंत्याशु पापानि महापातकजान्यपि॥ यथैधांस्तेजसा वह्निः
प्राप्तं निर्दहति क्षणात्। तथा ज्ञानकृतं पापं तथा दहति वेदवित्॥ सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश॥ अपि भ्रूणह
नं मासात्पुनंत्यहरहः कृताः। अन्वहमित्यत्रापि कालाकांक्षायां मासादित्यन्वेति। माधवीये यमः॥ सहस्रपरमां देवीं शतमध्यां
दशावरां। गायत्रीं संजपेन्नित्यं महापातकनाशिनीं॥ विरजं द्विगुणं जप्त्वा तदह्नैव विशुध्यति वामदेव्यं द्विरावर्त्य तदह्नः॥ पौरुषं
सूक्तमावर्त्य मुच्यते सर्वकिल्बिषात्। वृषभं शतशो जप्त्वा तद°। विरमेकगुणं कृत्वा तदह्नैव विशुध्यति॥ रुद्रैकादशकं ज
प्त्वा दशः। चतुर्विंशतिमते। पावमानीस्तथा कौत्सं पौरुषं सूक्तमेव च॥ जप्त्वा पापैः प्रमुच्येत सपुत्रं मधुच्छंदसं॥ विडालब्रा
ह्मणं रुद्रं मुक्तियोमोतृकस्तथा॥ वामदेव्यं बृहत्साम जप्त्वा पापैः प्रमुच्यते॥ यज्ञायज्ञीयमादित्यं ज्येष्ठसाम च राजनं॥ पा
रुच्छेपं च सामानि जप्त्वा मुच्येत किल्बिषात्॥ अथर्वशिरसं चैव पुरुषसूक्तं तथैव च॥ नीलरुद्रास्तथैवैं द्वं जप्त्वा पापैः
प्रमुच्यते॥ आथर्वणाश्च ये केचिन्मंत्राः कामविवर्जिताः। ते सर्वे पापहंतारो याज्ञवल्क्यवचो यथा॥ ऋग्वेदमभ्यस्येद्य
स्तु यजुः सामाप्यथापि वा॥ सामानि सरहस्यानि अथर्वांगिरसस्तथा॥ ब्राह्मणानि च कल्पांश्च षडंगानि तथैव च॥ आ

Indira Gandhi National
Centre for the Arts

६
११५
प्रा·प्रा:

ख्यानानितथान्यानिजप्त्वापापैःप्रमुच्यते॥इतिहासपुराणानिदेवतास्तवनानिच॥जप्त्वापापैःप्रमुच्येतधर्मख्यानैस्तथा
परैरिति॥बौधायनः।विधिनाशास्त्रदृष्टेनप्राणायामान्समाचरेत्।यदुपस्थकृतंपापंपद्भ्यांवायत्कृतंभवेत्॥बाहुभ्यां
मनसावाचाश्रोत्रत्वक्घ्राणचक्षुषेति॥प्राणायामाःमासपर्यंतंषोडश।पूर्वोक्तमनुवाक्यात्।चतुर्विंशतिमते।मृगा
रेष्टिःपवित्रेष्टिस्त्रिहविःपावमान्यपि॥इष्टयःपापनाशिन्योवैश्वानर्यासमन्विताः।कौर्मे।जपस्तपस्तीर्थसेवादेवब्राह्म
णपूजनं॥ग्रहणादिषुकालेषुमहापातकशोधनं॥पुण्यक्षेत्राभिगमनंसर्वपापप्रणाशनं॥देवताभ्यर्चनंनॄणांअशेषा
घविनाशनं॥अमावास्यांतिथिंप्राप्यमासमाराधयेद्भवं॥ब्राह्मणान्भोजयित्वातुसर्वपापैःप्रमुच्यते॥कृष्णाष्टम्यांमहा
देवंतथाकृष्णचतुर्दशीं॥संपूज्यब्राह्मणमुखेसर्वपापैःप्रमुच्यते॥त्रयोदश्यांतथारात्रौसोपहारंत्रिलोचनं॥दृष्ट्वेशं
प्रथमेयामेमुच्यतेसर्वपातकैः॥एकादश्यांनिराहारःसमभ्यर्च्यजनार्दनं॥द्वादश्यांशुक्लपक्षस्यसर्वपापैःप्रमुच्य
ते॥उपोषितश्चतुर्दश्यांकृष्णपक्षेसमाहितः॥यमायधर्मराजायमृत्यवेचांतकायच।वैवस्वतायकालायसर्व एम·
भूतक्षयायच।प्रत्येकंतिलसंयुक्तान्दद्यात्सप्तोदकांजलीन्।स्नात्वानद्यांतुपूर्वाह्णेमुच्यतेसर्वपातकैः।तत्रैव॥ना

२२

न्यत्पापभिजंतूनांमुक्त्वावाराणसींपुरीं॥सर्वपापप्रशमनंप्रायश्चित्तंकलौयुगे॥यम·।जपेद्वाप्यस्यवामीयंपावमानी
र्यथापिवा॥कुंतापंवालखिल्यांश्चनिविन्मैषांवृषाकपिं।होतृन्रुद्रान्सकृज्जप्त्वामुच्यतेसर्वपातकैः॥मनुः।एनसां
स्थूलसूक्ष्माणांचिकीर्षन्नपनोदनं॥अवेत्यृचंजपेदब्दंयत्किंचेदमितीतिच॥अवेत्यृक्अवतेहेडोवरुणनमोभिरित्या
दिका।जपस्त्वर्थांतराणवरुद्धकाले॥शातातपः।मद्यंपीत्वागुरुदारांश्चगत्वास्तेयंकृत्वाब्रह्महत्यांचकृत्वा॥भस्मछन्नोभस्म
शय्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैः॥इदमकामतःसकृत्करणे॥अभ्यासेतुयद्वद्विंशान्मते॥महाव्याहृतिभिर्हो
मस्तिलैःकार्योद्विजन्मना॥उपपातकशुध्यर्थंसहस्रपरिसंख्यया।महापातकसंयुक्तोलक्षहोमेनशुध्यति।हारीतः।
पातकातिपातकोपपातकमहापातकानामेकतमसंनिपातेवाघमर्षणमेवत्रिर्जपेत्॥यमः।दशप्रणवसंयुक्तैःप्रा
णायामैश्चतुःशतैः॥मुच्यतेब्रह्महत्यायाःकिंपुनःशेषपातकैः॥अत्रमहापापोपपापेषुक्रमाच्चतुस्त्रिद्व्येकशतैःप्राणा
यामाः।संकरीकरणादिप्रकीर्णकेषुमासःकल्प्यातइतिमिताक्षरायां॥अत्रिः।ब्रह्महागुरु—त्पावागम्यागामीतथैव
च।सुवर्णस्तेयश्चौरश्चगोघ्नोविश्वासघातकः॥शरणागतघातीचकूटसाक्षीत्वकार्यकृत्।एवमादिषुचान्येषुपापे

Indira Gandhi National
Centre for the Arts

प्रा॰ मा॰

शुचिरतः सदा॥ प्राणायामत्रयं कृत्वा कल्पे कल्पे समाहितः। अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते॥ इति सामान्यतो रह
स्यप्रायश्चित्तानि॥ ॥अथ विशेषतः। तत्र योगीश्वरः॥ त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघमर्षणं॥ अन्तर्जले विशुध्येत गांच
दत्वा पयस्विनीं॥ जपश्चान्तर्निमग्नेन त्रिरावर्तनीयः। देवद्विजगुरुहन्ता॥ अघमर्षणं त्रिरावर्तयेदिति। मनूक्तेः। इदमकाम
तः सकृद्वधे॥ यत्तु मनुः सव्याहृतिप्रणवकाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः इति॥ तस्मि
न्नेव विषये गोदानाशक्ताविति विज्ञानेश्वरः। उपवासत्रयाशक्तावित्यपरे॥ यच्च गौतमेन मासव्रतमुक्तोक्तं। एतच्च तत एव
ब्रह्महत्यासुरापानसुवर्णस्तेयगुरुतल्पेषु प्राणायामैः श्रान्तोऽघमर्षणं जपेदिति। तदकामाभ्यासे। योगीश्वरः। लोमभ्यः स्वा
हेत्यथवा दिवसं मासं तु नाशनः। जले जप्त्वाभिजुहुयाच्चत्वारिंशद्घृताहुतीः॥ इदमप्यकामतः सकृद्वधविषयं। यत्तु मनुः
॥अरण्ये वा त्रिरभ्यस्य प्रयतो वेदसंहितां॥ मुच्यते पातकैः सर्वैः पराकैः शोधितस्त्रिभिरिति॥ तत्कामतोऽभ्यासविष
यं॥ कामतः श्रोत्रियादिवधविषयं वा॥ यच्च बौधायनः। ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य स्नातः शुचिः शुचिवा एस॰
सउदकान्ते स्थंडिलमुपलिप्य सकृत्क्लिन्नवासाः सकृत्पूतेन पाणिनादित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत प्रातः

शतं मध्याह्ने शतमपराह्णे॥ शतमपरिमितं वोदितेषु नक्षत्रेषु प्रसृतिं यावकं प्राश्नीयात्। ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपात
केभ्यः सप्तरात्रात्प्रमुच्यंते। द्वादशरात्रान्महापातकेभ्यः ब्रह्महत्यासुवर्णस्तेयं सुरापानमिति वर्जयित्वा एकविंशतिरात्रेण तान्यपि
तरतीति। तत्कामतः सकृद्वधविषयं॥ यत्तु वृहद्विष्णुः। ब्रह्महत्यां कृत्वा ग्रामात्प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य प्रभूतेंधनेना
ग्निं प्रज्वाल्याघमर्षणेनाष्टसहस्रमाहुतीर्जुहुयात्तदेतस्मात्पूतो भवतीति तदनुग्राहकविषयं॥ यदपि मनुः॥ त्र्यहं तूपवसेद्यु
क्तस्त्रिरह्नोऽभ्युपयन्नपः॥ मुच्यते पातकैः सर्वैस्त्रिर्जप्त्वाघमर्षणं इति तदतिनिर्गुणविषयं॥ यच्च हारीतः॥ महापातका
तिपातकोपपातकानामेकत्र संनिपाते वाघमर्षणमेव त्रिर्जपेदिति तं त्रिमित्तिपरं। सवनस्थस्त्रीक्षत्रियविप्राहिताग्निस्त्रा
त्रेयीगर्भिण्यविज्ञातगर्भवधेष्वेतान्येव प्रायश्चित्तानि पादोनानि योज्यानि। इति ब्रह्महत्याप्रायश्चित्तं॥ अथ सुरापाने यमः। वृह
स्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः॥ समत्वं ब्राह्मणैर्गच्छेदित्येषा वैदिकी श्रुतिः॥ यमः। सुरापः कंठमात्रमुदकमवतीर्य सु
तसोमात्प्रसृतिमादाय योंकारेणाभिमंत्र्य पिबेत्। इदमौषधार्थपाने॥ याज्ञवल्क्यः॥ त्रिरात्रोपोषितो हुत्वा कूष्मांडीभिर्घृ
तं शुचिः। पूर्वलिखिते तत्पूर्वार्धस्थं चत्वारिंशदित्यनुवर्तते॥ कूष्मांड्यो यद्देवा देवहेडनमित्याद्याः। इदमकामतः सकृत्पा

Indira Gandhi National Centre for the Arts

प्रा॰मा॰
नोएतदस्त्राक्तोमनुः।मासंजपित्वाअपनोवासिष्ठंचतृचंप्रति।माहित्रंशुद्धवत्यश्चस्तरयोपिविशुध्यति।अपनःशोशुच
दघमितिसप्तर्चंवासिष्ठं॥प्रतिस्तोमेभिरुषसंवसिष्ठाइतितृचं॥माहित्रंमहित्रीणामवोस्त्विति तृचंशुद्धवत्यएतोन्विंद्रंस्त
वामेत्याद्याः॥एतेषांचजपोमासंप्रत्यहंषोडशवारमिति विज्ञानेश्वरः।कामतःसुरापानेतुमनुः।मंत्रैःशाकलहोमीयै
रब्दंहुत्वाघृतंद्विज॥सुगुर्वप्यपहंत्येनोजप्त्वावामनइत्यृचं॥देवकृतस्यैनसइत्यष्टौशाकलहोमीयामंत्राः।नमइद्उग्रंन
मआविवासइत्यस्याऋचोजपः।प्रत्यहंसंवत्सरपर्यंतंपदद्वपिसएव॥महापातकसंयुक्तोनुगछेद्गाःसमाहितः।अ
भ्यस्याब्दंपावमानीर्भिक्षाहारोविशुध्यति।इतितत्कामतोभ्यासविषयं॥अनेकमहापातकविषयं॥इतिसुरापाणप्रा
यश्चित्तं॥ ॥अथसुवर्णस्तेये॥तत्रयाज्ञवल्क्यः।ब्राह्मणसुवर्णहारीतुरुद्रजापीजलेस्थितः।इदंविलिखितेतत्सर्वा
र्धस्यंत्रिरात्रोयोषितइतिविष्णुर्धर्मइतिचात्राप्यनुषज्यते॥अत्रिः।एकादशगुणान्वापिरुद्रानावर्त्यधर्मवित्।महापा
पैरपिस्पृष्टोमुच्यतेनात्रसंशयः॥निर्गुणस्वामिकापहरणेसुवर्णन्यूनपरिमाणहरणेचमनूक्तं॥सकृज्जप्त्वास्यवामीयंशि राम॰
वसंकल्पमेवच॥सुवर्णमपहृत्यापिसद्योभवतिनिर्मलः।अस्यवामीयमस्यवामस्यपलितस्यहोतुरितिद्वापंचाशदृक्सूक्तं।
८

पञ्चाग्रतोदूरमुदैतुदैवमितिषट्शिवसंकल्पमंत्राः।पतुमाधवायेशातातपब्राह्मणःसुवर्णस्तेयंकृत्वाहिरण्यरूपलापांप्र
हिप्यामुनिस्तोतोहिरण्यवर्णाभिश्चतस्रभिरण्मानमभ्युस्तत्रान्प्राणायामान्त्वातदेहस्त्यापात्पूतोभवतीतितद्गुणवतोनि
र्गुणस्वामिकस्यसुवर्णनपरिमाणहेमहरणप्रयोजकत्वेद्रष्टव्यं॥ ॥इतिस्तेयप्रायश्चित्तं॥अथगुरुतल्पगमने॥मनुः।हविष्पां
तीयमभ्यस्यनतमंहइतीतिच॥जप्त्वाचपौरुषंसूक्तंमुच्यतेगुरुतल्पगइति।हविष्पांतमजरंस्वर्विदमिति।नतमंहोनदुरितमिति
नतमंहइति॥इतिवाइतिमेमनइतिपौरुषंसहस्रशीर्षेति॥एतदभ्यतमस्यमासंषोडशकृत्वोजपइतिमिताक्षरायां॥इदम
कामतःसकृत्कृतमनेकामतस्तुयाज्ञवल्क्यः।सहस्रशीर्षजापीतुमुच्यतेगुरुतल्पगः।गौर्देयाकर्मणोस्यांतेपृथगेभिःपयस्विनी॥जा
पीतितच्छील्यप्रत्ययाद्वावृत्तिः।अत्रपुरुषसूक्तकरणकंहोममुपवासत्रयंचाहहद्धविष्णुः॥त्रिरात्रोपोषितःपुरुषसूक्तजप
होमाभ्यांगुरुतल्पगःशुध्येदिति॥आवृत्तौहोमेचसंख्यापेक्षायांपूर्वश्लोकगताचत्वारिंशत्॥घृताहुतीरित्यत्रापिसंबध्यते।इति
विज्ञानेश्वरः॥एभिरितिबहुवचनेसुएपत्तेनगुरुतल्पगाग्रध्यंते।तेनैतैःस्वस्वप्रायश्चित्तांतेएकाधेनुर्देया॥गुरुतल्पसमेतदि
तिदशविषयेचार्धक्षीणानंचक्रमेणयोज्यं।महापातकिसंसर्गिणस्त्वेनसहसंसर्गस्तदीयमेवप्रायश्चित्तं॥एकांशप्रायश्चि

Indira Gandhi National
Centre for the Arts

११८

प्रा॰मा॰ तामाज्ञो रहस्यसंसर्गे तु रहस्यमेव व्रतं॥ संसर्गाख्यनिमित्तस्य रहस्यत्वात्। केचित्तु रहस्यप्रायश्चित्तभाजः प्रकाशसंसर्गे प्र
काशप्रायश्चित्तमाहुः। तन्न संसर्गस्य हि प्रकाशत्वममुकपापवत्संसर्गोयमिति परस्य ज्ञाने भवति एवं च परेण ज्ञाते प्रका
शपापवत्संसर्गत्वमेव तस्य भवति न तु रहस्यपापवत्संसर्गत्वं॥ ननु यौनाध्यापनादिसंसर्गस्यानेककर्तृत्वात् न रहस्यमिति
चेन्न। तत्रानेककर्तृत्वस्याप्रसक्तत्वात्। तत्तद्व्यतिरिक्तेनाज्ञाते भवत्येव रहस्यत्वं॥ त- तिपातकादिसंसर्गिणस्तदाय
मेव व्रतं॥ इति रहस्यमहापापप्रायश्चित्तं॥ अथोपपापादिषु याज्ञवल्क्यः॥ प्राणायामशतं कार्यं सर्वपापापनुत्तये॥ उप
पातकजातानामनादिष्टस्य चैव हि॥ बौधायनोपि। अपि वाक्चक्षुःश्रोत्रत्वक्घ्राणमनोव्यतिक्रमेषु त्रिभिः प्राणायामैः शु
ध्यति। शूद्रस्त्रीगमनान्नभोजने पृथक्पृथक् सप्ताहं सप्त प्राणायामान् धारयेत्। अभक्ष्याभोज्यामेध्यप्राशने तथाचा
पण्यविक्रयेषु मधुमांसघृततैललाक्षालवणान्नवर्जेषु॥ यच्चान्यदप्येवंयुक्तं द्वादशाहं द्वादश प्राणायामान् धारयेत्। अ
पपातकपतनीयवर्जं यच्चान्यदप्येवंयुक्तं मासंमासं द्वादशद्वादश प्राणायामान् धारयेदुपपातकवर्जं यच्चान्यदप्येवंयुक्तं द्वाद णम॰
शार्द्धमासं द्वादश प्राणायामानुधारयेदिति॥ अत्र प्राणायामत्रयं प्रकीर्णकेषु सप्ताहो द्वादशाहस्त्वमणि तेषूपपातकविशे

२७

षेषु॥ अर्धमासो जातिभ्रंशकरादिषु। मासो वधाद्युपपातकेषु॥ षण्मासा अतिपापानुपापेषु॥ संवत्सरो महापापेषु त
त्र सप्ताहे प्राणायामाः॥ ४९ द्वादशाहे। १४४ अर्धमासे १८० मासे ३६० षाण्मासिके २१६० संवत्सरे ४३२० एतानि च प्राणा
यामत्रयसप्ताहादिव्रतानि पूर्वोक्तेषु प्रकीर्णकोपपातकादिषु विषयेषु भवंतीति मिताक्षरायां कामतोभ्यासभक्षणे स्कंमं
तुः। रेतोविण्मूत्राशनं कृत्वा लशुनपलांडुगृंजनकुंभीकादीनामन्येषां भक्षाणां भक्षणं कृत्वा ततः कंठमात्रमुदकमवतीर्य
शुद्धवतीभिः प्राणायामत्रयं कृत्वा महाव्याहृतिभिः रोगमुदकं पीत्वा तदेतस्मात्पूतो भवतीति॥ अकामतो याज्ञवल्क्यः॥
ॐकाराभिष्टुतं सोमसलिलं पावनं पिबेत्॥ कृत्वा तु रेतोविण्मूत्रप्राशनं हि द्विजोत्तमः। दुष्टप्रतिग्रहे मनुः॥ प्रतिगृह्या
प्रतिग्राह्यं भुक्त्वा चान्नं तु विगर्हितं॥ जपंस्तरत्समंदीयं पूयते मानवस्त्र्यहादिति। एतदभ्यासविषयं सकृदेव॥ अप्रशस्तं तु कृत्वा
ऽप्सु मासमासीत भैक्ष्यभुक्॥ इदं कामतोऽभ्यासविषयं॥ अज्ञानकृते प्रकीर्णकवाचिकमानसोपपातकेषु। आह यो
गीश्वरः॥ निशायां वा दिवा वापि यदज्ञानकृतं भवेत्॥ त्रैसंध्याकरणात्तत्सर्वं प्रविणाशपति॥ मनुरपि। यदह्नाकुरुते पापं
कर्मणा मनसा गिरा॥ आसीनः पश्चिमां संध्यां प्राणायामैर्विहंति तत्॥ शातातपः॥ अनृतं मद्यगंधं च दिवा मैथुनमेव च॥

Indira Gandhi National
Centre for the Arts

१०

११८

प्रा॰प्रा॰ पुनातिहृषलान्नंचवहः संध्याउपासिता॥शंखः॥शतंजप्तातुसाविश्री सर्वपापप्रणाशिनी।सहस्रजप्ताचमहापातकेभ्यः
प्रमोचनीदशसाहस्रजाप्येनसर्वकल्मषःनाशिनी॥स्वर्णस्तेयकृद्विपोब्रह्महागुरुतल्पगः॥सुरापश्चविशुध्यंतिल
क्षजप्यान्नसंशयः॥इतिसर्वपापानिप्रकीर्णकानि।महापातकानुपपातकानि।सर्वकल्मषाण्यतिपातकान्यनुपात
कानिचेतिविज्ञानेश्वरः।सर्वपापेषुरहस्यप्रायश्चित्तप्रकारमाहप्रायश्चित्तविवेकेविश्वामित्रः॥प्रकाशउक्तंपतत्किं
चिद्विंशद्भागोरहस्यंकंत्रिंशद्भागःषष्टिभागःकल्मोजासाद्यपेक्षया॥आदिशब्देनशक्तिगुणकामाकामासानभ्यासादि
गृह्यतेइतिशूलपाणि॥अत्रद्वादशाब्दस्यविंशांशप्राजापत्याःत्रिंशांशःषट्षंशः।६०॥चतुर्विंशत्यब्देएतद्द्विगुणाश्वशाः
।षड्ब्देतदर्धं॥यत्तुशूलपाणिः।यत्रप्रकाशेमरणांतिकःप्रायश्चित्तंतत्ररहस्येमरणांतिकमेव॥मरणेद्भासासंभवादित्या
ह॥तन्न।यद्यपिमरणेज्ञानसंभवतितथापि॥तद्विकल्पिकेचतुर्विंशत्यब्दादौसंभवत्येव॥तेनचतुर्विंशत्यब्दषष्टित्रिं
शद्विंशांशाद्वादशाचतुर्विंशतिषड्विंशन्मिता॥प्राजापत्याजात्याद्यपेक्ष्यपाकर्तव्याः॥मरणांतिकस्यतुतद्विधिनाप्र एम॰
काशपापविषयत्वेनोक्तत्वात्।रहस्येप्रापकप्रमाणाभावात्।प्राप्तिरेवदूरपास्तेतिसर्वंशिवं॥ ॥इतिमीमांसकशंक

११

१२०

प्रा॰प्रा॰ रभट्टात्मजेनभट्टनीलकंठेनकृतभास्करेप्रायश्चित्तमयूखः॥ ॥संवत१८६०मितिजेठसुदि१५ ॥

एम॰

Indira Gandhi National
Centre for the Arts